**PHALITA JYOTISHAM**

**ACHARYA 2nd YEAR**
**Course/Paper-6**

# जातकपारिजात: (१-४ ६-१० अध्यायाः)

## *Jātakapārijāta (1-4 & 6-10 adhyāyāḥ)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

**CENTER OF DISTANCE & ONLINE EDUCATION**
*(Formerly Directorate of Distance Education)*
**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**
*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# जातकपारिजातः

(प्रथमाध्यायात् दशमाध्यायपर्यन्तम् )

राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति -५१७५०७

(आ.प्र)

(मानितविश्वविद्यालयः)

दूरस्थ शिक्षा पाठ्य सामग्री

ज्योतिषशास्त्रम् -

# प्रथमपाठ्यसूची

| क्रं.सं. | | पृ.सं |
|---|---|---|


१.१ प्रस्तावना
१.२ ज्योतिषशास्त्रस्य प्रयोजनम् ।
१.३ अस्यपाठस्य उद्येश्यानि
१.४ शास्त्रस्य वर्गीकरणम्
१.४.१) सिद्धान्तः
१.४.२) संहिता
१.४.३) होरा
१.५ बोधप्रश्नाः
१.६ ज्योतिषशास्त्रस्य प्रवर्तकानां नामानिः
१.७ बोधप्रश्नाः
१.८ राशेःपरिभाषा,नामान्तराणि नक्षत्रेषु राशिस्थापनप्रकारः
१.८.१ राशेः नामान्तराणि
१.८.२ सप्तविंशति नक्षत्रेषु राशिस्थापन प्रकारः
१.९ बोधप्रश्नाः
१.१० कालरूपी पुरुषे राशिस्थापन प्रकारः
१.११ बोधप्रश्नाः
१.१२ मेषादि द्वादशराशीनां स्वरूपम्
१.१२.१ मेषादि राशीनां ह्रस्वादि–स्त्रीपुरुषसंज्ञा–दिशा–क्रूरसौम्यसंज्ञा चरादिसंज्ञा बोधकं चक्रम् ।
१.१२.२ राशीनां सलिलादि विचारः
१.१२.३ राशीनां द्विपदचतुष्पदादिसंज्ञा
१.१२.४ राशीनां धातुमूलजीव संज्ञा निरूपणम् ।
१.१२.५ मेषादीनां विप्रादि वर्णानां निरूपणम्
१.१२.६ राशीनां कालविशेषे अन्धत्वादि निरूपणम् ।

१.१२.७ द्वादशराशीनां वर्णाः

१.१३ बोधप्रश्नाः

**१.१४ राश्याधिपतिः विचारः**

१.१४.१ सूर्यादि ग्रहाणां त्रिकोणानि उच्चनीच राशयः ।

१.१५ बोधप्रश्नाः

१.१६ गृहादि दशवर्गविचाराः

१.१६.१ प्रथमवर्गः

१.१६.२ द्वितीयवर्गः

१.१६.३ द्रेष्काणः तृतीयवर्गः

१.१६.४ सप्तमांशः चतुर्थवर्गः

१.१६.५ नवमांशः पञ्चमवर्गः

१.१६.६ दशमांशः षष्ठवर्गः

१.१६.७ द्वादशांशःसप्तमवर्गः

१.१६.८ षोडशांशःअष्टमवर्गः

१.१६.९ त्रिंशांशः नवमवर्गः

१.१६.१० षट्यंशः दशमवर्गः

१.१७ बोधप्रश्नाः

१.१८ तन्वादि द्वादशभावानां विचारः

१.१९ केन्द्रादिविभागाः

१.१९.१ राशेःउदयमानं तथा शुभाशुभ अंशानां विचारः

१.२० बोधप्रश्नाः

१.२१ संक्षिप्तउत्तरमूलकःआदर्श प्रश्नाः

१.२२ नातिदीर्घउत्तरमूलकप्रश्नाः

१.२३ दीर्घउत्तरमूलकप्रश्नाः

१.२४ संक्षिप्तउत्तरमूलकप्रस्नानां उत्तराणि।


❖❖❖

# प्रथमपाठः

## १.१ प्रस्तावना

प्रिय छात्राः ! आचार्यप्रथमवर्षे दूरस्थशिक्षायां भवतां स्वागतम् । ज्योतिषशास्त्रस्य पठने के लाभाः, एवं तत्र प्रतिपादितानां विषयानां आलोचनां करिष्यामः । ज्योतिषशास्त्रं नाम ग्रहविज्ञानम् । सूर्यादि ग्रहनक्षत्रतारादीनां गतिं स्थितिं च आधारिकृत्यकृतं शास्त्रम् । ज्योतिषशास्त्रं कालविज्ञानं अपि कथ्यते ।

अस्मिन् ब्रह्माण्डे सर्वे जीव जन्तवःग्रहप्रभावेण प्रभाविताः सन्ति। तत्र ग्रहाणां प्रभावः अन्तरिक्षः प्रभावत्वेन स्वीक्रियते । अस्माकं भारतवर्षस्य सर्वतो प्राचीनतमग्रन्थः एव वेदः। सकलज्ञानस्य आधारभूताः सिद्धान्ताः वेदे संप्राप्यन्ते । अस्माकं सौबिध्यानुसारं वेदस्य विभागाः कृताःसन्ति आचार्याः । ते भवन्ति ऋग्वेदः,यजुर्वेदः,सामवेदः,अथर्ववेदःच । ज्योतिषशास्त्रं वेदस्य नेत्रस्थानीयं शास्त्रम् । कथमिति चेत् – यथा चक्षुषाङ्गं विना न किमपिकार्यं सिध्यति तथैव ज्योतिषशास्त्रं विना समयस्य सम्यक् निर्धारिणमसम्भवम् । अतः वेदस्य षडङ्गेषु अस्य शास्त्रस्य महत्वं विद्यते । उक्तं च –

वेदास्तावद्यज्ञकर्मप्रवृत्ता
यज्ञाःप्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रदस्मात् कालवोधो यतःस्यात्
वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।
वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यतयाचाङ्गमध्येऽस्य तेनोच्यते ।
संयुतोऽपीतरैःकर्णनासादिभिःचक्षुषाङ्गेनहीनो नकिञ्चित्करः ।।

(सिद्धान्तशिरोमणी म.का.श्लो– ९,१०)

यथा उचिते काले कृतमेव कर्म साफल्यं , अनुचिते काले कृतमेव कर्म वैफल्यं भवति । वेदस्य प्रमुख कार्यं यज्ञकर्मसम्पादनम् । अतः वेदः अस्मान् यज्ञं प्रति प्रेरयति । समीचीनेकाले कृतं यज्ञं लोके साफल्यं भजते । नोचेत् विफलता ।

## १.२ ज्योतिषशास्त्रस्य प्रयोजनम् ।

प्रिय पाठकाः! यस्य कस्यापि शास्त्रस्य किमपि प्रयोजनं नूनं अस्तीति समेषानां अभिप्रायः। ज्योतिषशास्त्रस्य मुख्य प्रयोजनं भवति शुभाशुभ निर्णयः। सकले अस्मिन् ब्रह्माण्डगोले मनुष्यः एव सर्वतो बुद्धिमान् प्राणी विशेषः। अतःअस्माकं शुभाशुभ फलनिरूपणं केवलं अस्माभिः मानव समाजस्योपरि एव चिन्तयामः।

## १.३ अस्यपाठस्य उद्देश्यानि–

अस्य पाठस्य पठने छात्राणां निम्न विषयाणां अववोधः स्यात् ।

क) ज्योतिषशास्त्रस्य परिभाषा ज्ञानम् ।

ख) षड़ङ्गेषु शास्त्रस्य स्थतिःज्ञानम् ।

ग) शास्त्रस्यवर्गीकरणं तत्र प्रमुख आचार्याणां नामानि ।

घ) मेषादि राशीनां,अश्विन्यादि नक्षत्राणां सम्पर्कित विविधविषयाणां ज्ञानम् ।

ङ) ग्रहाणां बल निरूपणाय उच्चादि अवस्थाः,षड्वर्गादि विचारज्ञानम् ।

च) तन्वादिभावानां नामानि एवं तेषांशुभाशुभादि विचारः ।

## १.४ शास्त्रस्य वर्गीकरणम्

प्रिय जिज्ञासवः! अधुना ज्योतिषशास्त्रस्य विभागानां निरुपणं कुर्मः । तर्हिः ज्योतिषशास्त्रस्य त्रयविभागाः सन्ति । ते भवन्ति सिद्दान्त, सिंहिता , होरा प्रभेदैः। विभागत्रयं त्रिस्कन्धात्मकं शास्त्रमिति कथ्यते ।

ज्योतिषशास्त्रम्

१) सिद्दान्तः　　२) होरा　　३) संहिता

## १.४.१) सिद्धान्तः –

सिद्धान्तग्रन्थे ग्रहाणां दृक्सिद्धगणना कृता विद्यते । सामान्यतया वक्तुं शक्यते यत् ज्योतिषशास्त्रस्य यस्मिन् ग्रन्थे सविधि गणितेन ग्रहाणां दृक्सिद्ध स्पटता निर्णयं भवति तस्य ग्रन्थस्य सिद्धान्त ग्रन्थमिति संज्ञा ।

## १.४.२) संहिताः –

यस्मिन् स्कन्धे ज्योतिषशास्त्रस्य सामूहिक फलानां वर्णनं विद्यते तस्य ग्रन्थस्य संहिता ग्रन्थमिति संज्ञा । यथा दिग्दाहः, भूकम्पः, परिवेषः इत्यादयः ।

## १.४.३) होराः –

होरा शास्त्रं नाम फलितभागः । यस्मिन् ग्रन्थे व्यक्तिगत फलानां निरुपणं भवति तस्य ग्रन्थस्य होरा ग्रन्थमिति संज्ञा । यस्मिन् विविध योगानां वर्णनं व्यक्तिगत शुभाशुभ फलानां सम्यक् निरुपणं कृतमस्ति ।

## १.५ बोधप्रश्नाः

१) ज्योतिषशास्त्रस्य कति विभागाः सन्ति ?

२) सिद्धान्त ग्रन्थस्य का संज्ञा ? एवं तत्र वर्णिताःविषयाः के ?

३) संहिताग्रन्थस्य का संज्ञा ? एवं तत्र वणिताः विषयाःके ?

४) होरा ग्रन्थस्य का संज्ञा ? एवं तत्र वर्णिताः विषयाःके ?

## १.६ ज्योतिषशास्त्रस्य प्रवर्तकानां नामानि:

प्रिय अध्येतारः! वेदः कश्चिदपि एकस्य शास्त्रस्य ग्रन्थःनास्ति । अतः कस्यचिदपि शास्त्रस्य विस्तृतं वर्णनं तत्र नोपलभ्यते । किन्तु प्रसङ्गानुसारं विभिन्न शास्त्राणां वर्ण्णनं विभिन्नेषु स्थलेषु आगछन्ति । ज्योतिषशास्त्रं वेदाङ्गम् । अतःअस्य वर्णनं स्वाभाविकमेव । अस्मिन् प्रकारेण अस्य शास्त्रस्य –मूलविन्दुःवेदः एव । पुनः समयस्य स्रोते शास्त्रस्यास्य अष्टादश प्रवर्त्तकाः अभवन् । ते भवन्ति १) सूर्यः २) पितामहः ३) व्यासः ४)वशिष्ठः ५)अत्रिः ६) पराशरः ७) कस्यपः ८)

नारदः ९) गर्गः१०) मरीचिः ११) मनुः१२) अङ्गिरा १३) लोमशः १४) पौलिशः १५) च्यवन १६)यवनः १७)भृगुः१८)शौनकः एते सर्वे प्रवर्तकाःचराचरस्य शुभाशुभ फलानि स्व स्व अमूल्य ग्रन्थेषु मानव कल्याणाय ग्रथितानि सन्ति । अस्माकं भारतीयसंस्कृतौ कस्यचिदपि कार्यस्य निर्विघ्नेन परिसमाप्तये कार्यकर्त्ता स्वाभीष्ट देवं पूजयति । तं नियमं परिपालयन् ग्रन्थकर्त्ता शिष्टाचारत्वेन ग्रन्थस्य निर्विघ्न परिसमाप्तये मङ्गलं आचरति ग्रन्थस्य प्रारम्भावसरे । मङ्गलाचरणं त्रि प्रकारं भवति । प्रथमं आशिर्वादात्मकं,द्वितीयं नमस्कारात्मकं ,तृतीयं वस्तुनिर्देशात्मकञ्च । इत्यत्र दैवज्ञःवैद्यनाथःग्रन्थस्य प्रारम्भावसरे स्वाभीष्टदेवं सूर्यनमस्कृत्य ग्रन्थारम्भं करोति ।

## १.७ बोधप्रश्नाः

१) वेदःकीदृश प्रकारकः ग्रन्थः ?

२) कस्य शास्त्रस्य वेदाङ्गत्वं उक्तम् ?

३) ज्योतिषशास्त्रस्य मूलविन्दुः कस्मात् गृहीतः ?

४) ज्योतिषशास्त्रस्य कति प्रवर्त्तकाः मूलरूपेण सन्ति ?

५) ज्योतिषशास्त्रस्य आदिप्रवर्त्तकः कः ?

## १.८ राशेःपरिभाषा,नामान्तराणि नक्षत्रेषु राशिस्थापन प्रकारः

जिज्ञासवः ज्योतिषशास्त्रस्य प्रारम्भिक तत्त्वानां विचारात् परं वयं क्रमशः शास्त्रानुशीलनं कुर्मः । तत्र प्रथमोऽध्यायःराशिशीलस्य । तत्र प्रकरणेऽस्मिन् राशेःविविध संज्ञानां विचारःविचार्यते । अतःविषयस्यारम्भे सर्वादौ राशि शब्दस्य ज्योतिषशास्त्रीय परिभाषा वर्णनात् परं अग्रेसरामः। नक्षत्राणां समूहः राशिः । राशिशव्दस्य सामान्य वोधगम्यः अर्थः भवति समूहः। कतिपय वस्तोः समूहः राशिः । आकाश मण्डले नक्षत्राणां समूहःविभिन्नाकारेण ऋषयः दृष्टवन्तः (मेष वृषादयः.....)। अतःअकाशे परिदृश्यमानानां असंख्य ताराणां समूहेषु मुख्या

कृतयःएव आचार्यैः –स्वीकृताः।ज्योतिषे प्रतिपादिता राशिसंख्या द्वादशः। तत्र द्वादश राशीनां नामानि भवन्ति । ते यथा–मेष,वृष,मिथुन,कर्कट, सिंह,कन्या, तुला,वृश्चिक,धनु,मकर,कुन्भ, मीनादयः ।

## १.८.१ राशेः नामान्तराणि

एतत् स्मारणार्थं इमाम् सारणीं पश्यन्तु । मेषादि द्वादशराशीनां नामान्तराण्यपि शास्त्रे व्यवहारं भवन्ति । अतः छात्राः राशीनां नामान्तराणां चर्च्चां कुर्मः ।

१) मेषः– अजः,विश्वः,क्रियः,तुम्बुरः,आद्यः एते मेषस्य पर्यायाः

२) वृषः – उक्षः, गौ , तावुरुः, गोकुलः च एते वृषस्य पर्यायाः ।

३) मिथुनः –द्वन्द्वं,नृयुग्मं,जुतुमं,यमं,युगं,तृतीयं,मिथुनस्य पर्यायाः।

४) कर्कटः– कुलीरः,कर्काटकः,कक्कर्टादयः, कर्कस्य पर्यायाः ।

५) संहः– कण्ठीरवः,मृगेन्द्रः,लेयः,इत्यते सिंहराशेः पर्यायाः।

६) कन्या – पाथोनः,रमणी , तरुणी , इत्यादि कन्याराशेः पर्यायः ।

७) तुला – तैली ,वणिक् , जुकः,घटः इत्यादि तुलाराशेः पर्यायाः ।

८) वृश्चिकः–अलिः, अष्टमं,कौर्पि , कीटः,च एते वृश्चिकःराशेः पर्यायाः।

९) धनुः–धन्वी,चापं,शराशनं एते धनु राशेः पर्यायाः

१०) मकरः– मृगः, मृगास्यः,नक्रः,एते मकर राशेः पर्यायाः।

११) कुम्भः – घटः,तोयघरश्चैते कुम्भ राशेःपर्यायाः

१२) मीन –अन्त्यः,मत्स्यः,पृथुरोमः,झषः,एते मीनराशेः पर्यायाः ।

तर्हि छात्राः अस्माभिः पूर्वं आलोचितवन्तः यत् नक्षत्राणां समूहः राशिः इति । वहुषु नक्षत्रेषु विभाग वशात् सप्तविंशतिनक्षत्राणां विभागः सम्पूर्णे राशिचक्रे वर्त्तते । सामान्यतया विचारयामः तदा प्रत्येकस्य नक्षत्रस्य चत्वारि चरणानि भवन्ति । परन्तु प्रत्येकराशिः नवचरणयुक्ताः भवन्ति । अर्थात् अश्विनी नक्षत्रस्य चत्वारि

चरणानि, भरणी नक्षत्रस्य चत्वारि चरणानि कृतिकानक्षत्रस्य एकचरणम् आकल्य नवचरणानि मेषराशेः प्रमाणम् । विषयेऽस्मिन् लब्धज्ञानस्य दृढीकरणाय रेखाचित्रं अपि अग्रे प्रदर्श्यते ।

## १.८.२ सप्तविंशति नक्षत्रेषु राशिस्थापन प्रकारः

अश्विनी   भरणी   कृतिका   रोहिणी   मृगशिरा   आर्द्रा

१ २ ३ ४   १ २ ३ ४   १ – २ ३ ४   १ २ ३ ४   १ २ – ३ ४   १ २ ३ ४

मेषः   वृषः   मिथुनः

पुनर्बसु   पुष्य   श्लेषा   मघा   पुर्वाफाल्गुनी   उफा.

१ २ ३ – ४   १ २ ३ ४   १ २ ३ ४   १ २ ३ ४   १ २ ३ ४ १

कर्कः   सिंहः

उत्तराफाल्गुनी   हस्ता   चित्रा   स्वाती   विशाखा   अनुराधा

२ ३ ४   १ २ ३ ४   १ २ – ३ ४   १ २ ३ ४   १ २ ३ – ४ १ २ ३ ४

कन्या   तुला   वृश्चिकः

ज्येष्ठा   मूला   पूर्वाषाढा   उत्तराषाढा   श्रवणा   धनिष्ठा


१ २ ३ ४   १ २ ३ ४   १ २ ३ ४   १ – २ ३ ४   १ २ ३ ४ १ २ – ३ ४

धनुः   मकरः

शतभिषा   पूर्वभाद्रपद   उत्तरभाद्रपद   रेवती

१ २ ३ ४   १ २ ३ – ४   १ २ ३ ४   १ २ ३ ४

कुम्भः   मीनः




## १.९ बोधप्रश्ना:

*१)ज्योतिषशास्त्रे कति राशयः सन्ति ?*

*२) द्वादशराशिषु आद्य,अन्तिम राशिद्वयं लिख ।*

*३)तावुरुः कस्य राशेः नामान्तरम् ?*

*४)सिंहराशेः नामान्तराणि कानि ?*

*५)नक्षत्राणां संख्या का ?*

*६)अश्विनी नक्षत्रं कस्मिन् राशौ आगच्छति ?*


*७)नक्षत्रक्रमेषु आर्द्रा नक्षत्रस्य क्रमः कः ?*

## १.१० कालरूपी पुरुषे राशिस्थापन प्रकार;

*प्रियशिक्षार्थिनः ! अद्यावधिःअस्माभिः ज्ञातं यत् राशिचक्रे नक्षत्राणां स्थिति विषये । अधुना वयं काल नाम समयरुपी आत्मा यस्मिन् शरीर वर्तते तस्य काल़पुरुषःइति संज्ञा । तर्हि कालाङ्ग विशेषेषु द्वादशराशीना स्थापनप्रकारान् आलोचयामः।कालपुरुषस्यशिरःमेषराशिःमुखप्रदेशः–वृषराशिः वक्षप्रदेशः वाहुप्रदेश, वक्षप्रदेशःवाहुप्रदेशःच–मिथुनराशिः हृदयः– कर्कटः उदरः – सिंहः, कटिभाग–कन्या ,वस्ति (नाभिलिङ्गयोमध्यभागः)भाग– तुला,गुह्यः(लिंग स्थानं*

–वृश्चिकः, उरु –धनुराशिः, जानुयुगलं– मकरराशिः, जङ्घ– कुम्भः, मीनः– चरणयुगलम् ।

विषयास्यास्य सम्यक् अववोधनार्थं चित्रमेकं उपस्थाप्यते येन कालनरस्य विभिन्नेषु अङ्गेषु राशि ज्ञान प्रकारःमानसस्तरे दृढीभूतःस्यात् इति ।



अस्य प्रमुख प्रयोजनं भवति जन्मकाले प्रश्न काले वा गोचर राशिःयादि पापाक्रान्तः भवति तदानीं तत्सम्बन्धित राशेःअङ्गेषु पीडा । शुभग्रह संसर्गे अङ्गाःपुष्टाःभवन्ति । इति विशेष वचनम् ।

## १.११ बोधप्रश्नाः

१)कालपुरुषःइत्यस्य कोऽर्थः ?

२) कालाङ्गे मेषराशिः कस्य स्थानस्य कृते निर्धारितः ?

३)जङ्घस्थाने कः राशिः अधिपतित्वं करोति ?

४)कालाङ्गानि कदा पुष्टाः भवन्ति ?

५)पापग्रहाःकालाङ्गे किम् कुर्वन्ति ?

## १.१२मेषादि द्वादशराशीनां स्वरूपम्

प्रिय जिज्ञासवः! राशीनां कालाङ्गे अवस्थापनात् परं मीनादि द्वादश राशीनां स्वरुपं आलोचयामः । राशीनां स्वरुपज्ञानं यदि वयं न जानीमःतर्हि फलादेशे महान् क्लेशःस्यात् ।अतःशास्त्रोक्तनियमं अनुसरामः ।तद्यथा–

व्यत्यस्तोभयपुच्छमस्तकयुतौ मीनौ सकुम्भो नर–
स्तौलीचापधरस्तुरङ्ग जघनोनक्रो मृगास्यो भवेत् ।।

वीणाढ्यं संगदं नृयुग्म मबला नौस्था ससस्यानला
शेषाः स्वस्वगुणाभिधानसदृशाः सर्वे स्वदेशाश्रयाः।। (जा.पा १/९)

इदानीं द्वादशराशीनां स्वरुपविषये एकैकं विचारयामः। कृपया भवन्तःध्यानेन पठन्तु।

सर्वादौ मीनः– मीनौ नाम अन्योन्यं मुखपुच्छ सम्मिलितौ मीनयुगलौ।

कुम्भः– स्कन्धस्योपरिधारितकलसः कश्चित् पुरुषविशेषः।

तुला – तुलावान् पुरुषःइति।

धनुः– अश्वजघने धनुर्धारी कश्चित पुरुषविशेषः।

मकरः– मकरः मृगास्यः। अर्थात् शरीरं मकरस्य, मुखं मृगस्य।

मिथुनः– गदाधारी कश्चित् पुरुष,वीणाधारी काचित् स्त्री उभयोःमैथुनवत् स्वरुपम्।

कन्या – शस्यदहनाभ्यां युक्ता नौ संस्थिता प्लवगा कन्या,कन्या राशेः स्वरुपम्। शेषराशयः(मेष,वृष,कर्कट,सिंह,वृश्चिक)स्वनाम–सदृशाः आकृतयःदृग्गोचरीयाः भवन्ति। इति मीनादि राशीनां नाभसीय स्वरुपम्।

प्रिय अध्येतारः! राशेः स्वरुप ज्ञानात्परं राशीनां वर्णनमपि ग्रन्थान्तरेष उपलभ्यते। तस्मिन् विषये चर्च्चां कुर्मः। तत्तु मेषादि क्रमेण जानीमः।

सर्वादौ मेषस्य :– धातुकरं नाम यत्र धातवो भवन्ति

वृषस्य :– कृषिगोकुलकाननकानि नाम कृषि स्थानं, गोगोष्ठं, वनानि च सन्ति।

मिथुनस्य :– द्युतक्रियारतिबिहारमही अर्थात् द्युत नाम (जुआ)रतिःरहस्य क्रीडा (स्त्रीपुरुषयोः)विहरण भूमिः मिथुनराशेः स्थानम्।

कर्कटस्य :– वापितटाककुलिननि अर्थात् दीर्घाकारजलाशयः,पुलिनानि नाम तटप्रदेषाः कर्कटराशेः स्थानम्।

*सिंहस्य :– घनशैलगुहावनानि अर्थात् निविड पर्वतानांगुहाःनाम कन्दराणि, वनानि च पशुराजस्य स्थानानि ।*

*कन्यायाः :– स्त्रीपुरुषयोः रति (कामक्रीडा)स्थानं शिल्पस्थानानि कन्याराशेः स्थानम् ।*

*तुलायाः:– "सर्वार्थसारपुरपण्य महीः अर्थात् सम्पूर्ण धन पूर्णाभूमिःतुलाराशेः निवास स्थानम् ।*

*वृश्चिकस्य :–अश्मविषकीटबिलप्रदेशाः अर्थात पाषाण,गरल,कृमयस्तेषां विलप्रदेशाः नाम गर्तादि स्थानानि वृश्चिकराशेःस्थानानि ।*

*धनोः :– "वाजिरथवारणवासभूमिः अर्थात् घोटक, रथ ,हस्तिनःवास – भूमिः धनुराशेः स्थानानि ।*

*मकरस्य– सरिदम्वु वन प्रदेशाः–अर्थात् नदी जलानि मकरस्य पुर्वार्द्धः वजे उतरार्द्ध जले वनप्रदेशाःमकर राशिःनिवास स्थानानि।*

*कुम्भस्यः :–"तोयघटभाण्डगृहस्थलानि "अर्थात् जलं ,कलश ,पात्राणि एतानि स्थानानि कुम्भराशेःनिवासस्थानानि ।*

*मीनस्यः :– "मीनाधिवाससरिदम्बुधितोयराशिः अर्थात् मत्स्यानां–निवाशःहृदस्थानानि, नदी,समुद्र, तथा विभिन्न जलस्थितस्थानेषु ।*

*छात्राःराशीनां स्थानवर्णनप्रसङ्गस्य अयं हेतुः भवति यत् प्रश्नकुण्डलीषु यदि कुत्रचित् स्थानस्य चर्चा भवति तदा एतेषां एव मुख्य आवश्यकता । उदाहरणरूपेण चिन्तयामस्तदा – अपहृत द्रव्यमिदं कुत्र अस्ति ? विचारित – भावस्य यः राशिः, द्रव्यमिदं राशेःस्थानानुसारं तत्रैव विद्यते इति जानीमः।*

*मेषादि राशीनां अन्याऽपि संज्ञाः भवन्ति। तदधुना सारणी माध्यमेन निरुपणं भवति भवतां सौविध्यानुकुलम् –*

**१.१२.१ मेषादि राशीनां ह्रस्वादि-स्त्रीपुरुषसंज्ञा-दिशा-क्रूरसौम्यसंज्ञा**

**चरादिसंज्ञा बोधकं चक्रम् ।**

| राशि | मे | वृ | मि | क | सिं | क | तु | वृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **ह्रस्व,सम, दीर्घ,** | *ह्र* | *ह्र* | *सम* | *सम* | *दी* | *दी* | *दी* | *दी* | *सम* | *सम* | *ह्र* | *सम* |
| **स्त्री,पुरुष** | *पु* | *स्त्री* | *पु* | *स्त्री* | *पु* | *स्त्री* | *पु* | *स्त्री* | *पु* | *स्त्री* | *पु* | *स्त्री* |
| **दिशा** | *पू* | *द* | *प* | *उ* | *पू* | *द* | *प* | *उ* | *पू* | *द* | *प* | *उ* |
| **क्रूरसौम्य** | *क्रू* | *सौ* | *क्रू* | *सौ* | *क्रू* | *सौ* | *क्रू* | *सौ* | *क्रू* | *सौ* | *क्रू* | *सौ* |
| **चरादिसंज्ञा** | *च* | *स्थि* | *द्वि* | *च* | *स्थि* | *द्वि* | *च* | *स्थि* | *द्वि* | *च* | *स्थि* | *द्वि* |

## १.१२.२ राशीनां सलिलादि विचारः

*प्रिय जिज्ञासवः! मेषादि द्वादशराशीना बहुविध विभागेषु सलिलादि विभागाःअन्यतमाः । तर्हि के राशयः जलचराः, के राशयः जलाश्रयाः, के च स्थलचराः ? एतेषां ज्ञानं अस्माभिः अध्ययनीयम् । तर्हि मीन–वृश्चिक– कर्क तथा मकर –राशयःभूतलचराः ।*

## १.१२.३ राशीनां द्विपद चतुष्पदादिसंज्ञा

*अधुना मेषादि राशीनां चतुष्पदादि संज्ञा कथन पूर्वकं तेषां बलविचारःवयं आलोचयामः ।धनुराशेःउत्तरार्धः,सिंहः,वृषः,मकरस्य पूर्वार्धः तथा मेषःचतुष्पद संज्ञकाः। एवञ्च एते राशयःदशमभावे बलवन्ताःभवन्ति ।*

*कन्या,मिथुनः,कुम्भः,तुला,धनो,पूर्वार्धः नरराशयः भवन्ति । एते लग्न भावस्थे बलाढ्याः सन्ति । वृश्चिकः जलचर राशिः। सोऽपि सप्तमेभावे प्राप्तेसति बलवान् भवति ।*

**विशेष वचनम्** – *द्विपदराशिःकेन्द्रे प्राप्ते सति दिवसे बली भवति । चतुष्पद – राशिः केन्द्रे प्राप्तेसति रात्रौ बली भवति । समस्त जलचरराशयःकेन्द्रे प्राप्ते–सति सन्ध्यासमये द्वये बलिनः भवन्ति ।*

## १.१२.४ राशीनां धातुमूलजीव संज्ञा निरूपणम् ।

अधुना पाठकाः राशीनां धातुमूलजीवसंज्ञाःआलोचयामः–

तत्र मेष–कर्क–तुल–मकर –राशयःधातु संज्ञकाः । वृष– सिह–वृश्चिक–कुम्भ–राशयः मूलसंज्ञकाः । मिथुन– कन्य–धनु–मीन–राशयःजीव संज्ञकाः । तत्र धातु इत्यनेन, सुवर्णात् मृत्तिका पर्यन्तं , मूलमित्यनेन वृक्षात् तृण पर्यन्तं , जीवमित्यनेन प्राणिमात्रः। तथैव मेषादि क्रमेण विषम राशिः, समराशिः च विचार्यते । यथा मेषःविषमः, वृषःसमः,मिथुन विषमः इत्यादयः......... ।

## १.१२.५ मेषादीनां विप्रत्वादिवर्णानां निरूपणम्

यथा कर्मानुसारं समाजे विभाजनम् ,तथैव राशीनां अपि कर्मानुगुणं वर्गीकरणं कृताःआचार्यैः। इदानीं ब्राह्मणादि वर्णानां वर्गीकरणं यथा –

मीनालिवृषभा विप्राश्चापाजहरयोनृपाः ।
कुम्भयुम्भतुला वैश्याःशूद्राःस्त्रीमृगकर्कटाः।।(जा.पा.– १/२०)

पाठकाः ! विषयस्य सम्यक् ज्ञानं प्राप्तये कोष्ठकं प्रदीयते । कृपया ध्यानेन अवलोकयन्तु –

| ब्रा | क्ष | वै | शु | वर्णाः |
|---|---|---|---|---|
| १२मी. | १मे. | २वृ . | ३मि. | राशयः |
| ४क. | ५सिं. | ६क. | ७तु. | राशयः |
| ८वृ. | ९ध. | १०म. | ११कु. | राशयः |

## १.१२.६ राशीनां कालविशेषे अन्धत्वादि निरूपणम्

छात्राः ! सम्प्रति मेषादि द्वादश राशीनां कालविषये अन्धत्वादि निरुपणं ग्रन्थोक्त रीत्या विचारयामः। एतस्य मुख्य प्रयोजनं भवति यत् प्रश्नकुण्डली निर्माण तथा विचार प्रसङ्गे । यतः ज्ञायते यत् अपहृत द्रव्यस्य स्थान – निरुपणं ,केन अपहृतः इत्यदि विषयाः। छात्राः ! अधुना मेषादीनां काल विशेषे अन्धत्वादि निरूपणं सामान्यरूपेण विचारयामः।

मेष –वृष–सिंहाः साक्षात् अर्धरात्रौ रात्र्यन्धाः भवन्ति ।कर्कट– मिथुन– कन्याः

दिनस्य मध्यभागे अन्धत्वं प्राप्नुवन्ति।तुलावृश्चिकौ पूर्वाह्णकाले वधिरौ भवतः। धनुमकरौ अपराह्णे वधिरौ भवतः। धनुमकरौ सन्ध्याकाले पङ्गु भवतः। कर्कट, वृश्चिक, मीनान्तभागाःअर्थात् नक्षत्रान्तभागाःगण्डान्तसंज्ञकाःभवन्ति । तदपि नाशसंज्ञकाः भवन्ति ।

## १.१२.७ द्वादश राशीनां वर्णाः

सम्प्रति मेषादीनां वर्णानामुपरि अलोचनां कुर्मः । यतोहि राश्यनुसारं मनुष्यस्य कृते कस्य वर्णस्यावश्यकता एतस्य विचारःनितरां अपेक्षते । राश्यनुकुलः वर्णःदैनन्दिनं प्रभावयति मानवजीवनम् । तद्यथा –

| राशयः | वर्णाः | राशयः | वर्णाः |
|---|---|---|---|
| मेषः – | अरुणवर्णः | वृषः – | गौरवर्णः |
| मिथुनः – | हरितवर्णः | कर्कटः– | रक्तवर्णः |
| सिहः – | श्वेतवर्णः | कन्या – | विचित्रवर्णः |
| तुला – | नीलवर्णः | वृश्चिकः– | सुवर्णवर्णः |
| धनुः – | पीतवर्णः | मकरः – | पीतश्वेतमिश्रितवर्णः |
| कुम्भः – | नकुलवर्णः | मीनः – | पाण्डुर (शुक्लवर्णः) |

मेषादीनां वर्ण निरुपणात् स्पष्टं भवति यत् कस्य जनस्य केन वर्णेन साकं सामञ्जस्यं भवति ,कः तस्य शुभवर्णः वर्णानुकुलं वस्त्रधारणं इत्यादि विविध विषयाःवर्णेन साकं सामञ्जस्यं भवति ।

## १.१३ बोधप्रश्नाः

१) जलचरराशयः के ?

२) नरराशयः के ?

३) द्विपदराशिः कुत्र स्थिते बलवान् भवति ?

४)धातुसंज्ञकराशयः के ?

५ )के राशयः ब्राह्मणवर्णाः ?

६ )वृश्चिकराशेः कीदृशः वर्णः ?

## १.१४ राश्याधिपतिः विचारः

शशिशीलस्य प्रमुख विन्दुःभवति राशेःअधिपतिविचारः ज्योतिषशास्त्रे प्रतिपादितेषु वहुविध तत्वेषु अन्यमतः। तदधुना विचारयामः।


धराजशक्रज्ञशशिनसौम्यसितारजीवार्कज मन्दजीवाः।
क्रमेण मेषादिषुराशिनाथस्तदंशपाश्चेति वदन्ति सन्तः ।।

| राशयः | अधिपतयः |
|---|---|
| मेषः,वृश्चिकः | भौमः |
| वृषः,तुला | शुक्र |
| कन्या,मिथुनः | बुधः |
| कर्कट, | चन्द्रमा |
| मीनः,धनुः | गुरुः |
| मकरः,कुम्भः | शनि |
| सिंहः | सूर्यः |

विषयस्यास्य सुस्पष्ट अवबोधनार्थं रेखा चित्राणि प्रदीयते ।

## १.१४.१ सूर्यादि ग्रहाणां त्रिकोणाःतथाउच्च नीच राशयः

श्रद्धेय छात्राः ! सूर्यादि ग्रहाणां त्रिकोणराशि वर्णनं अधुनाविचारयामः। सर्वादौ त्रिकोणमित्यनेन लग्नात् नवमं,पञ्चमं च स्थानं ज्ञायते । तत्र सामान्यतया विचारयामः यत् लग्नस्थानात् एकारेखा पञ्चमस्थानं प्रति कर्तव्या पुनश्च नवमस्थानं प्रति। तेषां तिसृणां रेखाणां मेलनं एकं समवाहु त्रिभुजं उत्पादयति। तदर्थं तस्य




स्थानस्य (पञ्चम, नवम )त्रिकोण मिति संज्ञा । ग्रहाणां के तावत् त्रिकोणराशयः भवन्ति तदधुना आलोचयामः ।

| **ग्रहाः** | **त्रिकोण राशयः** | **अंशाः** |
|---|---|---|
| सूर्यः | सिंह | १°–२०° |
| चन्द्रः | वृषः | ४°–३०° |
| भौमः | मेषः | १°–१२° |
| बुधः | कन्या | १६°–२०° |
| गुरुः | धनुः | १°–१०° |
| शुक्रः | तुला | १°–०५° |
| शनिः | कुम्भः | १°–२०° |

उपरि प्रतिपादिताः राशयःग्रहाणां मूलत्रिकोणराशयः भवन्ति । परन्तु तेऽपि राशय :सूर्यादि ग्रहाणां स्वगृहःउच्च नीच प्रविभागाःभवन्ति । यत्र कश्चित् नियमःसमन्वायार्थं कृतमस्ति ज्योतिर्विद्वांशैः । तदधुना विचारं कुर्मः । एकस्मिन् राशिःत्रिंशदंश प्रमितं भवति । तत्र त्रिशदंशेषु विभागाः । अर्थात् शून्यांशात् कश्चित् निर्दिटमंशं तस्य उच्चं स्यात् ततः तस्य ग्रहस्य स्वगृहमपि स्यात् । अस्य स्पष्टविचारः उपस्थापनात् पूर्वं सूर्यादि ग्रहाणां उच्चनीच वोधकं विचारं कुर्मः ।

*सूर्यस्य उच्चःमेषः, चन्द्रस्य वृषभ :, मङ्गलस्य मकरः,बुधस्य कन्या , गुरोःकर्कटः,शुक्रस्य मीनः,शनेः तुला । एतेषाम् निर्दिष्ट अंशाःसन्ति ते यथा मेषादि क्रमेण १०ं,३ं,२८ं,१५ं,५ं,२७ं,२०ं।*

*सम्यक् ज्ञानार्थं सावधानेन सारणीं पश्यन्तु।*

| ग्रहाः | सू | च | म | बु | बृ | शु | श |
|---|---|---|---|---|---|---|---|
| उच्चाशं | मेष$_{१०}$ | वृ३ | म$_{२८}$ | कन्या$_{१५}$ | क$_{५}$ | मी$_{२७}$ | तु$_{२०}$ |
| नीचाशं | तु$_{१०}$ | बृश्चि$_{३}$ | क$_{२८}$ | मीन$_{५}$ | मक$_{५}$ | कन्या$_{२७}$ | मे$_{२०}$ |

## १.१५ बोधप्रश्नाः

*१)सूर्यस्य उच्चराशिः कः ?*

*२)शनेः मूलत्रिकोणराशि कः ?*

*३)कस्मिन् अंशे गुरुः परमोच्चः ?*

*४)चन्द्रस्य परमनीचांशः कति ?*

२

*५)कन्या कस्य ग्रहस्य मूलत्रिकोण राशिः ?*

*प्रियछात्राः ! ग्रहाणांवलावल निरूपणायग्रहाणां दशवर्गजन्यवलं साधनं परमावश्यकं । तर्हि दशवर्गाःके सन्ति ? तेषां संज्ञा निरूपणं एवञ्च तेषां साधनप्रकारविषये वयं आलोचयामः।*

## १.१६.१प्रथमवर्गः –

*लग्नम् । नामान्तरेण गृहम् । गृहं नाम राश्याधिपति निरूपणम् । तत्र मेषवृश्चिकयोःभौमः इत्यादि क्रमेण ।*

## १.१६.२ द्वितीयवर्गः –

*होरा । राश्यर्धंहोरा । एकस्मिन् राशौ त्रिंश –दंशाःभवन्ति । तत्र विभागद्वयं करणे ०ं तः १५पर्यन्तम् । १६ं–३०ं पर्यन्तम् भवति समराशौ प्रथमहोरा चन्द्रस्य*

*। ततः १६॑–३०॑ पर्यन्तं द्वितीयहोरा सूर्यस्य । एवमेव विषमराशौ आद्याहोरा सूर्यस्य ततो चन्द्रस्य ।*

**होरा चक्रम्**

| अंश | मे | वृ | मि | क | सिं | क | तु | वृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १-१५ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ |

## १.१६.३ द्रेष्काणःतृतीय वर्गः–

*राशेः त्रिभागःद्रेष्काणः । अर्थात् ३०॑/३॒ १०॑ प्रथम खण्डस्य मानं ।द्वितीय खण्डस्य मानं ११॑–२०॑ । तृतीयखण्ड़स्य मानं २१॑–३०॑ । द्रेष्काणं विचारयित*

*सूत्रं –प्रथमपञ्चमनवपानाम् । अर्थात् ग्रहस्य राश्यंशमानं प्रथमे खण्डे पतति तदा निजराशिः एव द्रेष्काणः । द्वितीयखण्डे ग्रहस्य राश्यादिमानं स्यात् तदा ग्रहाधिष्ठित राशितः पञ्चमराशिः एव द्रेष्काणः । द्रेष्काणस्य तृतीय खण्डे राश्यादिमानं स्यात्तदा तस्मात् नवम राशिःएव द्रेष्काणःभवति ।*

**द्रेष्काण चक्रम्**

| अंशाः | राशयः | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| *१–१०* | *१* | *२* | *३* | *४* | *५* | *६* | *७* | *८* | *९* | *१०* | *११* | *१२* |
| *११–२०* | *५* | *६* | *७* | *८* | *९* | *१* | *११* | *१२* | *१* | *२* | *३* | *४* |
| *२१–३०* | *९* | *१०* | *११* | *१२* | *१* | *२* | *३* | *४* | *५* | *६* | *७* | *८* |

## १.१६.४ सप्तमांशः चतुर्थवर्गः –

*राशेःसप्तमोभागः सप्तमांशः । प्रतिखण्डं चत्वारःअंशाःसप्तदश कलाः अष्टौ विकलाः च भवन्ति ।*

*तत्र सप्तमांशस्य विचार क्रमः :–विषम राशौ नाम मेष ,मिथुन, सिंहादि राशिषु अभीष्ट राश्याधिपतितः यःसप्तमोखण्डः स एव सप्तमांशस्य अधिपतिः ।*

समराशौ नाम वृष,कर्क,कन्या ......राशिषु यः सप्तमःराशिःसप्तमांश खण्डवशात् । स एव सप्तमांशः समराशौ ।

उदाहरणम्ः– लग्नराश्यादि ६/१९/२९/३८। अत्र लग्नं विषमराशौ तुलायामस्ति ।१९ं/२९ सप्तमांशस्य पञ्चमे खण्डे पतति । अतःतुलातःपञ्चमः कुम्भः। तर्हिःसप्तमांशेषः शनिः ।

पुनः चन्द्रराश्यादिः १/०/२६/४७ । अत्र चन्द्रमा वृषराशौ समराशौ च अस्ति । सप्तमांशस्य प्रथमखण्डमानं –४ं/१७। तर्हि अस्माकं चन्द्रराशि वृषस्य–०ं/२६ । तर्हि विचारक्रमः– युग्मे अभीष्टराशितः सप्तमःवृश्चिकः । यतोहि

चन्द्रराश्यादि सप्तमांशस्य प्रथमेखण्डे वर्तते । अतःवृश्चिकःसप्तमांशे नाम तस्याधिपतिःमङ्गलस्य सप्तमांशे इति वक्तुं शक्यते ।

## सप्तमांशःचक्र

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ४–१७ | १ | ८ | ३ | १० | ५ | १२ | ७ | २ | ९ | ४ | ११ | ६ |
| | मं. | मं. | बु. | श. | र. | बृ | शु. | शु. | बृ. | चं | श. | वु |
| ८–३४ | २ | ९ | ४ | ११ | ६ | १ | ८ | ३ | १० | ५ | १२ | ७ |
| | शु. | बृ. | चं. | श. | बु. | मं. | मं. | बु. | श. | रा. | बृ | शु |
| १२–५१ | ३ | १० | ५ | १२ | ७ | २ | ९ | ४ | ११ | ६ | १ | ८ |
| | बु. | श. | र. | बृ. | शु | शु. | बृ | च. | श | बु. | मं. | मं. |
| १७–०९ | ४ | ११ | ६ | १ | ८ | ३ | १० | ५ | १२ | ७ | २ | ९ |
| | चं. | श. | बु. | मं. | मं. | बु | श. | र. | बु. | शु. | शु. | बृ. |
| २१–२६ | ५ | १२ | ७ | २ | ९ | ४ | ११ | ६ | १ | ८ | ३ | १० |
| | र. | बृ | शु | शु | बृ | च. | श. | बु | मं | मं | बु. | श. |
| २५–४३ | ६ | १ | ८ | ३ | १० | ५ | १२ | ७ | २ | ९ | ४ | ११ |

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | बु. | मं. | मं. | बु. | श. | सू | बृ | शु | शु | बृ. | च. | श. |
| ३०–०० | ७ | २ | ९ | ४ | ११ | ६ | १ | ८ | ३ | १० | ५ | १२ |
| | शु | शु | बृ. | चं | श | बु. | म. | मं. | बु. | श | सू | बृ |

## १.१६.५ नवमांशः पञ्चमवर्गः

१ राशि ३०° । नवमोभागः ३०/९ ३°/२० । प्रथम खण्डस्यमानं, एवं नवखण्डानि भवन्ति ।तत्र नवांशविचारक्रमःयथा –अज, मकर, तुला,कुलिरादि क्रमेण । नवांश विचारार्थं सुगमरितिः अनुसरामः ।

| **अज** | **मकर** | **तुला** | **कर्कट** |
|---|---|---|---|
| १मे. | २बृ. | ३मी. | ४क. |
| ५मिः. | ६कः. | ७तु. | ८बृ. |
| ९ध. | १०म. | ११कु. | १२मी. |

उदाहरणरुपेण – यदिग्रहःमेष,सिंह,धनु राशिषु यत्रकुत्रापि स्यात्तदा नवांशगणना मेषात् कर्तव्यः । वृष,कन्या,मकर राशिषु स्थितः ग्रहःनवांश विचारे मकरात् कर्तव्यम् एवमेव अन्येषां राशीनां विचार कर्तव्यः ।

यथा लग्नराश्यादि –५/१५°/२०/२५ वर्तते । लग्नस्य नवांश विचारःकुर्मः । लग्न कन्याराशेःपञ्चम खण्डे वर्तते । अतःकन्या राशि स्थितःत्वात् सूत्रानुसारं मकरात् पञ्चमखण्डं गणयेम । मकरात् पञ्चमःवृषः । अतःलग्न नवांश बुधस्य राशौ एव तिष्ठति नवांशाधिपतिः शुक्रः ।

नवांश विचार प्रसङ्गे वर्गोत्तम नवांशस्य चर्चा आचार्यैः कृतम् ।

तर्हि वर्गोत्तम नवांशस्य किं तावत् स्वरुपम् ?

वर्गोत्तम नवाशस्य विचारः चरस्थिर द्रिस्वभाव राश्यानुसारं भवति। तत्र चर राशौ (मेष,कर्क,तुला,मकर)। प्रथमनवांश नाम– ३ं/२० एव वर्गोत्तम सञ्ज्ञकः। स्थिरराशौ (वृष,सिंह,वृश्चिक,कुम्भ) मध्यनवांशः नाम१३ं/२० तः१६ं/४० एव वर्गोत्तम संज्ञकः। द्रिस्वभावे (मिथुन,कन्या,धनु,मीन)राशौ अन्तिमनवांशः नाम २६ं/४० तः३०ं/०० वर्गोत्तम संज्ञकः। छात्राः वर्गोत्तम नवांशस्य विचारः आचार्यैः एतदर्थं कृतं येन अस्मिन् नवांशे स्थिताः ग्रहाः शुभफलप्रदाः भवन्ति। एतद् बिषयं सुपरीक्षितम् इति।

## १.१६.६ दशमांशः षष्ठवर्गः–

राशेःदशमोभागःदशमांशः। तर्हि ३०/१०् ३ं इति प्रथमदशांशस्य मानम्। एवमेव दश दशमांश खण्डाः भवन्ति। तत्र दशमांशस्य विचारःकथं भवतीति विचारयामः। दशमांश विचारःविषमसम क्रमेण भवति। तत्र ग्रहः यदि विषमराशौ स्यात्तदा तस्मात् राशितः दशमांशस्य खण्डं गण्यते। तदा विषमराशौ दशांशस्य विचारः भवति। एवमेव समराशौ विचारं कुर्मस्तदा अभीष्ट राशितः नवमराशिः एव दशांशः। अर्थात् कश्चित् ग्रहः यदि वृषराशेः पञ्चमखण्डे वर्त्तते। तस्य दशांश विचारः वयं कुर्मः। तर्हि वृषराशितःनवमः मकर ः। परन्तु अस्माकं विचारितखण्डःपञ्चमः,तर्हि मकरात् पञ्चमखण्डे स्थितग्रहस्य दशांशःवृषराशौ एव पतति। इति दशांश विचारः।

## १.१६.७ द्वादशांशः सप्तमोवर्ग :–

राशोःद्वादशतमो भागाः द्वादशांशाः १ राशिः३०ं। अतः३०ं/१२् २ं/३० द्वादशांस्य प्रथमखण्डस्य मानम्। एवमेव २ं/३० क्रमशः संयोगं कृते सति द्वादशांशस्य द्वादशखण्डाः भवन्ति। विचारक्रमः यथा – स्वगृहात्

द्वादशतमोभागाः। उदाहरणं यथा सूर्यः ५/१०॑/१५"/२०ह्न। सूर्यः कन्याराशौ दशमेअंशे पञ्चदशकलायां अर्थात् द्वादशांशस्य पञ्चमे खण्डे नाम मकरराशौ शनैश्चरस्य द्वादशांशे वर्त्तते इति ।

## १.१६.८षोडशांशः अष्टमवर्गः

राशेः षोडशतमो भागः षोडशांशः । एकस्मिन् राशौ षोडशः षोडशांशकाः भवन्ति । अतः ३०/१६ृ१॑/५२"/३२ह्न प्रथम खण्डस्यमानम् ।एवमेव प्रथमखण्डे प्रथमखण्डस्य मानं योज्यते । अस्य विचारक्रमः यथा चरराशौ (मेष,कर्क,तलु,मकर)ग्रहः स्यात्तदा षोडशांशविचारःमेषात् कर्तव्यः। स्थिरराशौ (वृष ,वृश्चिक ,सिंह ,कुम्भ )षोड़शांशविचारःअभीष्टमस्ति तदा सिंहराशितः गणना कर्त्तव्या ।द्विस्वभावस्थे (मिथुन ,कन्या, धनु ,मीन )ग्रहे षोडशांशगणना धनुराशितः कर्त्तव्या । उक्तं च –"**चरे मेषात् स्थिरे सिंहाद् द्विस्वभावे तु चापभात्** " ।

## १.१६.९ त्रिंशांशः नवमवर्गः–

यथा राशेःत्रिभागो द्रेष्काणः,नवभागः नवमांशः,तथैव राशेः त्रिंशत्तमो भागः त्रिंशांशः न । तर्हि त्रिंशांशस्य काचित् भिन्नारीति शास्त्रकारैः प्रतिपादितम् । प्रत्येकराशेःपञ्चत्रिंशाशाः भवन्ति । तेषामधिपतयः –कुज,शनि,गुरु,बुध ,शुक्रादयः । त्रिंशांशविचारः विषम सम क्रमेण भवति । त्रिंशांशज्ञानाय चक्रम् –

| | खण्ड–१ | खण्ड–२ | खण्ड–३ | खण्ड–४ | खण्ड–५ |
|---|---|---|---|---|---|
| विषमराशौ– | कु. | श. | बृ. | बु. | शु |
| अंशाः– | ५ | ५ | ८ | ७ | ५ |
| | ०॑–५॑ | ६॑–१०॑ | ११॑–१८॑ | १९॑–२५॑ | २६॑–३०॑ |

| समराशौ– म. | श. | ग. | बु | शु. |
|---|---|---|---|---|
| अंशाः– ५ | ७ | ८ | ५ | ५ |
| ०ं–५ं | ६ं–१२ं | १३ं–२०ं | २१ं–२५ं | २६ं–३० |

उदाहरणं – यदि कोऽपि ग्रहः मेषराशौ त्रिंशांश सारण्यां पञ्चमे खण्डे स्यात्तदा तस्य त्रिंशांशाधिपतिः शुक्रः । एवमेव अन्येषां राशीनां वोध्यम् ।

## १.१६.१० षष्ट्यंशः दशमवर्गः

राशेःषष्टिमिताभागःषष्ट्यंशः। अर्थात् ३०ं/६०=००/३०" प्रत्येक खण्डस्य मानम् । प्रथमखण्डे प्रथमखण्डस्यमानं योज्यते तदा द्वितीयखण्डं आगच्छति । एवमेव षष्ट्यंशानां ज्ञानं कर्त्तव्यम् ।

षष्ट्यंश विचारक्रमः–षष्ट्यंशाधिपाः विषमराशौ घोरांशात् प्रारम्भं कृत्वा इन्दुरेखा पर्यन्तम् । समराशौ एतद्विपरीतेन । अर्थात् इन्दुरेखातः घोरांश पर्यन्तम् । शुभाशुभ षष्ट्यंशाधिपाःस्व नामानुसारं एव ज्ञातव्यम् । स्पष्ट अववोधनार्थं सारणीं उपस्थाप्यते ।

प्रिय अध्येतारः! मनसि अधुना प्रश्नाःभवन्ति यत् दशवर्ग विचारस्य का वा आश्यकता । एतस्य प्रश्नस्य समाधार्थमुच्यते । जातकपत्रे यदि वर्गद्वयं समानं ,वर्गत्रयं समानं वा स्यात् एतस्यफलं जातकस्योपरि परिदृश्यमानः भवति । तर्हि तस्य विचारार्थं सारणीं प्रस्तूयते ।

| वर्गैक्यं | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
|---|---|---|---|---|---|---|---|---|---|
| योगाः | पारियात | उत्तम | गोपुर | सिंहासी | पारपत | देवलोक | ब्रह्मलोक | शक्रवाहन | श्रीधाम |

तत्र केचन आचार्याः वदन्ति दशवर्गाणां योगः श्रीधामःन भूत्वा दिग्वर्गैक्ये वैशेषिकःइति वदन्ति एवञ्च विविध वर्गेषु षड्वर्गस्य चर्च्चा अन्यतमा। तत्र विभिन्नेषु शुभकर्मेषु षड्वर्गविचारःभवति। षड्वर्गे सप्तमांशस्य विचारःयदि क्रियते तदा

| बिषमेषं | विषमे अं।क. | शुभ वा अशुभ | अंशपतिः | समे अं।क. | समेसं | विषमेसं | विसमे | अं।क. | शुभाशुभ | अंशपतिः समे | अं।क. | समेसं |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | ०/३० | अ.. | घोर | ३०/० | | ६० | ३१ | १५/३० | अ | मृत्यु | १५/० | ३० |
| २ | १/० | अ. | राक्षस | २९/३० | ५१ | ३२ | १६/० | | अ. | काळ | १४/३० | २९ |
| ३ | १/३० | शु | देब | २६/० | | ५८ | ३३ | १६/३० | अ | दाबामि | ०/१४ | २८ |
| ४ | २/० | शू | कुबेर | २८/३० | ५७ | ३४ | १७/० | | अ | घोर | १३/३० | २७ |
| ५ | २/३० | अ | यक्ष | २८/० | | ५६ | ३५ | १७/३० | अ | अधम | १३/० | २६ |
| ६ | ३/० | शू | किर्न्नर | २७/३० | ५७ | ३४ | १७/० | | अ | कण्टक | १२/३० | २५ |
| ७ | ३/३० | अ | भ्रष्ट | २७/० | | ५४ | ३७ | १८/३० | शु | सुधा | १२/० | २४ |
| ८ | ४/० | अ | कुलघ्न | २६/३० | ५३ | ३८ | १९/० | | शु | अमृत | ११/३० | २३ |
| ९ | ४/३० | अ | गरळ | २६/० | | ५२ | ३९ | १९/३० | शु | पुब्र चन्द्र | ११/० | २२ |
| १० | ५/० | अ | अग्नि | २५/३० | ५१ | ४० | २०/० | | अ | विषदग्ध | १०/३० | २१ |
| ११ | ५/३० | शु | माया | २५/० | | ५० | ४१ | २०/३० | अ | कुलनाश | १०/० | २० |
| १२ | ६/० | अ | यम | २४/३० | ४९ | ४२ | २१/० | | शु | मुक्ष्य | ९/३० | १९ |
| १३ | ६/३० | शु | अपांपति | २४/० | ४८ | ४३ | २१/३० | | अ | अंशक्षय | ९/० | १८ |
| १४ | ७/० | शु | इन्द्र | २३/३० | ४७ | ४४ | २२/० | | अ | उत्पात | ८/३० | १७ |
| १५ | ७/३० | शु | कला | २३/० | | ४६ | ४५ | २२/३० | अ | कालरुप | ८/० | १६ |
| १६ | ८/० | अ | सर्प | २/३० | ४५ | ४६ | | २३/० | शु | सौम्य | ७/३० | १५ |
| १७ | ८/३० | शु | अमृत | २२/० | | ४४ | ४७ | २३/३० | शु | मृदु | ७/० | १४ |
| १८ | ९/० | शु | चन्द्र | २१/३० | ४३ | ४८ | २४/० | | शु | सुशितल | ६/३० | १३ |
| १९ | ९/३० | शु | मृदु | २१/० | | ४२ | ४९ | २४/३० | अ | दंष्ट्राकराल | ६/० | १२ |
| २० | १०/० | शु | कोमळ | २०/३० | ४१ | ५० | २५/० | | शु | इन्दुमुख | ५/३० | ११ |
| २१ | १०/३० | शु | पद्म | २०/० | | ४० | ५१ | २५/३० | शु | प्रबीण | ५/० | १० |
| २२ | ११/० | शु | बिष्णु | १९/३० | ३९ | ५२ | २६/० | | अ | काळाग्नि | ४/३० | ९ |
| २३ | ११/३० | शु | बागिष | १९/० | | ३८ | ५३ | २६/३० | अ | दण्डाायुध | ४/० | ८ |
| २४ | १२/० | अ | दिगम्बर | १८/३० | ३७ | ५४ | २७/० | | शु | निर्मल | ३/३० | ७ |
| २५ | १२/३० | शु | देव | १८/० | | ३६ | ५५ | २७/३० | शु | शुभ | ३/० | ६ |
| २६ | १३/० | शु | आद्र | १७/३० | ३५ | ५६ | २८/० | | अ | अशुभ | २/३० | ५ |
| २७ | १३/३० | शु | कलिनाश | १७/० | ३४ | ५७ | २८/३० | शु | अतिशीतं | | २/० | ४ |
| २८ | १४/० | शु | क्षितिश | १६/३० | ३३ | ५८ | २९/० | | शु | सुधादयो | १/३० | ३ |
| २९ | १४/३० | शु | मळाकर | १६/० | ३२ | ५९ | २९/३० | अ | भ्रमण | | १/० | २ |
| ३० | १५/० | अ | मन्दात्मज | १५/३० | ३१ | ६० | ३०/० | | शु | इन्दुरेखा | ०/३० | १ |

सप्तवर्गजन्यं फल जातकायमिलति इति भावः।

## १.१७ बोधप्रश्नाः

१)द्रेष्काणस्य शब्दस्य कोऽर्थः ?

२)नवांशस्य परिभाषा का?

३)मेष राशौ नवांश विचारः कस्मात् भवति?

४)विषमराशौ आद्य त्रिंशांशः कस्य ?

५)दशवर्गे वर्गद्वयं समानं चेत् कःयोगः ?

## १.१८ तन्वादि द्वादशभावानां विचारः

प्रिय शिक्षार्थिनः ! ज्योतिषशास्त्रे द्वादशभावानां विचारः अतिमहत्वपूर्णः अस्ति। तर्हि मनसि प्रश्नं समुदेति यत् भावस्य का संज्ञा ? कति भावा सन्ति ? इत्यादयः। सर्वादौ भावस्य संज्ञां जानीमः – भावयति विचारयति विचारणीयान् विषयान् इति भावः। द्वितीयः प्रश्नः भवति – के भावा ?तेषां संज्ञाश्च । उत्तरं तु तन्वादि द्वादशभावाःसन्ति ज्योतिषशास्त्रे । तेषां नामानि १)तनु २)धन ३)सहज ४)सुहृत् ५)सूत ६)रिपु ७)जाया ८)मृत्यु९)धर्म १०)कर्म ११)आय १२)व्यय ।

एते प्रमुखाः भावाः सन्ति । परन्तु जातक फलविचारे सौविध्यार्थं तेषां भावानां विविध संज्ञान्तराणि आचार्यैः परिकल्पितानि सन्ति ते यथा :–

**Yाावनामानि** **संज्ञान्तराणि** (अन्यनामानि)

प्रथमभावः तनुः – कल्प,उदय,आद्य, तनु,जन्म,विलग्न तथा होरादयः।

द्वितीयभावःधनः – वाक्, अर्थः,भुक्ति ,नयन,स्व,तथा कुटुम्बाः ।

तृतीयभावः सहजः – दुश्चिक्य,विक्रम,सहोदर,वीर्य,धैर्य तथा कर्णाः ।

चतुर्थभावःसुहृत् –पाताल,बृद्धि,हिबुक,क्षिति,मातृ,विद्या,यान,गृह,सुख,वन्धु तथा चतुष्टयः।

पञ्चमभावःसूतः– धी,देव,राज,पितृ,नन्दन,तथा पञ्चकाः ।

*षष्ठभावःरिपुः – रोग,अङ्ग,शस्त्र,भय,तथा क्षत संज्ञकाः।*

*सप्तमभावः जाया – जामित्र,काम,गगन,कलत्र,सम्पत् ,द्युन,अस्त,तथा सप्तमाः।*

*अष्टमभावःमृत्युः– रन्ध्र,आयु,अष्ट,ऋण,मृत्यु,तथा विनाशादि संज्ञाः।*

*नवमभावःधर्मः – गुरु,शुभ,तप,नव, भाग्यादि संज्ञाः।*

*दशम भावः कर्मः – व्यापार,मषूरण,ज्ञान,राज,आस्पद तथा कर्मादि संज्ञाः*

*एकादश भावःआयः–एकादश,उपान्य,भव,आय तथा लाभ संज्ञाःएकादश भावस्य ।*

*द्वादशभावः व्ययः– रिक्त,व्यय,द्वादश,तथा,अन्य द्वादश भावस्य संज्ञा –न्तराणि ।*

## १.१९ केन्द्रादि विभागाः

*तन्वादि द्वादशभावानां संज्ञान्तराणां ज्ञानात्परं भावानां केन्दादि विभागाः विचारयामः। केन्द्राणि यथा – प्रथमभावः, चर्तुर्थभावः, सप्तमभावः केन्द्रस्य नामान्तराणि ।कण्टकः, केन्द्र,चतुष्टयः संज्ञाः।*

*पणकरभावः– द्वितीयभावः,पञ्चमभावः,अष्टमभावः,एकादश भावः च ।*

*अपोक्लिमभावाः– तृतीय,षष्ठ,नवम,द्वादशभावाः।*

*अष्टमं,चतुर्थं च, भावद्वयं चतुरस्त्र संज्ञं भवति ।*

*लग्नात् पञ्चमं,नवमं च स्थानं त्रिकोणसंज्ञं भवति ।*

*उपचस्य भावाः – तृतीय,षष्ठ,दशम,एकादश, स्थानानां उपचय भावमिति संज्ञा ।*

**भावस्य वलनिरुपण विषये उच्यते** *:– यदि अभीष्ट भावः स्व अधिपतिना दृष्टः युक्तो वा स्यात्,बुधेन,गुरुणा,शुक्रेण दृष्टयुक्तश्च स्यात् अन्यग्रहैः अदृष्टः स्यात्तदा भावः वलीयान् इति ।*

## १.१९.१ राशेः उदयमानं तथा शुभाशुभ अंशानां विचारः

छात्राः !अधुना राशीनां उदयमाननां उपरि विचारयामः। प्रसङ्गानुकुलं श्लोकं यथा–

जस्वा जिना विंशतिरष्टयुक्ता दराङ्गलोका वियदर्णवा ख्याः।
मेषादिमानं क्रमशो वदन्ति तुलादि षट् कस्यविलोमतस्ते।।

अर्थात् मेषस्य नखाः नाम विशतिः(२०) । वृषस्य जिन नाम चतुर्विंशतिः(२४)। मिथुनस्य विंशति अष्टयुक्ता नाम अष्टाविंशति भागाः(२८) । कर्कस्य रदां नाम द्वात्रिशत् (३२)। सिंहस्य अङ्गलोकाः अर्थात् षड्त्रिंशत् (३६) । कन्यायाः वियदर्णवाः अर्थात् चत्वारिंशत् (४०) । उदयमानानि एतानि मेषादितः कन्यान्तं पठितम् । ततः उत्क्रमेण तुलादितः मीनान्तं अवगन्तव्यम् ।

अस्य साधन प्रकारः अधुना निरूपयामः –

मे. मी . २७८–७५२०३ स्वल्पान्तरात् २००गृहीताःततः/०२०ं
वृ. कु. २९९–६०२३९ स्वल्पान्तरात् २४०गृहीताःततः/०२४ं
मि. म. ३२३–२५२९८ स्वल्पान्तरात् ३००गृहीताःततः/१०३०ं
क. ध. ३२३–२५३४८ स्वल्पान्तरात् ३४०गृहीताःततः/०३४ं
सि. वृ. २९९–६०३५९ स्वल्पान्तरात् ३६० गृहीताःततः/०३६ं
क. तु. २७८–७५३५३ स्वल्पान्तरात् ४००गृहीताःततः/०४०ं

स्तम्व (क)– क्रमेण तथा उत्क्रमेण राशीनां नामानि।

स्तम्व (ख)–लंकोदयमानम् ।२७८,२९९,३२३,२२३,२९९,२७८

स्तम्व (ग)– सार्धसप्ताङ्गुलपलभा देशीया ःचरखण्डाः।

स्तम्व (घ)–पलभा संशोधित फलम्।

स्तम्व (ङ)–मेषादि कन्यान्तं ततःउत्क्रमेण तुलादि मीनान्तं उदयमानानि ।

अधुना राशेः शुभाशुभःअंशानां विचारं भवतु । तत्र यस्य कस्यापि राशौ कश्चित् निर्दिष्टमंशः शुभत्वेन तथा कश्चित् निर्द्दिष्टमंशः अशुभत्वेन गण्यते। तेषां विवरणं भवतां सौविध्यार्थं सारण्यानुसारं प्रदीयते। तद्यथा–

| राशयः | मे | बृ | मि | क | सि | क | तु | वृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुभांशाः | २१ | १४ | १८ | ८ | १९ | ९ | २४ | ११ | २३ | १४ | १९ | ९ |
| अशुभांशाः | ८ | २५ | २२ | २२ | २१ | १९ | ४ | २३ | १८ | २० | २० | १० |

**तत्र विचारित विषयाः** – *यदा जन्मकाले चन्द्रमा उपरोक्त शुभाशुभ अंशेषु स्थितःभवति तस्य स्थिते जातकस्य कृते शुभाय अशुभाय च भवतीति बोध्यम्। अर्थात् निर्दिष्ट अशुभांश स्थितेषु चन्द्रमा तावत्संख्यामिते वर्षे जातकस्य मृत्युः आदेश्यमिति। शुभांशेषु स्थितेषु जातकाय अतिशुभप्रदः भवति।*

## १.२० बोधप्रश्नाः

*१) मेषस्य उदयमानं किम् ?*

*२) वृश्चिकस्य कति अंशाः अशुभाः ?*

*३) कस्य राशेः एकविंशांशःशुभांशत्वेन पठिताः ?*

*४) शुभांशेषु स्थितः चन्द्रःजातकाय कीदृशं फलं यच्छति ?*

## १.२१संक्षिप्तउत्तरमूलक प्रश्नाः

*१– ज्योतिषशास्त्रे कति विभागाः सन्ति ?*

*२– ज्योतिषशास्त्रस्य संज्ञा का ?*

*३– राशिः इत्यनेन किम ?*

*४ नक्षत्रशब्दस्य परिभाषा का ?*

*५– ज्योतिषशास्त्रे कति राशयः सन्ति ?*

*६– नक्षत्राणां संख्या का ?*

*७– राशिचक्रे प्रथम राशिः कः ?*

*८– भौमस्य गृहं निरुपयत ?*

९– क्रूरराशयः के ?

१०– स्थिरराशीनां नामानि लेख्यानि ?

११– द्विस्वभावसंज्ञकः राशयः के?

१२– पुरुषराशयः के?

१३– जलचर राशयः के?

१४– द्वादशराशिषु विप्रवर्णराशयः के?

१५– गण्डान्तराशयः के ?

१६– वृषराशेःकीदृशः वर्णः ?

१७– सूर्यस्य मूलत्रिकोण राशि कः ?

१८– शनेःमूलत्रिकोण राशिः कः ?

१९– सूर्यः कश्मिन् राशौ उच्चः,कियदंशे परमोच्चं च भवति ?

२०– षडवर्गे कतिवर्गाणां समाहारः ?

२१– नवांशस्य परिभाषा लेख्या ।

२२– होराविचारः कयोः ग्रहद्वयोयोः भवति ?

२३– ज्योतिषशास्त्रे कति भावाःसन्ति ?

२४– तृतीयभावस्य संज्ञान्तराणि लेख्यानि ?

२५– केन्द्रभावाः कति ?

२६– केन्द्रात् परभावस्य का संज्ञा ?

२७– उपचस्थानानि कानि ?

२८– षडवर्गेषु वर्गद्वयं समानं तदा कस्य योगस्य लक्षणम् ?

२९– सिंहासनयोगः कति वर्गाणां योगे भवति

३०– के तावत् पणफरभावाः ?

## १.२२नातिदीर्घ उत्तरमूलकप्रश्नाः।

१– ज्योतिषशास्त्रस्य त्रयाणां विभागानां वर्णन पुरःसरं अष्टादश प्रवर्त्तकानां नामानि निरूपय ?

२– मेषादिद्वादशराशीनां नामान्तराणि विलिख्य नक्षत्रेषु राशिस्थापन प्रकारःलेख्यः ।

३– राश्याधिपति विचारःसम्यक् निरुप्यताम् ।

४– उच्चनीचमूलत्रिकोणराशयःनिरुप्यताम् ।

५– नवांशसाधनविधिःनिरूप्यताम् ।

५– तन्वादि द्वादशभावानां निरूपणं कृत्वा द्वादशभावानां नामान्तराणि लेख्यानि ।

## १.२३दीर्घउत्तरमूलक प्रश्नाः

१– स्वकल्पित उदाहरणेन दशवर्ग साधनं निरूप्यताम् ।

२– कालपुरुषस्य अङ्गादिविभागाः सचित्रं सप्रयोजनं व्याख्या कार्याः ।

३– स्व कल्पित उदाहरणेन राशीनामुदयमानानि साध्यताम् ।

## १.२४ संक्षिप्तउत्तरमूलक प्रश्नानां उत्तराणि।

१) त्रयः२) सूर्यादि ज्योतिषपिण्डानां गतिं स्थितिं च अधारिकृत्य कृतं शास्त्रम् ३) नक्षत्राणां समूहः ४)न क्षरति न चलतीति ५)द्वादशः ६)सप्तविंशतिः ७)मेषः ८)मेषः,वृश्चिकः९)मे,मि,सिं,तु,ध,कु १०)वृष,वृश्चिक,सिंह,कुम्भ ११)मिथुन, कन्या, धनु, मीन १२)मे, मि, सिं, तु, ध, कु १३) कर्क, वृश्चिक, मकर, मीन १४) कर्क, वृश्चिक, मीन १५)कर्क, वृश्चिक, मीनान्तभागः १६)गौरः१७)सिंहः१८) कुम्भः१९) मेषस्य–१०° २०) षड् २१) राशेः नवमोभागः २२)सूर्यचन्द्रयोः २३)द्वादश २४) दुश्चिक्य, विक्रम, सहोदर

२ ५)चत्वारः २ ६)पणफरः २ ७) ३,६ १ ०,१ १ २ ८) पारिजात २ ९) पञ्चयोगानां समाने ३ ०) २,५,८,१ १

❖❖❖

# द्वितीयपाठ्यसूची

----------------------------------------------

**क्रं.सं.** **पृ.सं**

----------------------------------------------


२.१ प्रस्तावना:

२.२ प्रयोजनम्

२.३ ग्रहाणां आत्मादिविभागा

२.३.१ ग्रहाणां राजत्त्वनिरूपणम्

२.३.२ नवग्रहाणां नामान्तराणि

२.४ बोधप्रश्ना:

२.५ ग्रहाणउपग्रहा:,अधिदेवता:,वर्णा:,शुभा शुभता, तथा उदयादिविचार:

२.५.१ ग्रहवर्णा:

२.५.२ ग्रहाणां शुभाशुभत्वम्

२.५.३ ग्रहाणां उदयविचार:

२.५.४ ग्रहाणां अधिदेवता:

२.६ बोधप्रश्ना:

२.७ ग्रहाणां दीप्तादि अवस्था विचार:।

२.८बोधप्रश्ना:

२.९ ग्रहाणां प्रदेशा: तेषां जाति: एवं ग्रहकक्षाक्रम:

२.९.१ ग्रहाणां जाति निरूपणम्

२.९.२ ग्रहाणां नाभसीय कक्षाक्रम:

२.१०बोधप्रश्ना:

२.११ ग्रहाणां दृष्टि: तथा वलविचार:

२.१२बोधप्रश्ना:

२.१३ ग्रहाणां पञ्चधामैत्री विचारः

२.१४बोधप्रश्नाः

२.१५ द्वादशभावानांकारकाः, ग्रहस्वरूपतथं पीडाकरणप्रकारः

२.१५.१ ग्रहस्वरूपम्

२.१५.२ ग्रहाणां पीड़ाकरण प्रकारः

२.१६ बोधप्रश्नाः

२.१७ संक्षिप्तउत्तरमूलकप्रश्नाः

२.१८ नातिदीर्घउत्तरमूलकप्रश्नाः

२.१९दीर्घोत्तरमूलप्रश्नाः

२.२०संक्षिप्त प्रश्नानां उत्तराणि

❖❖❖

# द्वितीय पाठः

## २.१प्रस्तावना:

ग्रहाधीनं जगत्सर्वं ग्रहास्ते देवतांशकाः इति न्यायेन समग्रस्य भूमण्डलस्य आधिपत्यं कुर्वन्तःसन्तिःरव्यादि नवग्रहाः। सूर्यसिद्धान्तस्य आर्ष वचनानुसारं ब्रह्मणा सर्वाग्रसृष्टिः रव्यादि ग्रहाः । अतः स्व स्व नाभसीय प्रभाववशात् अस्मान् भूस्थान् जनान पीडयन्ति शुभावहं च भवन्ति । अस्माकं भारतीयदर्शनं तथा सम्पूर्ण ज्ञान कोश :वेदे निहितमस्ति । वेदस्य अनन्तज्ञानमयत्वं विद्यते । वेदे वर्णितविषयाः यागयज्ञादि । तत्र यज्ञस्य समय निर्द्धारणाय ज्योतिषशास्त्रस्य आवश्यकता वर्त्तते । समयनिर्द्धारणं , ज्योतिष– शास्त्रं त्यक्त्वा नान्या शास्त्रं समर्थाऽस्ति । आधारितेऽस्मिन् विषय संभागे रव्यादि ग्रहाणां स्वरूप गुणादि विचाराः सम्प्रस्तूयते । प्रकरणेऽस्मिन् प्रमुख विचारणीयाः बिन्दवःभवन्ति – आत्मादिविभागाः,ग्रहाणां नामान्तराणि , शुभाशुभत्वम् ,ग्रहाणां वर्णाः, अवस्थाः, सञ्चारदेशाः अधिदेवताः ,रत्नानि, जातयः, प्रदेशाः , कक्षाक्रमः, ग्रहाणांदृष्टिः,विविधवलानि ,ग्रहाणां पञ्चधामैत्री विचारः ,ग्रहाणां भावकारकत्वम् , अशुभ स्थाने स्थितिवशात् ग्रहाणां विफलता । एतेषां विषयाणां विचाराःसंभागेऽस्मिन् वर्णिता : सन्ति ।

## २.२प्रयोजनम्

राशेः अधिपतित्वं कुर्वन्ति रव्यादि ग्रहाः। तत्र प्रत्येकस्य विषयस्य पूर्वापर सम्बन्धार्थं राशिशीलाध्यायस्य परमेव ग्रहस्वरूपाध्यायस्य वर्णनम् । ग्रहाणां विविधावस्थानां बलानां अन्येषां तत्वानां ज्ञानाभावे कः ग्रहःकस्यचित् जनस्य कृते शुभफलदःअशुभफलतः तथा अतिशुभ फलदः वा भवतीति ज्ञातुं नैव शक्यते । परन्तु एतस्य ज्ञानस्याभावे न कोऽपि ज्यौतिषिकः शुभाशुभं वक्तुं समर्थः न स्यात् । अतः परमावश्यकस्यास्य ग्रहसन्दर्भित– बिषयस्य ज्ञानं नूनं

सर्वेषां जनानां कृते महत्त्वपूर्णः इति । यदि एतस्य पाठस्य ब्यवहारः सामान्योऽपि जनः प्रयोगमुखेनः कर्तुं शक्यते तदा जातकपत्रं दृष्ट्वा ग्रहाणां शुभाशुभानां विभिन्न विषयाणां अववोधः सः स्वयमेव कर्त्तुं शक्नुयात् । पाठस्य अतिविस्तृतित्वात् आवश्यकसन्दर्भानां विचारान् वयं चर्च्चयामः प्रस्तुतेऽस्मिन् पाठे । अस्यपाठस्य पठने केषां विषयणां सामान्यज्ञानं भविष्यतीतिविचारयामः।

१ )ग्रहाणां आत्मादिविभागाः तथा राजत्त्वनिरूपण प्रकारः तेषां नामान्तराणि, तेषा उपग्रहाणां ज्ञानं ग्रहाणां वर्णप्रकार च ।

२ )ग्रहाणां मित्रामित्र विचारात् पञ्चधामैत्रीविचारः।

३ )विविध दृष्टि सन्दर्भितवलम्।

४)उच्च नीच मूलत्रिकोणानां ज्ञानम् ।

५ )ग्रहाणां अधिदेवता कारक निर्णय ःइत्यादि लघुलघु विषयाः।

## २.३ ग्रहाणां आत्मादिविभागाः

प्रिय छात्राः ! अधुना प्रकृतमनुसरामः । सर्वप्रथमः विचारितविषयः भवति ग्रहाणां आत्मादिविभागाः । यथा शरीरे आत्मा शरीरस्य सर्वाङ्गं ,संचालयति तथैव ग्रहजगतेषु त्रैलोक्यदीपः रविः सर्वापेक्षया अधिक किरणत्वात् सौरजगतस्य आत्मारुपेण गण्यते । अतः कालरूपी पुरुषस्य आत्मा रविः। मनसः अधिपतित्वं करोति चन्द्रमा । वलस्याधिपतित्वं करोति भौमः। बुधस्तु बाण्याःवचनस्य । गुरुः सौख्यविज्ञान सारस्य । शुक्रः काम शक्तेः। शनिःदुखम् ।एतस्य प्रमुखप्रयोजनं भवति जन्मकाले तत्तद् ग्रहे वलिनि पुरुषस्य तदधिकृतः अङ्गविभागः हृष्टः,पुष्टः च भवति । निर्वले च निर्वलं भवेदिति ।

## २.३.१ग्रहाणां राजत्त्वनिरूपणम्

प्रिय जिज्ञासवः ! आत्मादि विभागानां विचारानन्तरं राजत्वनिरूपणं समुपस्थाप्यते । छात्राः भवन्तःजानन्ति राजानं विना देशस्य कीदृशी स्थिति ःस्यात् ? यथा सर्वेषां जनजातीनां व्यवस्था सुनिर्वहणाय नृपतेः आवश्यकता । तथैव सूर्यादि

ग्रहाणां सर्वप्रकारकं नाभसीय सौकर्यार्थं ग्रहमण्डलेषु कश्चित् राजा, कश्चित् मन्त्रीः इत्यादयः सन्ति । तर्हि सूर्यादि ग्रहाणां मध्ये राजानौ – सूर्यचन्द्रौ , सेनापतिः– भौमः, राजकुमारः–बुधः, सचिवौ –गुरुशुक्रौ, भृत्यः–शनैश्चरः ।

राजत्व निरुपणस्य सम्यक् प्रयोजनं भवति यत् – पुरुषस्य जन्मकाले यः ग्रहः बलीयान् असौ स्व भावानुकुलं जातकं कारयति । अर्थात् सूर्यचन्द्रौ बलीनौ स्तःजातकाय नृपतातुल्यं गुणं यच्छति ।

## २.३.२ नवग्रहाणां नामान्तराणि

सूर्यादि ग्रहाणां नैक नाम्ना प्रसिद्धिःअपितु नामान्तराणि सन्ति तेषां ग्रहाणाम् । तदधुना वयं चर्च्चां कुर्मः ।

| क्र.न. | ग्रहाः | नामान्तराणि |
|---|---|---|
| १) | सूर्यः | हेलिः,तपनः,दिनकृत् ,भानुः,पूषा, अरुणः,अर्कः |
| २) | चन्द्रः | सोमः शीतद्युतिः,उडुपतिः,ग्लौ ,मृगाङ्कः,इन्दुः,चन्द्रमा |
| ३) | भौमः | आरः,वक्रः,क्षितिजः,रूधिरः,अङ्गारकः,क्रूरनेत्रः,मङ्गलः |
| ४) | बुधः | सौम्यः,तारातनयः,विद्,बोधनः,इन्दुपुत्रः,ज्ञ : |
| ५) | जीवः | गुरुः,मन्त्री,वाचस्पतिः,सुराचार्यः,देवेज्यः |
| ६) | शुक्रः | काव्यः ,सितः,भृगुसुतः,आच्छः,आस्फुजित्,दानवेज्यः |
| ७) | शनिः | छायासूनुः,तरणीतनयः,कोणः,आर्किः,मन्दः |
| ८) | राहुः | सर्पः, असुरः, फणिः, तमः,संहिकेयः, अगुः |
| ९) | केतुः | ध्वजः,शिखिः |

## २.४ बोधप्रश्नाः

१)आत्माकारकः ग्रहः कः ?

२)शरीरे कस्य अंशस्य अधिपतिः चन्द्रमा ?

३)कः ग्रहः सेनापतिः ?

४)सचिवौ कौ ?

५)गुरोः नामद्वयं किम् ?

## २.५ग्रहाणउपग्रहाः,अधिदेवताः,वर्णाः,शुभाशुभता, तथा उदयादिविचारः –

ग्रहाणां विविध नामान्तराणां ज्ञानेन विभिन्नेषु पुस्तकेषु व्यवहृत्य शब्दावलीनां ज्ञानं भविष्यतीति । अत्रैवं अववोधव्यम् यत् सूर्यादि ग्रहाणां कालादिकष्टफल प्रदातारःउपग्रहाःसन्तितकालः,परिधिः ,धूमः, अर्घप्रहरः, यमघण्टः, कोदण्डः, मान्दि,पातः,उपकेतुःआदि सूर्यादि ग्रहाणां उपग्रहनामानि ।

### २.५.१ ग्रहवर्णाः

छात्राः अधुना ग्रहाणां स्वरुपं सामान्यतया विचारयामः । तत्र सूर्यस्य शरीरवर्णः – स्यामःलोहितः च मिश्रितवर्णः । चन्द्रस्य शरीरवर्णः–दुग्ध इव श्वेतः। भौमस्य शरीरवर्णः– जवाकुसुमवर्णः,रक्तश्वेत मिश्रितवर्णःबुधस्यवर्णः दुर्वा इव स्यामलः । गुरोः शरीरवर्णः गौरः,शुक्रस्य शरीरवर्णःश्वेतः, शनैश्चरस्य शरीरवर्णः कृष्णः, राहोःशरीरवर्णः नीलः,केतोःशरीरवर्णः विचित्रः।

ग्रहाणां शरीरवर्णज्ञानेन अयं लाभो भवति यत् तत्र ग्रहस्य शरीरवर्णानु–कुलं जातकस्य शरीरवर्णः भवति । पुनः उदाहरणरूपेण अपहृत द्रव्यस्य अपहर्ता कः ? एवञ्च तस्य वर्णः कः एतस्य ज्ञानं ग्रहाणां स्व वर्णज्ञानेन भवति ।

### २.५.२ ग्रहाणां शुभाशुभत्वम्

जिज्ञासवः! ग्रहाणां वर्णज्ञानानन्तरमेव तेषां शुभत्वं अशुभत्वं च अवश्यं ज्ञान्तव्यं एव । तत्र केचन ग्रहाः शुभाख्याः केचन अशुभाख्याःच सन्ति ।

शुभग्रहाः यथा – शुक्लपक्षस्य चन्द्रमा ,शुभग्रहयुतः बुधः, देव गुरुः बृहस्पतिः, दैत्यगुरुः शुक्रः।

पापग्रहाःयथा – कृष्णपक्षस्य चन्द्रमा ,पापग्रहयुक्तः बुधः,क्षितितनयः भौमः,सूर्यसूतः शनिः ।

अतिप्रखर किरणत्वात् सूर्यः पापग्रहत्वेन गण्यते । राहुकेतू छायाग्रहौ । शुक्ल प्रतिपदादितः दशदिवसाभ्यन्तरे चन्द्रमा मध्यबलयुक्तः ।

मध्ये दशदिवसाः पूर्णबलयुक्तः तथा तृतीये दशके हीनवली भवति ।

## २.५.३ग्रहाणां उदयविचारः

प्रिय अध्येतारः! ग्रहाणां शुभाशुभत्व ज्ञानात्परं तेषां शीर्षपृष्ठादि विभागान् आलोचयामः।सूर्यः,भौमः,राहुः तथा शनिः सर्वदा पृष्ठभागात् एव उदयं प्राप्नुवन्ति।शुक्रःचन्द्रमा, बुधः सर्वदा शिरसः उदयः। गुरुःसर्वदा उभयोदयी ।

## २.५.४ ग्रहाणां अधिदेवताः

इदानीं छात्राःग्रहाणां के अधिदेवताः सन्ति विचारयामः ।

होराशास्त्रस्य विविधग्रन्थेषु प्रतिपादिताःसन्ति ग्रहाणां वर्णाधिदेवतादि विषयाः। एतस्य पाठस्य पठने अयं लाभःस्यात् यत् अध्येता हृतनष्टादि द्रव्यानां ज्ञानं कर्तुं शक्नुयात् । ग्रहस्य दशान्तरेषु प्रचलित अशुभ कालस्य निराकरणाय तस्याधिदेवता पूजनादिकं कृत्वा यथा शुभफलाप्ति ःस्यात् इत्यादि विषयाः । तत्र–

| ग्रहाः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| वर्णाः | ताम्रः | सितः | अतिरक्तः | हरितः | पीतः | कर्पुर | कृष्णः |
| अधिदेवता | अग्नि | जल | कार्त्तिकेयः | विष्णुः | इन्द्रः | इन्द्राणी | बुधः |

## २.६ बोधप्रश्नाः ।

१)सूर्यस्य कष्टप्रदः उपग्रहः कः ?
२)बुधस्य वर्णः कीदृशः ?
३)कस्य ग्रहस्य शरीरवर्णः कृष्णः ?
४)बृहस्पतिः पापग्रहः शुभग्रहः वा ?
५ छाया ग्रहौ कौ ?
६)केषां ग्रहाणां उदयःपृष्ठात् भवति ?
७)भौमस्य कः अधिदेवता ?

# २.७ ग्रहाणां दीप्तादि अवस्था विचारः।

*सम्प्रति छात्राः विचारयामःग्रहाणां विविधावस्थाःविषये । यथा अस्माकं समाजे बाल–कुमार–युवा–वृद्ध–मृतादि अवस्थाः सन्ति तथैव ग्रहाणामपि । तदधुना चर्चां कुर्मः ।*

o eHle: Òec egfo l e: mJemLe: Meev l e: Mekel e: ÒeHeeef l e: ~

o eve K eueml egefUekeÀueesYeel ees, JemLee o Me ¬eÀce el ed~~

(pee.Hee.- 2 / 1 6 )

ÒeLec eeJemLee - o eHle:,

eÜ I eer³ eeJemLee - Òec egfo l e:, l eerer³ eeJemLeemJemLe:, ®el egLee&emLee - Meevl e:, Hebá ec eeJemLee - Mekel e:, <eÿ eJemLee - ÒeHeeef l e:, meHl ec eeJemLee- o eve:, Deä c eeJemLee - K eue:, veJec eJemLee- eUekeÀue:, o Mec eeJemLee- Yeel e: ~

De$e SJeb eUe®eej Cee³ eb YeJebsed ³ el ed keÀm³ eeb Heef efmLel eew û en: o eHleeeb eUeeYeVeeJemLeemegef eÿ ef e? l eo Òegee Deeueee®e³ eec e: ~

û en: G®®esc eueef$ekeÀeCes®e efmLel es l em³ e o eHleeJemLee~

û en: mJei eí eJemLeeHeves l em³ e mJemLeeJemLee ~

û en: ef c e$ei eí eJemLeeHeves l em³ ec egfo l eeJemLee~

û en: MegYeû en eCeebJei exDeJemLeeHeves l em³ e Meevl eeJemLee~

û en: mHeg j eqmc epeeuew mefmLel es l em³ e Mekel eeJemLee~

û en: Dev³ eû enw Hej eefpel e: m³ eeÊeo e l em³ e ÒeHeeef l eeJemLee~

û en: mJe Me$eg eMeew eJeeMes®e efmLel es l em³ e o eveeJemLee~

û en: HeeHeû en eCeebJei exefmLel e: m³ eeÊeo e l em³ e K eueeJemLee~

û en: vee®ej eMeewm³ eeÊeo eveeRem³ e YeeleeJemLee~

û en: Deml ebel e: m³ eeÊeo e l em³ e eUekeÀueeJemLee~

## २.८बोधप्रश्नाः

१)ग्रहाणां कति अवस्थाः भवन्ति ?

२)ग्रहःस्वगृहे कस्यां अवस्थायां तिष्ठति ?

३)भीतावस्था कदा जायते ?

४)ग्रहस्य अष्टमावस्था का ?

## २.९ ग्रहाणां प्रदेशाः तेषां जातिः एवं ग्रहकक्षाक्रमः

छात्राः इदानीं सूर्यादि ग्रहाणां प्रदेशान् विचारयामः। प्रदेशज्ञानात् कः ग्रहः कस्य स्थानस्य अधिपतित्वं करोति एतस्य ज्ञानं भवति। अपितु स्थानाधिपवशात् अभीष्टस्थानस्य कृते कदा शुभं अशुभं वा फलं भवति एतस्य ज्ञान अपि जायते।

| ग्रहाः | प्रदेशाः |
|---|---|
| सूर्यः | देवभूमिः मेरु प्रदेशः। |
| चन्द्रः | जलराशिः (समुद्रस्थानम्)। |
| भौमः | लङ्कातःकृष्णानदी पर्यन्तप्रदेशाः। |
| बुधः | विन्धपर्वततः गङ्गानदी पर्यन्तम्। |
| गुरुः | गौतमीनदीतः विन्ध्यपर्वतः पर्यन्तम्। |
| शुक्रः | कृष्णानदीतः गौतमीनदी पर्यन्तम्। |
| शनिः | गङ्गातः हिमालयपर्यन्तं शनैश्चरस्य प्रदेशाः। |

## २.९.१ग्रहाणां जाति निरूपणम्

जिज्ञासवः! यथा प्रत्येकस्य जनस्य सर्वविध कृताकृत कर्मस्य निरूपणाय नवमवस्था–विकलः, दशमावस्था–भीतः।

अत्र एवं विचारणीयं भवेत् यत् कस्यां परिस्थितौ ग्रहःदीप्तादि विभिन्नावस्थासु तिष्ठति ? तदधुना आलोचयामः।

ग्रहः उच्चे मूलत्रिकोणे च स्थितेः तस्य दीप्तावस्था ।

ग्रहःस्वगृहावस्थापने तस्य स्वस्थावस्था ।

ग्रहःमित्रगृहावस्थापने तस्यमुदितावस्था ।

ग्रहः शुभग्रहाणां वर्गे अवस्थापने तस्य शान्तावस्था । ग्रहः स्फुटरश्मिजालैः संस्थिते तस्य शक्तावस्था । ग्रहःअन्यग्रहैः पराजितः स्यात्तदा तस्य प्रपीडितावस्था । ग्रहः स्व शत्रुराशौ नवांशे च स्थिते तस्य दीनवस्था ।

ग्रहः पापग्रहाणां वर्गे स्थितःस्यात्तदा तस्य खलावस्था । ग्रहः नीचराशौ स्यात्तदानीं तस्य भीतावस्था । ग्रहःअस्तंगतः स्यात्तदा तस्य विकलावस्था ।

तस्य जातिः नितरां अपक्षते । मनुष्यसमाजस्य वर्गिकरणं अस्माभिः जात्यानुसारं क्रियते । यथा ब्राह्मण –क्षत्रिय – वैश्य – शूद्र प्रभेदैः । तत्र ब्राह्मणवर्णे अधिपतित्वं कुरुतः गुरुशुक्रौ । क्षत्रिय वर्णाधिपौ सूर्यमङ्गलौ । वैश्यानां अधिपतित्वं करोति चन्द्रमा । शूद्रकुलाधिपतिः बुध ः । तत्र वर्णशङ्कराणां अधिपः शनिः । छात्राःभवतां सौकर्यार्थं सारणीं निरूप्यते ।

| जातिः | ब्राह्मणः | क्षत्रियः | वैश्यः | शुद्रः | सङ्करः |
|---|---|---|---|---|---|
| ग्रहाः | गुरु,शुक्र | रवि,मङ्गल | चन्द्रमा | बुध | शनि |


## २.९.२ग्रहाणां नाभसीय कक्षाक्रमः

प्रिय जिज्ञासवः! ग्रहाणां कक्षाक्रमविषये विचारयामः । अस्य पाठस्य पठने छात्राणां नवग्रहाणां कक्षा क्रमस्य ज्ञानं भूत्वा वारक्रमस्य ज्ञानं नूनं अवबोधनं स्यादिति । पाठस्य अवबोधनं वयं क्षत्रप्रदर्शनेन जानीमः ।

ग्रहकक्षाक्रमं अनुसृत्य वारस्य ज्ञानमपि भवति । यदि कः पृच्छति रविवासरात् परं सोमवासरस्य अगमनस्य किं कारणम् ? सूत्रं भवति –

**मन्दादधः क्रमेणस्युःचतुर्थाःदिवसाधिपाः**

अर्थात् शनैश्चरात् चतुर्थस्थानस्थितः ग्रहःवाराधिपतिः भवतीति निर्णयः । ग्रहकक्षा क्रमः यथा –




## २.१०बोधप्रश्नाः

१)चन्द्रः कस्मिन् स्थाने अधिपतित्वं करोति ?

२)गङ्गातः हिमालयः कस्य ग्रहस्य स्थानम् ?

३ )कौ ग्रहौ ब्राह्मणवर्णौ ?

४)शनिः कस्य जातेः अधिपतित्वं करोति ?

५ )सर्वतो अन्तिमा कक्षा कस्य ग्रहस्य ?

६ )सर्वतो उपरि कक्षा कस्य अस्ति ?

## २.११ग्रहाणां दृष्टिः तथा वलविचारः

जिज्ञासवः! अधुना रव्यादि ग्रहाणां दृष्टिविचारान् विचारयामः । यः ग्रहःयं ग्रहं पश्यति , अर्थात् पश्यन् ग्रहः द्रष्टा । द्रष्टा ग्रहाणां कतिपय सामान्य दृष्टयः कतिपय विशेष दृष्टयः भवन्ति । इदानीं ग्रहाणां स्थानपरत्वेन दृष्टयः के सन्ति तदधुना आलोचयामः ।

यः कोऽपि ग्रहः दशमं,तृतीयं च स्थानं एकचतुर्थांशदृष्ट्या पश्यति ।

नवमं,पञ्चमं च स्थानं द्विचरणदृष्ट्या ,चतुर्थं ,अष्टमं च स्थानं त्रिचरणदृष्ट्या, सप्तमं स्थानं सम्पूर्ण दृष्ट्या पश्यति ।

ग्रहः
- दशमे,तृतीये
- नवमे,पञ्चमे,
- चतुर्थे,अष्टमे
- सप्तमे

अधुना ग्रहाणां विशेषदृष्टिविचारं चर्चां कुर्मः। एकचरण दृष्ट्यपेक्षया शनिः तृतीयं दशमं च स्थानं पूर्णदृष्ट्या पश्यति । नवमं ,पञ्चमं च स्थानं गुरुःपूर्णदृष्ट्या पश्यति । चतुर्थं ,अष्टमं च स्थानं भौमः पूर्णदृष्ट्या पश्यति । ग्रहाणां दृष्टि विषयं सुस्पष्ट ज्ञानाय रेखाचित्रम्।

| | |
|---|---|
| शनि | तृतीये,दशमे |
| गुरु | नवमे,पञ्चमे, |
| भौम | चतुर्थे,अष्टमे |
| २ ५ ,सू,बु,च | सत्पम |

दृष्टिविचारप्रसङ्गे उर्ध्वाधरदृष्टिःअपि विद्यते ग्रहाणाम् । तदधुना लिख्यते ।

सूर्यस्य भौमस्य च उर्ध्व दृष्टिः ।

शुक्रस्य बुधस्य च कटाक्ष दृष्टिः ।

चन्द्रस्य गुरोः च सम दृष्टिः ।


राहोः शनैश्चरस्य च नीच दृष्टिः ।


## २.११.१ ग्रहाणां वलविचारः

प्रिय जिज्ञासवः ! ग्रहाणां स्थानस्थितित्वात् विविधाः योगाः उत्पद्यन्ते । जातकस्थितयोगानां बलाबलपरीक्षणाय विविधानि बलानि शास्त्रान्तरेषु उक्तानि सन्ति । ते भवन्ति स्थानवलं ,दिग्वलं,कालवलं,चेष्टावलं,नैसर्गिकवलं च ।

अधुना छात्राः स्थानवलविषये चर्च्चां कुर्मः । स्थानवलस्य अयं अभिप्रायः यत् ग्रहःकस्मिन् स्थानस्थितःवलीयान् सन् जातकाय शुभफलं प्रयच्छति इति । ग्रहःयदि स्वोच्च ,येग्रहाःनीचराशिगताः,शत्रुगृहगताः,पापयुक्ताः,पापनिरीक्षिताः, पापवर्गगताः,सन्धिगताःअष्टकवर्गे लघुविन्दुयुक्ताः,पापांशगताः अस्तंगताः,ग्रहयुद्धेपरास्ताः,ग्रहाः स्थानबलेन बलिनः न भवन्ति ।

प्रिय जिज्ञासवः ! ग्रहाणां स्थानबल विचारात्परमेवदिग्वलं विचारयामः।दिग्वलंदिशा सम्बन्धिबलम्। तत्र लग्नस्थः गुरुबुधौ,चतुर्थस्थःशुक्रचन्द्रौ,सप्तमस्थःशनिः,दशमस्थः भौमसूर्यौ, दिग्बलिनौ भवतः। दिग्बलचक्रं छात्राणां सौविध्यानुसारं निरूप्यते ।



इदानीं समयजन्यबलं वा कालवलं विचारयामः। समयस्य अवयवाःभवन्ति दिवस,रात्रि ,होरा,घटी इत्यादयः। तर्हि नवग्रहेषु चन्द्रमा, शनिः तथा भौमः रात्रिसमये बलिनः भवन्ति । अवशिष्टाः सूर्य,बृहस्पति,शुक्राः दिवसे बलिनः भवन्ति । बुधः एतादृशः ग्रहः यः अहर्निशः कालबलयुक्तः भवति । सर्वेग्रहाःस्व स्व होरायाम्, स्व वर्षे,मासे तथा स्व दिवसे च वलिनः भवन्ति । शुक्लपक्षे शुभग्रहाः तथा कृष्णपक्षे पापग्रहाः बलीनः भवन्ति । साम्प्रतं चेष्टाबलस्य चर्च्चां कुर्मः । विभिन्नाषु परिस्थितिषु ग्रहःचेष्टावलयुक्तः भवति । शुक्र-बुध-मङ्गल -गुरु-तथा शनैश्चराः ग्रहयुद्धे विजयिनः स्युः,अथवा बक्रगातिकः स्युः, अपिच चन्द्रेणयुक्तःस्यात्तदा चेष्टावलं पूर्ण प्राप्यते । सूर्यचन्द्रौ उत्तरायणे चेष्टाबलयुक्तौ भवतः ।

ग्रहाणां नैसर्गिक बलम् - नैसर्गिकबल अववोधनार्थं एकापंक्ति मनसि आयाति-“श-रु-बु-गु-शु-च -साद्या वृद्धितो वीर्यवन्तः । अर्थात् सर्वतो हीनबलः शनिः। ततो अधिकःबलवान् मङ्गलः । ततः अधिकःबलवान् बुधः। ततो अधिकःबलवान् गुरुः,ततो शुक्रः,ततो चन्द्रमा , ततो रविः । बलस्य क्रम वद्धिष्णुता हेतु निम्नचिह्नेन सूचयामः ।

शनि˃ मङ्गल˃बुध˃बृहस्पति˃ शुक्र˃ चन्द्र˃ सूर्य । नैसर्गिक बलविचारक्रमे सर्वाधिकःबलीयान् रविः। सर्वतो हीनबलयुक्तःशनिः ।

## २.१२बोधप्रश्नाः

१)यः कोऽपि ग्रहः दशमं तृतीयं च स्थानं कथं पश्यति ?

२)सर्वेग्रहाः कं भावं पूर्णरूपेण पश्यति ?

४)कयोःग्रहयोःउर्ध्वदृष्टिः ?

५)नीचराशिगताःग्रहाःस्थानबलेन हीनःयुक्तो वा ?

६)के ग्रहाः रात्रिबलिनः ?

## २.१३ ग्रहाणां पञ्चधामैत्री विचारः

*प्रिय जिज्ञासवः! वयं ग्रहाणां मित्रामित्रविषये चर्चां कुर्मः । संसारे यथा मानवानां मित्राणि , शत्रवः तथा व्यवहारे उदासीनश्च भवन्ति । तद्वदेव ग्रहाणां अपि मित्राणि शत्रवः तथा समाः भवन्ति । अर्थात् कस्यचित् ग्रहस्य केचन मित्राणि , कश्चित् ग्रहस्य कोचन रिपवः, एवं कस्यचित् ग्रहस्य न मित्राणि न शत्रवः अर्थात् समः भवति । यथा अहि–नकुल सम्बन्धः, अग्नि–जल सम्बन्धः । तादृशः ग्रहाणां शत्रु मित्र सम्बन्धश्च भवति । यथा मानव समाजे पञ्चप्रकारकं व्यवहारं प्रचलति तथैव पञ्चधामैत्री विचारे मित्रं, शत्रु ,सम , ।*

*अधिमित्रं , अधिशत्रुश्चेति पञ्चविभागाः परिकल्पिताः विद्यन्ते । कस्य ग्रहस्य के नैसर्गिकरुपेण मित्राणि, शत्रवः, समाः भवन्तीति विषयं निरूपयन् दैवज्ञः वेद्यनाथः*

*मित्राणि भानोः कुजचन्द्रजीवाः शत्रू सितार्की शशिजः शमानः ।*
*चन्द्रस्य मित्रे दीननायकज्ञौ समा गुरुक्ष्माजसितासिताः स्युः ।।*
*आरस्य मित्राणि रवीन्दुजीवाश्चान्द्री रिपुः शुक्रशनी समानौ ।*
*सूर्यासुरेज्यौ सुहृदौ बुधस्य समाः शनीज्यावनिजास्त्वरीन्दुः ।।*
*सूर्यारचन्द्राः सुहृदस्तु सूरेः शत्रू सितज्ञौ रविजः समानः ।*
*मित्रे शनिज्ञौ भृगुनन्दनस्येन्द्विनावरी जीवकुजौ समानौ ।।*
*मन्दस्य सूर्येन्दुकुजाश्च शत्रवः समः सुरेज्यः सुहृदौ सितेन्दुजौ ।*
*(जा.पा. २/४२–४४ )*

**ग्रहाणां नैसर्गिक मित्रसमशत्रु बोधकं चक्रम् –**

| **ग्रहाः** | **मित्राणि** | **शत्रवः** | **समाः** |
|---|---|---|---|
| *सूर्यः* | *चन्द्र, मङ्गल, गुरु* | *शुक्र, शनिः* | *बुधः* |
| *चन्द्रः* | *रवि, बुध* | *– – –* | *गुरु, शुक्र, मङ्गल, शनिः* |
| *मङ्गलः* | *रवि चन्द्र, गुरु* | *बुध* | *शुक्रः, शनि* |
| *बुधः* | *सूर्य, शुक्र* | *चन्द्र* | *शनि, गुरु, मङ्गल* |
| *गुरुः* | *सूर्य, चन्द्र, मङ्गल* | *शुक्रः, बुध* | *शनिः* |
| *शुक्रः* | *शनिः, बुध* | *सूर्य, चन्द्र* | *मङ्गल, गुरु* |
| *शनिः* | *शुक्र, बुध* | *सूर्य, चन्द्र, मङ्गल,* | *गुरु* |

उपरि वार्णिताः विषयाः ग्रहाणां नैसर्गिक(स्थायी रुपेण )मित्र समशत्रवः सन्ति । अधुना विचारयामःतात्कालिक मित्रामित्रम् ।

"तत्काले च दशायबन्धुसहजः स्वान्त्येषुमित्रं स्थितः"।

जातकपत्रे यः ग्रहः यस्मिन् स्थाने विद्यमानो भवति ,तस्मात् द्वितीय,तृतीय,चतुर्थ एवं द्वादश, एकादश ,दशमस्थाः ग्रहाःतत्कालिकशत्रवः भवन्ति । एवं प्रकारेण ग्रहाणां नैसर्गिकः तथा तात्कालिक मित्र–शत्रु–सम विचारःजातः। अधुना पञ्चधामैत्री विचारः ज्ञानार्थं सूत्रं यथा–

| **नैसर्गिक रुपेण** | | **तात्कालिक रुपेण** | | |
|---|---|---|---|---|
| मित्र | + | मित्र | = | अधिमित्रं |
| शत्रु | + | शत्रु | = | अधिशत्रु |
| समः | + | शत्रु | = | शमः |
| सम | + | मित्र | = | मित्रम् |
| मित्रं | + | शत्रु | = | समः |

अनेन प्रकारेण पञ्चधामैत्री विचारो भवति। येन माध्यमेन ग्रहाणां शत्रुः,मित्र , अधिशत्रुः,अधिमित्रं ,तथा समादीनां ज्ञानं जायते । फलतः जातकः स्वजीवन विषये शुभाशुभफलं प्राप्तं करोति एवं अनिष्ट ग्रहाणां मन्त्रादिभिः ग्रहशान्तिं कृत्वा जीवनं सुखमयं करोतीति ।

## २.१४बोधप्रश्नाः

१)सूर्यस्य कानि मित्राणि ?

२)बुधस्य शत्रुः कः ?

३)मित्रेण मित्रं युति किं जायते ?

४)मित्रं + शत्रु =..........

५) तात्कालिक विचारे कस्य गणना न भवति ?

## २.१५ द्वादशभावानांकारकाः, ग्रहस्वरूपतथं पीडाकरणप्रकारः

*प्रिय जिज्ञासवः ! इदानीं ग्रहाणां भावकारकत्वं स्थानस्थितित्वात् शुभाशुभत्वं तथा सूर्यादि ग्रहाणां स्वरुपविषये वयं चर्चां कुर्मः। तन्वादि द्वादशभावाःसन्ति फलितखण्डे ज्योतिषस्य । रव्यादिग्रहाःतन्वादि द्वादशभावानां कारकतत्वं नैव स्वीकृताः। अपिच द्वादशभावानां कारकता रव्यादि ग्रहाणां सम्मेलनेन भावजन्य आवश्यकतां यःप्रदातुं समर्थःसैव अभीष्टभावस्य कारकत्वं स्वीकृतः ।तर्हि द्वादश भावानां द्वादशकारकाः भवन्ति । तदधुना विचारं कुर्मः।*

*भावस्य कारकान् ज्ञातुं पद्यं यथा –*

*" द्युमणिरमरमन्त्रीभूसूतःसोमसौम्यौ*
*गुरुरिनतनयारौ भार्गवो भानुपुत्रः।*
*दिनकरदिविजेज्यौ जीवभानुज्ञमन्दाः*
*सुरगुरुरिनसूनुः कारकाःस्युर्विलग्नात् ।।"*

*भावकारकस्य स्पष्टअवबोधनार्थं सारणी प्रस्तूयते ।*

**भावनां कारकाः**

| भावाः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| कारकाः | सू. | बृ. | म. | च.बु. | बृ. | श म. | शु. | श. | र.बृ. | सू.श.बु.बृ. | बृ. | श. |

*फलितखण्डे भावफल विचारःप्रकरणे भावकारकस्य प्रमुखता विद्यते। उक्तमस्ति यत् – भावात् भावपतिश्च कारक वशात् तद् तद् फलं योजयेत् ।*

**विद्र**:– *बुध–गुरु–शुक्राःक्रमशः चतुर्थ–पञ्चम–तथा स्प्तमभावगताः स्युः तदा अरिष्टकारकाः भवन्ति । अपि च शनैश्चरः अष्टमभावगतः सन् जातकस्य मनोरथं पूरयति ।*

*प्रिय जिज्ञासवः! ज्योतिषशास्त्रे प्रतिपादितानां ग्रहाणां प्रमुखाः भूमिकाः सन्ति । ग्रहाधीनः भवेत् योगः। वयं यदि रव्यादि ग्रहाणां स्वरुपं न जानीमः तदा*

जातकस्य स्वरुपं कीदृशं इत्यस्य ज्ञानं कर्तुं महान् क्लेश : स्यात् इति। विचारितप्रसङ्गस्य चर्चां कुर्मः। सर्वादौ सूर्यस्य स्वरुपं चिन्तयामः।

## २.१५.१ ग्रहस्वरूपम्

सूर्यस्यः- चतुरस्त्रशरीरः,यावत् दीर्घःतावत् विस्तरः। प्रतापशाली , श्याम : तथा अरुणाङ्गं ,मधुवत् पिङ्गलाक्षः। पित्तप्रकृतिकः, अल्पकेशयुक्तः सुन्दरः।

चन्द्रस्य :- संचारशीलः, मृदुवाणी युक्तः,विवेकवान् ,शुभदृष्टियुक्तः लघुः तथा गोलाकारशरीरः,स्थिराङ्गयुक्तः,कफ तथा वात प्रकृतियुक्तः।

भौमस्य– पापदृष्टिः,युवाशरीरः,उदारशीलः,पित्तप्रकृतियुक्तः, चञ्चलः शरीर मध्यभागःकृशः,रक्तमिश्रितगौरवर्णाकार विभिन्नानि अङ्गानि , प्रतापी ,कामी तथा तमोगुण युक्तः स्यात् ।

बुधस्य– शरीरवर्णः दुर्वादल इव स्यामलः स्यात् ,स्पष्टवादी ,दुर्वलशरीरःतथाच क्षीणः, राजसिक प्रकृतिः,हास्यप्रियः ,हानिप्रियः ,सुन्दरशरीरयुक्तः ,पित्त– वात –कफ मिश्रित प्रकृतिः। सद्य प्रतापी, वैभवशाली तथा विद्वान् भवति ।

गुरोः– बृहत् उदरः तथा बृहत् शरीरयुक्तः पित्तवर्णयुक्तः,कफप्रकृतियुक्तः: सर्वगुणयुक्तः,सर्व शास्त्राणां अधीकारीः ,कपिलवर्णयुक्तः नेत्रं केशःच स्यात्, सात्विकः अत्यन्त बुधिमान् , अति राजसूचकचिह्न युक्तः शोभायुक्तः स्यात्।

शुक्रस्य :- अतिकुटिल केशः,स्यामवर्णः, सुन्दरता युक्तः, सम रुचिराङ्गयुक्तः शुभदृष्टिः कामी, विशेष रुपेण कफ,वात प्रकृतियुक्तः।राजसः स्वभावःलक्ष्मीनिवासस्थानं सुखःतथा विविध गुणानां समूहः शुक्रस्य स्वरुपम् ।

शनेश्चरस्य - कठिनरोमावयवयुक्तः,स्थूलदन्तः, कृशशरीरयुक्तः, दर्वादल स्यामल इवशरीरकान्तिः। वात–कफप्रकृतिकः, चारुःतथा पिशङ्ग दाृष्टि युक्तः,आलस्य प्रकृति युक्तः ।

## २.१५.२ग्रहाणां पीड़ाकरण प्रकारः

*अधुना विचारयामः ग्रहाणां पीड़ाकरण प्रकारः ।*

*अस्य पाठस्य पठने विशेष रूपेण के ग्रहाः केषां रोगाणां कारणानि भवन्ति एतस्य प्रमुखज्ञानं जायते । नवग्रहेषु सर्वादौ सूर्यः केषां रोगाणां कारणं एतद् विचारयामः । अत्रैवं विचारणीयं यत्– यदि ग्रहाः अशुभ प्रभाविताः तर्हि निम्न रोगकारकाः भवन्ति ।*

*सूर्यः-अग्निरोग,ज्वलन, ज्वरवृद्धि,क्षयरोग, अतिसाररोग–प्रभृतिभिः । तथा च राजानः,देवाः,ब्रह्मणाः,भृत्यानां मनोमालिन्यं करोति ।*

*चन्द्रः-पाण्डुरोग,जलदोष,कामलरोग,पीनस (खासी) तथा च कालिकादेवी स्त्रीणां सकाशात् व्याकुलतां कारयति ।*

*मङ्गलः-पीनवीज,कफ,शस्त्रअग्नि,ग्रन्थिरोग,ब्रणादि,–दारिद्र्योद्भुतैः रोगैः,तथा च वीराः,कपालिनः,भूतादयः तैः आशुः शीघ्रमेव भीतिः भवति ।*

*बुधः-बुधः अशुभस्यात्तदा–गुह्य,उदर,नेत्र–वायुप्रभृति रोगेण,कुष्ठरोगेण , मन्दाग्निना , शूलरोगेण, ग्रहणी रोगेण प्रपीडितः भवति । तथा च वैष्णवेभ्यः भूतप्रेतेभ्यः अतीव दुखं प्राप्नोति ।*

*गुरुः– बृहस्पतिः दूषितः स्यात्तदा आचार्य,ब्राह्मण,देवता,गुरु,एतेषां शापदोषैः गुल्मरोगं भवति ।*

*शुक्रः- स्त्री विकृति जनित प्रमेहरोगेण ,असुराणां सकाशत्,तथा स्वाभिलसित स्त्री जनितैः दुःखं भवति ।*

*शनिः–दारिद्र्य दोषेण ,सकर्म दोषेण चौरैः सन्धि रोगैश्च सह क्लेशं भवति ।*

*राहुः–अपस्मार, शीतला ,वन्धन,संक्रामकरोग ,नेत्र रोग , कृमिरोगैः प्रेत पिशाचभूतैः अरुचि रोगेण ,कुष्ठ रोगेण च नराणां भयं करोति ।*

*केतुः-कण्डुरोगः,शीतलारोगः स्वकर्मकृतरोगैः निजआचारत्यागेन नीच जातिभिश्च दुखं ददाति ।*

## २.१६ बोधप्रश्नाः

१)लग्नभावस्य कारकः कः ?

२)दशमभावस्य के कारकाः ?

३)कस्य ग्रहस्य शरीरं चतुरस्त्राकारः ?

४)कठिनरोमावयवःयुक्तःग्रहः कः ?

५)कस्य प्रभाववशात् अपस्मार रोगः भवति ?

६)गुल्मरोगं कः कारयति ?

## २.१७ संक्षिप्तउत्तरमूलकप्रश्नाः

१–राजत्व–निरूपण प्रसङ्गे कौ ग्रहौ राजानौ ?

२– कः ग्रहः सेनापतिः ?

३– कालपुरुषस्य आत्मा कः ?

४– वाण्याः कारकः कः ?

५– सूर्यस्य नामान्तराणि कानि ?

६– क्षितिजःकस्य ग्रहस्य नामान्तरम् ?

७– शनैश्चरस्य शरीर वर्णःकीदृशः ?

८– के शुभग्रहाः ?

९– पापयुतः बुधः कीदृशः ?

१०– छाया ग्रहौ कौ ?

११– ग्रहाणां कति अवस्थाः भवन्ति ?

१२– दीप्तादि अवस्थाः कति विधाः भवन्ति ?

१३– शुभ ग्रहाणां वर्गे अवस्थापने ग्रहस्य कीदृशावस्था ?

१४– नीचराशिस्थिते ग्रहस्य कीदृशावस्था ?

१५– सूर्यस्यवर्णःअधिदैवतं च लिखत ?

१६– गुरुशुक्रौ कस्य वर्णस्यान्तर्गतौ भवतः ?

१७– भौमस्य प्रदेशाः लेख्याः ?

१८– शुक्रस्योपरि कस्य ग्रहस्य कक्षा ?

१९– वासरःतथा वासराधिपतिक्रमःकथं ज्ञायते ?

२०– द्विचरणदृष्टिःकस्यस्थानं प्रति ?

२१– सप्तमं स्थानं प्रति केषां ग्रहाणां दृष्टिः ?

२२– कः ग्रहःसप्तमं अष्टमं च स्थानं पूर्णदृष्ट्या पश्यति ?

२३– कस्य कस्य ग्रहस्य उर्ध्वदृष्टिः ?

२४– राहोःशनैश्चरस्य कीदृशी दृष्टिः ?

२५– सूर्यस्य मित्राणि के सन्ति ?

२६– शनैश्चरस्य शत्रवः के ?

२७– नेसर्गिकरुपेण मेत्रं ,तात्कालिकरुपेण मित्रं,तर्हि पञ्चधामैत्री प्रसङ्गे उभयो स्थानं किम् ?

२८– दशमभावस्य के कारकाः भवन्ति ?

२९– सूर्यः कस्य भावस्य प्रधान कारकः ?

३०– कः ग्रहःअष्टम भावस्थितेः जातकस्य मनोरथं पूरयति ?

## २.१८ नातिदीर्घउत्तरमूलकप्रश्नाः

१– कस्यां परिस्थतौ ग्रहःस्थानवली भवति ?सोदाहरणं निरुपय ?

२–राजत्व निरुपणं सम्यक् विधीयताम् ?

३–आत्मादिविभागाः के ?

४–सामान्य विशेष दृष्टेः सम्यक् विचारं कुरु ?

५–कथं रविवासरात् परं सोमवारःएव आगच्छति तन्निरुप्यताम् ?

६–ग्रहाणां अधिदेवता ज्ञानस्य किं तावत् प्रयोजनम् ?

## २.१९दीर्घोत्तरमूलप्रश्नाः

१– ग्रहाणां शत्रु मित्र समः निरुपणं सम्यक् विचारयत ततःपञ्चधामैत्री विचारं विचारयत ।

२– सूर्यस्य शुक्रस्य च स्वरुपं विलिख्य एभ्योत्पाद्यमानाः रोगाः स्व भाषया निरुपणं कुरु ।

३– स्वोदाहरणपूर्वकं ग्रहाणां वल निर्णयं कुरु ।

## २.२०संक्षिप्त प्रश्नानां उत्तराणि

१)सूर्यचन्द्रौ २)भौमः ३)सूर्यः४)बुधः५)हेलि,सूर्य ,तपन ६) भोमस्य ७)कृष्णः८)शुक्लपक्षस्य चन्द्रमा,बुध,गुरु,शुक्र९)पापः १०)राहुः,केतुः ११)पञ्च १२)दश १३)शान्तावस्था १४)भीतावस्था १५)ताम्रः,अग्निः १६)ब्राह्मणः १७)लङ्कातःकृष्णानदी पर्यन्तः१८)सूर्यस्य १९)शनैश्चरात् चतुर्थस्थानस्थितः ग्रहः २०)नवमं पञ्चमं च स्थानं प्रति २१)सूर्य,चन्द्र,बुध,शुक्र २२)भौमः २३)सूर्यस्य,भौमस्य च २४)नीच २५)मङ्गल,चन्द्र,गुरु २६)सूर्य,चन्द्र,मङ्गल २७)अतिमित्रम् २८)सूर्य,बुध,गरु,शनि २९)प्रथमभावस्य ३०)शनिः ।

❖❖❖

# तृतीयपाठ्यसूची (प्रथमभागः)

----------------------------------------------------

क्रं.सं. पृ.सं

----------------------------------------------------


३.१ प्रस्तावना

३.२ अस्य पाठस्य उद्येश्यानि

३.३ प्रश्न तथा जन्मकुण्डल्यनुसारं वियोनि उत्पत्तिविषये ग्रहयोगाः -

३.४ बोधप्रश्नाः-

३.५ वियोनि जन्मयोगस्य प्रकारः

३.६ बोधप्रश्नाः

३.७ वियोनि शरीरे राशि स्थापनप्रकारः एवञ्च तस्य वर्णः विचारः

३.७.१ वियोनि वर्णविचार

३.८ बोधप्रश्ना

३.९.ग्रहयोगवशात् पशुः स्थलाम्बुज वृक्षादीनां उत्पत्ति विचारः।

३.९.१.- अधुना पक्षीजन्मज्ञानं विचारयामः।

३.९.२ वियोनीनां संख्या निरूपणप्रकारः -

३.९.३ बोध प्रश्नाः

३.१० स्थलजलजांश स्वामिवशात् वृक्षाणां विशेष जन्मयोगाः

३.११ बोधप्रश्नाः

३.१२ संक्षिप्त उत्तरमूलकप्रश्नाः-

३.१४ दीर्घोत्तरमूलकप्रश्नाः

३.१५ संक्षिप्त प्रश्नानां उत्तराणि


❖❖❖

# तृतीयपाठः प्रथमभागः

## ३.१ प्रस्तावना

*प्रिय पाठकाः! अस्मिन् पाठे वयं मनुष्यव्यतिरेकः अन्येषां जीवानां विचारान् कुर्मः। अस्मिन् पाठे विशेषरुपेण मानव योनि रहितः अर्थात् वृक्ष–पशु–पक्षी–स्थावरादीनां उत्पत्तिः एवञ्च ग्रहस्थितिःवशात् वियोनीनां वर्गीकरणं इत्यादि विषयाः सन्निवेशिताः सन्ति । इत्यत्र शास्त्रीयवचनं यथा –अखिलानां वियोनीनां मनुष्येतराणां पशुपक्षीचराचराणां उत्पत्तिः एवः वियोनि संज्ञकः। अपिच यस्मिन् पाठे एतस्य पाठस्य चर्चा भवति तस्य पाठस्य वियोनि जन्माध्यायः इति नाम ।*

## ३.२ अस्य पाठस्य उद्येश्यानि –

*१)वियोनि शव्दस्य परिचयः ।*

*२)वियोनि जन्मनिरूपणम् ।*

*३)वियोनीनां नामानि तेषां विभागाः ।*

*४)अस्माकं समाजे तेषां उपयोगिता ।*

## ३.३प्रश्न तथा जन्मकुण्डल्यनुसारं वियोनि उत्पत्तिविषये ग्रहयोगाः –

*अस्माकं मानवानां तथा मानवेतराणां प्राणीनां शुभाशुभनिरूपणाय ज्योतिषशास्त्रमिदं सम्यक् उपकरोति । मानवेतरप्राणिविशेषाः(वृक्ष,पशुपक्षी प्रभृतयः) प्रतिपदं मानवस्य उपकारे एव प्रतिदिनं आगच्छन्ति । अतःतेषां उत्पत्ति –क्रमःतथा च ग्रहस्थिति वशात् कीदृशी वियोनिःउत्पद्यते एतस्य चर्चां वयं कुर्मः।*

*तत्र प्रश्नकुण्डल्यनुसारं ,जन्मकुण्डल्यनुसारं वा जन्मकालस्य चन्द्रस्पष्टं अवगन्तव्यम् । ततः द्रष्टव्यं यत् अयं चन्द्रः कस्य ग्रहस्य द्वादशांशे वर्तते इति । तदनुसारं राशि नरूपणं कृत्वा फलं अवगन्तव्यम् । यथा चन्द्रमा चतुष्पद् राशिःद्वादशांशे तिष्ठेत्तदा चतुष्पद् प्राणि विशेषस्य जन्मः। जलचरे जलचरजीवानां*

उत्पत्तिः। एवमेव सर्वत्र । इत्यत्र राशीनां अनुरुपं अपि वियोनिजन्मः भवति । यथा मेषस्य द्वादशांशे, मेष प्रभृति चतुष्पद् जीवाः। वृषे वलीवर्दः,महीषादयः......... । अनेन प्रकारेण चन्द्रगत द्वादशांशानुसारेण वियोनीनां जन्मः भवति । नोचेत् मनुष्याणाम् ।

## ३.४ बोधप्रश्नाः-

१) वियोनि शव्दस्य कोऽर्थः ?

२) वियोनि विचारे कस्य ग्रहस्य द्वादशांशः व्यवहारे अगच्छति ?

३) वियोनि जन्मज्ञानाय कस्यां कुण्डल्यां व्यवहारः भवति ?

४) जलचरराशौ कीदृशजीवानां उत्पतिः ?

## ३.५ वियोनि जन्मयोगस्य प्रकारः -

प्रिय जिज्ञासवः! वियोनिउत्पतिप्रदाः ग्रहयोगाः अधुना चर्चां कुर्मः।

प्रथमयोगः-पापग्रहः बली स्यात्,शुभग्रहः निर्बलः तथा नपुंसकग्रहः केन्द्रगतः स्यात्तदा वियोनि जन्मस्य लक्षणम् ।

द्वितीययोगः -पापग्रहः बलवान् , शुभग्रहः निर्बलः तथा नपुंसकग्रहःलग्नं पश्येत् तदा वियोनि जन्मस्य लक्षणम् ।

चन्द्रस्पष्टराशेः द्वादशांशराशि वशात् मेषादि क्रमेण वियोनीनां जन्मः।

मेषद्वादशांशगतः चन्द्रःस्यात्,तस्मात् मेष नामक वियोने :जन्मः।

वृषद्वादशांशगतः चन्द्रात् गोः,वलीवर्दः ,महिषादयः वियोनीनाम् ।

कर्कद्वादशांशगतः चन्द्रात् कर्कटादि वियोनीनाम् ।

सिंहद्वादशांशगतःचन्द्रात् वनचरः,सिंहः,व्याघ्रः,मृगः,छागल प्रभृतिवियोनीनाम्

वृश्चिकद्वादशांशगतः चन्द्रात् सर्प-वृश्चिकादि सरिसृपाणां वियोनीनाम् ।


धनुद्वादशांशःउत्तरार्द्धगतःचन्द्रात् घोटक-खचर-गर्न्धवादि वियोनीनाम् ।

मकरद्वादशांशःपूर्वार्धगतः चन्द्रात् मृगादीनां जन्मः।

मीनद्वादशांशगतः चन्द्रात् मत्स्य प्रभृति वियोनीनां जन्मः।

एतत् विचारात्परमेव प्रकारान्तरेण पुनः वियोनिज्ञानं चर्चां कुर्मः। यथा बलयुक्ताः पापग्रहाः स्वनवांशे , शुभग्रहाः निर्बलाः सन्तः अन्यग्रहस्य नवांशे तथा लग्नं वियोनि संज्ञकः(मेषः,वृषः,कर्कः,वृश्चिकः इत्यादयः) स्यात्तदा चन्द्रस्य द्वादशांशसदृशः वियोनिः स्यात् । विषयोऽयं पठनात्परमेव

एकेन लघुउदाहरणेन स्पष्टतां कुर्मः।




अस्यां कुण्डल्यां वृश्चिकराशिः नवांशलग्नत्वेन स्वीकृतः । इत्यत्र शनिभौमौ पापग्रहौ स्व स्व नवांशे एव । गुरुशुक्रौ स्व नीचराशिगतौ तथा परनवांशगतौ। चिन्तयामः यत् चन्द्रमा द्वादशांशकुण्डल्यां कर्कटराशिगतः। अस्यां परिस्थितौ कर्कटद्वादशांशे चन्द्रे कर्कटादि वियोनीनां जन्मःस्यात् ।

## ३.६ बोधप्रश्नाः-

१) मकरराशेः कतिभागः वियोनि ज्ञानार्थं प्रयुक्तः ?


२) कस्य ग्रहस्य द्वादशांशवशात् वियोनि ज्ञानं भवति ?

३) वृश्चिकद्वादशांशगते चन्द्रे कीदृशप्रकारकाः वियोन्यः उत्पद्यन्ते ?

४) वियोनि जन्मस्य प्रथमयोगः कः ?

## ३.७ वियोनि शरीरे राशि स्थापनप्रकारः एवंञ्च तस्य वर्णः विचारः

अध्येतारः! यथा अस्माभिः पूर्वं आलोचितं यत् कालपुरुषस्य अङ्गे राशि-स्थापन प्रकारः । तथैव वियोन्यङ्गे अपि राशिस्थापन प्रकारस्य चर्चां कुर्मः। वियोनिषु पशुजातीनां प्राधान्यात् तदङ्गे एव राशिन्यासः रेखाचित्रात् एव अवगच्छामः।



मेषः-शिरः, वृषः-मुखः,ग्रीवा च, मिथुनः-अग्रपादद्वयं तथा स्कन्धभागः, कर्कटः- पृठभागः , सिंहः -हृदयस्थानं (छाति), कन्या-पार्श्वद्वयं , तुला - उदरभागः, वृश्चिकः-गुदास्थानं ,धनुः-पश्चात्पार्श्वस्थितपादद्वयं , मकरः- लिंग तथा अण्डकोष स्थानं , कुम्भः-स्फिक् (गुदा का दोनो भाग), मीनः-पुच्छः। इदानीं वियोन्यङ्गे राशिस्थापनप्रकारस्य शास्त्रीयवचनं श्लोक रूपेण लिख्यते । तद्यथा -

क्रियः शिरो वक्त्रगलो वृषोऽन्ये पादांसकं पृष्ठमुरोऽथ पार्श्वे ।
कुक्षिस्त्वपानोंऽघ्रयथ मेढ्रमुष्कौ स्फिक्पुच्छमित्याह चतुष्पदाङ्गे।।
(वि.जन्म ३/०३)

## ३.७.१ वियोनि वर्णविचारः-

प्रिय अध्येतारः ! एतावत् पर्यन्तं वियोनेः सृष्टिः, तस्य वियोनेः विभन्निषु अङ्गेषु राशिस्थापनप्रकारः इत्यादि विषये वयं पठितवन्तः। अधुना वियोनीनां वर्ण

विचारान् वयं कुर्मः ।

यः ग्रह लग्ने स्यात् । तस्य ग्रहस्य यः वर्णः तदनुसारं एव वियोनेः वर्णःस्यात् । यदि लग्ने ग्रहस्य अभावःस्यात् तदानीं तस्यां परिस्थितौ लग्नस्योपरि यस्य ग्रहस्य दृष्टिः, तस्य वर्णानुसारं वियोनेः वर्णः स्यात् । यदि लग्ने ग्रहाभावः, लग्नस्योपरि कस्यापि ग्रहस्य दृष्टेरभावःस्यात्तदानीं लग्नगतः नवांशराशेः वर्णानुसारं तस्य वियोनेः वर्णः स्यात् । अधिकाधिक ग्रहाणां दृष्टिः युतिः वशात् च अनेकवर्णयुक्तः वियोनयः भवन्ति । पुनश्च अधिक ग्रहेषु दृष्टेषु यः ग्रहः बलवान् तस्य वर्णानुसारमपि वियोनेः वर्णःभवेत्। इत्यत्र विशेषः- तथा ज्ञायते यत् सप्तमस्थाने स्थितः ग्रहानुसारं वियोनेःपृष्ठभागे (पीठ पर) रेखाःभवन्ति ।

## ३.८ बोधप्रश्नाः-

१) वियोन्यङ्गे मेषराशिः कस्य अङ्गस्य कृते निर्णतः ?

२) वियोनिषु कस्य जातेः प्राधन्यता स्वीकृताः ?

३) वियोनि इत्यस्य वर्णज्ञानाय नियम द्वयं लिखतु ?

४) वियोन्यङ्गे पृष्ठभागस्य कृते कः राशिः निर्दिष्टः ?

५) कस्यां परिस्थितौ वियोनीनां पृष्ठभागे रेखाः भवन्ति ?

## ३.९.ग्रहयोगवशात् पशुः स्थलाम्बुज वृक्षादीनां उत्पत्ति विचारः।

प्रिय जिज्ञासवः! वियोनेःजन्मज्ञानाय प्रमुखतया प्रश्नकुण्डली एव शरणम् ।तत्र कुण्डल्यां चतुर्थभवनाधिपतिः लग्ने स्यात् एवं षष्ठभवनाधिपतिः चतुर्थे स्यात्तदा चतुष्पाद् नाम पशुजन्मः भवति । इति प्रथमयोगः । द्वितीय योगस्तु-

लग्नेशःचतुर्थेशःवा क्रमेण राहुणा केतुना च युक्ते (लग्नेशः राहुणा ,चतुर्थेशः केतुना ) पशुर्जन्मः अनिर्वाज्य रुपेण भवति ।

तृतीय योगः- तत्काललग्ने शुक्रण दृष्टे सति गौ जन्मः भवति । तत्काललग्नं


शनैश्चरेण दृष्टः युक्तो वा स्यात्तदा महिषस्य जन्मः । तत्काललग्ने राहुकेतू युते दृष्टे वा मेषादि जीवानां जन्मः । अन्तिमे यदि तत्काललग्नं पापग्रहेण

(सू. ,मं.,क्षीणचन्द्र,पापयुतः बुधः )प्रभावितः युतो वा स्यात्तदा अन्ये पशवः जन्मं नयन्ति ।

## ३.९.१.- अधुना पक्षीजन्मज्ञानं विचारयामः।

पाठकाः ! अस्य पाठस्यारम्भात् प्रागेव वयं नूनं जानीयुः यत् के तावत् पक्षी द्रेष्कणाः ? सर्वादौ तस्य निरूपणं एव कुर्मः । तद्यथा–

| | |
|---|---|
| मिथुनराशेः | द्वितीय द्रेष्काण : |
| सिंहराशेः | प्रथम द्रेष्काणः |
| तुलाराशेः | द्वितीय द्रेष्काण : |
| कुम्भराशेः | प्रथम द्रेष्काण : |




रेखाचित्रात् अपि पक्षीद्रेष्काणस्य ज्ञानं छात्राःकर्त्तुं प्रभवन्ति । पक्षीजन्म – ज्ञानाय योगत्रयं लिख्यते –

१) तात्कालिकलग्ने यदि पक्षी द्रेष्काणः स्यात् ।

२) तात्कालिकलग्ने चरराशेः(१,४,७,१०)नवांशः स्यात् । तस्मिन् बलवान् ग्रहयुक्तः स्यात्तदा तस्य ग्रहानुसारं वियोनेः सृष्टिः ।

३) बुधस्य नवांशः(मिथुन ,कन्या )लग्ने स्यात् । एवं तस्मिन् यदि बलवान् ग्रहःस्यात्तदा पक्षी जन्मं भवति ।

उपरोक्त योगत्रयेषु यदि शनैश्चरस्य दृष्टिः युतिमात्रं वा स्यात्तदा स्थलचर

(पक्षी)जीवोस्योत्पत्तिः। चन्द्रस्य दृष्टिः युतिःउपरोक्त योगत्रयेषु स्यात्तदा जलचर पक्षीविशेषाः उत्पद्यन्ते ।

## ३.९.२ वियोनीनां संख्या निरूपणप्रकारः -

तत्र वृक्षजन्मप्रकारः ज्ञानाय तत्काले लग्न-चन्द्रमा-बृहस्पति-सूर्यादयः निर्बलाःस्युःतदा तरूणां जन्मः।लग्ननवांशः जलराशौ स्यात्तदा जलवृक्षस्योत्पत्तिः।लग्ननवांशःस्थलराशौ स्यात्तदा स्थलवृक्षस्योत्पत्तिः।एवमेव स्थलराश्याधिपः जलराश्याधिपः च लग्नात् यावत् संख्यक राश्यभ्यन्तरे तिष्ठन्ति तावत् संख्यकाः वृक्षाःभवन्ति । अपिच ग्रहः यदि स्व नवांशे वर्गोत्तमे नवांशे स्यात्तदा आगतासंख्या द्विगुणिता क्रियते । उच्च तथा वक्रगतिके ग्रहे त्रिगुणित वृक्षसंख्याःभवन्ति ।

## ३.९.३ बोध प्रश्नाः

१) वियोनि जन्मज्ञानाय कीदृशी ग्रहस्थितिःअपेक्षिता ?

२) अनिर्वाज्यरूपेण पशुजन्मस्य एकं योगं लिखतु ।

३) तत्काललग्ने राहुः केतुःवा युते दृष्टे केषां जीवानां उत्पतिः ?

४) कस्य कस्य राशेः द्वितीयद्रेष्काणःपक्षीद्रेष्काणसंज्ञकः।

५) जलचरपक्षी उत्पन्नःयोगस्य लक्षण द्वयं लिखतु ।

६) द्विगुणितवियोनीनां जन्मः कस्यां परिस्थितौ भवति ?

## ३.१० स्थलजलजांश स्वामिवशात् वृक्षाणां विशेष जन्मयोगाः-

प्रिय छात्राः! अस्मिन् पाठे भवन्तःक्षारकण्टकादि वृक्षाणां उत्पत्तिः कस्मिन् ग्रहयोगे भवति एतस्य ज्ञानं प्राप्स्यन्ति । इत्यत्र शास्त्रीयविचारं सर्वप्रथमं उपस्थाप्यते । तद्यथा -

अन्तःसारान् जनयतिरविर्दुर्भगान् सूर्यसूनुः

क्षारोपेतांस्तुहीनकिरणः कण्टकाढ्यांश्च भौमः।
वागीशज्ञौ सफलविफलान् पुष्पवृक्षांश्च शुक्रः
स्निग्धानिन्दुः कटुकविटपान् भूमिपुत्रश्च भूयः।।

(जा.पा. ९/३)

तात्कालिक लग्ननवांशाधिपतिः सूर्यः स्यात्तदा शिशपादीन् (मध्य-दृढयुक्तः) वृक्षान् जनयति। शनिःस्यात्तदा दुर्गन्धयुक्तःवृक्षाणां सृष्टिः। चन्द्रमा स्यात्तदादुग्धयुक्तःतथा रसालवृक्षणां सृष्टिः। मङ्गलःस्यात्तदा कण्टक वृक्षाणां (बेल, निम्बु) सृष्टिः। बृहस्पतिःयुक्तःस्यात्तदा फल युक्तवृक्षान्(आम्र, लिचु, रम्भा) जनयति। बुधःस्यात्तदा विना फलयुक्त वृक्षाणां सृष्टिः। शुक्र स्यात्तदा पुष्पवृक्षाणां (चमेली, चम्पा, प्रभृति) सृष्टिः। तत्र विशेष रुपेण चन्द्रमा पुनः स्निग्धान् चिक्कणान् वृक्षान् उत्पादयति। भौमः च कटुक विटपान् वृक्षान् उत्पादयति।

तत्र स्थलजनवांशाधिपतिः शुभग्रहः अभीष्ट विचारितसमये पापग्रहराशिगतः स्यात्तदा देववृक्षाणां उत्पतिः अशोभनभूमौ भवति। एतस्य

विपरीतयोगः भवति – यदि पापग्रहाःशुभराशौ स्थिताः स्युः तदा अशोभन वृक्षाः सुन्दरभूमौ भवति। स्पष्टरुपेण चिन्तयामः तदा शुभ राशौ शुभ ग्रहाः शुभवृक्षाणां उत्पत्तिः शोभनभूमौ कारयन्ति। अशुभराशौ अशुभग्रहाःअशोभनभूमौ अशुभ वृक्षान् उत्पादयन्ति।

## ३.११ बोधप्रश्नाः-

१) कस्मिन् ग्रहयोगे कण्टकयुक्त वृक्षाणां उत्पत्तिः ?

२) शिशपादि वृक्षाःकस्य ग्रहस्य प्रभाव वशात् उत्पद्यन्ते ?

३) चन्द्रमा कीदृश वृक्षान् उत्पादयति ?

४) देववृक्षाणां उत्पत्तिः कथं भवति ?

## ३.१२ संक्षिप्त उत्तरमूलकप्रश्नाः-

१) वियोनि शब्दात् केषां अवबोधः ?

२)	जलचरराशिगते चन्द्रे केषां उत्पत्तिः ?

३)	मेष द्वादशांशगतः चन्द्रात् कस्य वियोनिजातेःउत्पत्तिः ?

४)	धनुर्द्वादशांशस्य उत्तरार्धगते चन्द्रः——— वियोनेः जन्मः ।

५)	वियोनेः शीर्षः कस्य राशौ तिष्ठति ?

६)	तुलाराशिः वियोन्यङ्गे कस्य स्थानस्य कृते निर्दिष्टः ?

७)	वियोनेः वर्णः कथं ज्ञायते ?

८)	वियोनि पृष्ठभागे रेखाःभवन्ति ।कस्य भावस्य स्थित्यनुसारम् ?

९)	मिथुनराशेः कः द्रेष्काणः पक्षीद्रेष्काणः ?

१०)	कयोःराशिद्वयोयोः प्रथमद्रेष्काणःपक्षीद्रेष्काणः इति उच्यते ?

११)	पक्षीजन्म ज्ञानाय योगमेकं लिख ।

१२)	लग्ननवांशे जलराशिः स्यात्तदा कीदृश वृक्षाणां उत्पतिः ?

१३)	द्विगुणित वियोनीनां जन्मः कस्यां परिस्थितौ भवति ?

१४)	कः ग्रह पुष्पवृक्षान् उत्पादयितुं समर्थः ?

१५)	विनाफलयुक्तः वृक्षःकः ग्रहःउत्पादयति ?

३.१३ नातिदीर्घोत्तरमूलकप्रश्नाः

१)	वियोनीनां संख्या निरूपणं सम्यक् विचारयत ।

२)	वृक्षाणां विशेष जन्मयोगाः निरूप्यताम् ।

३)	वियोनि वर्णविचारः सम्यक् विचारं कुरु ।

## ३.१४ दीर्घोत्तरमूलकप्रश्नाः

१) वियोनि जन्मयोगाः सोदाहरणं निरूपयत ।

२) कस्मिन् ग्रहयोगे क्षार,कटुकादिवृक्षाः उत्पद्यन्तेः ?सोदाहरणं व्याख्या कुर्या

## ३.१५संक्षिप्त प्रश्नानां उत्तराणि

१)पशुपक्षीवृक्षादयः २)जलचर जीवानां उत्पत्तिः ३)मेषाणाम् ४)घोटक खचरादि

५)मेष ६)उदर ७)लग्नस्थ ग्रहवर्णानुसारम् ८)सप्तमभावस्य

९)द्वितीयः १०)सिहः,कुम्भः ११) तात्कालिकेलग्ने पक्षीद्रेष्काणे सति १२) जलवृक्षाः १३)नवांशे वर्गोत्तमनवांशे स्थिते ग्रहे १४)शुक्रः १५)बुधः

————

❖❖❖

# तृतीयपाठ्यसूची (द्वितीय भागः)

| क्रं.सं. | | पृ.सं |
|---|---|---|


३.२.१ प्रस्तावना

३.२.२ पाठस्य उद्देश्यानि

३.२.३ निषेकविधेः विचारपूर्वकं गर्भधारण लक्षणं निरुपणम् ।

३.२.३.२ स्त्रीणां ऋतुकालसमयःतदनुरोधेन गर्भाधानकाल निरूपणम

३.२.४ बोधप्रश्नाः

३.२.५ आधानकालानुसारेण स्त्रीपुरुषयोः मृत्युपदयोगाः

३.२.५.१ पुरुष –स्त्री –क्लीव तथा यामलप्रभृति जन्मयोगाः

३.२.६. बोधप्रश्नाः

३.२.७ सर्पवेष्टितः जन्मयोगाः, बहुकालप्रसवयोगाः,तथा पितृपरोक्षे जन्मयोगानां निरुपणम् ।

३.२.७.१ बहुकालःप्रसव–ज्ञानम्

३.२.७.२ पितुः प्रत्यक्षे परोक्षे वा जन्मज्ञानम्

३.२.८ बोधप्रश्नाः

३.२.९ शिशोःप्रसवस्थान निरूपणं,सूतिकागृहे दीपद्वारादि ज्ञानं, गृहस्व रूपविचारः

३.२.९.१ सूतिकागृहे दीपज्ञानम्

३.२.९.२ सूतिकागृह स्वरूपम्

३.२.१० बोधप्रश्नाः

३.२.११ जातस्य स्वरूपं तथा जाताङ्गे चिह्नज्ञानप्रकारः

३.२.११.१ जातकस्य शरीरे द्रष्काणविभागवशात् भावानां त्रिधा विभजनम् :–

३.२.११.२ जाताङ्के चिह्नस्य निरूपणम्

३.२.१२ बोधप्रश्नाः

३.२.१३ संक्षिप्तउत्तरमूलकप्रश्नाः

३.२.१४ नातिदीर्घ उत्तरमूलक प्रश्नाः

३.२.१५ दीर्घोत्तरमूलक प्रश्नाः

३.२.१६ वस्तुनिष्ठ प्रश्नानां उत्तराणि


❖❖❖

# तृतीयपाठ द्वितीयभागः

## ३.२.१प्रस्तावना :-

*"जातस्य हि ध्रुवो मृत्युः" इति विधिवाक्येन सुषष्टं भवति यत् यः जन्मं नयति तस्य मृत्युः सुनिश्चितः। अतः इयं क्रिया दैवाधीना । चराचरे विश्वे जन्मः ततः मृत्युः चक्राकारत्वेन प्रचलति । तत्र जन्मनिमित्तं योगस्य आवश्यकता वर्तते । योगः तु ग्रहाधीनः। गर्भधारणं कर्त्तुं उभयोः स्त्रीपुरुषयोः आवश्यकता अस्ति । कस्यापि एकस्य अभावे नारी गर्भधारणं कर्त्तुं अक्षमा भवति । अतः अस्य पाठस्य पठनात्परमेव छात्राणां निषेकविधेः (गर्भाधानस्य) सम्यक् ज्ञानं भविष्यतीति विश्वासः।*

## ३.२.२पाठस्य उद्येश्यानि –

*१) निषेकविधेः सम्पूर्ण ज्ञानं स्यात् ।*

*२) क्लीवादि विविध योगानां ज्ञानम् ।*

*३) जन्मस्य विविधानां अवस्थानां अववोधनम् ।*

*४) सूतिकागृहः विचार–ज्ञायम् ।*

*५) जन्मितशिशोःअङ्गेषु चिह्नानि ।*

*६) अद्यतने समाजे अस्मिन् विषये जनानां सम्यक् अववोधः स्यात् ।*

## ३.२.३ निषेकविधेः विचारपूर्वकं गर्भधारण लक्षणं निरूपणम् ।

*प्रिय जिज्ञासवः! पाठस्य आरम्भात् पूर्वं निषेकशद्वेन अस्माकं कीदृशः अनुभवः अस्ति तदधुना विचारं कुर्मः। तत्र निषेकशद्वात् अयं वोधो भवति यत् गर्भाधान विषयिणी चर्चा । गर्भाधानार्थं काचित् स्त्री गर्भधारणक्षमा वर्त्तते न वा एतस्य ज्ञानं परमावश्यकम् ।इतः पूर्वं गर्भधारणनिमित्तं स्त्रीणां मासिकःऋतुः भवति । प्रत्येकः ऋतुः गर्भधारणयोग्यः न भवति । परन्तु बालिकाः यदा*

त्रयोदशवर्षात् पञ्चदशवर्षाभ्यन्तरे तिष्ठन्ति तदा तेषां आद्यऋतुः भवति । अस्मात् अनुमीयते यत् इयं बाला गर्भधारणयोग्या अयोग्या वा । प्रतिमासं स्त्रीणां यदा मासिकःधर्मःभवति (यद्रजः निःसरति ) तस्य प्रमुखं कारणं अस्माकं ग्रहमण्डलीया स्थितिः । तत्र चन्द्रभौमौ कारणौ । यतः चन्द्रःजलतत्वसम्पन्नः ग्रहः । भौमः अग्नितत्व सम्पन्नग्रहः । तत्र जलमेव रक्तं तथा अग्नेरेव पित्तं उत्पादयति । यदा पित्तेन रुधिरः आलोडितः भवति तत्तु रजोरुपेण (दूषितरक्तः) योनि मार्गात् वहिः आगच्छति । तदेव लोके स्त्रीणां रजोदर्शनं इति स्पष्टोक्तिः ।

### ३.२.३.१ स्त्रीणां गर्भधारणयोग्यः ऋतुकालविचारः-

प्रिय पाठकाः ! अस्य विषयस्य सम्यक् धारणा अस्माकं सवेषां नूनं भवेत् । तदधुना विचारयामः । यदा चन्द्रमा स्त्रीया जन्मराशेः अनुपचय राशिः(१,२,४,५ ,७,८,९,१२) गते भौमेन दृष्टे सति यद्रजस्रावः भवति त्तु गर्भधारणयोग्यः ऋतुत्वेन स्वीक्रियते । ततः पुरुषः जन्म राशितः गोचरराशिःगतः चन्द्रःउपचयः (३,६,१०,११)भावगतः स्थात् । एवं तादृशः उपचयभावस्थितः चन्द्रोस्योपरि बृहस्पतेः दृष्टिः स्यात्तदा तस्यां परिस्थितौ नरेण साकं कामिनीः संयोगं कुर्यात् । तादृशं मैथुनं गर्भाधानयोग्यः मैथुनत्वेन स्वीक्रियते ।

### ३.२.३.२ स्त्रीणां ऋतुकालसमयःतदनुरोधेन गर्भाधानकाल निरूपणम् :-

पाठकाः ! ऋतुकालस्य स्पष्टनिरूपणं विना सन्तानउत्पत्तिः समीचीनं न भवति । इत्यत्र जातकपारिजातस्य सन्दर्भानुकुलं वचनं यथा –

“विभावरीषोडश भामिनीनामृतूद्गमाद्या ऋतुकालमाहुः ।
नाद्याश्चतस्त्रोऽत्र निषेक योग्याःपराश्चयुग्माःसुतदाः प्रशस्ताः ।।
(जा.पा. ३/१४)

अस्यार्थं एवं निरुपयितुं शक्यते यत् स्त्रीणां रजोदर्शनं प्रारम्भदिनात् षोडश रात्रि पर्यन्तं ऋतुकालः भवति । तत्र च प्रथम चतस्त्र रात्रयः निषेकस्य कृते

निषिद्धाः सन्ति । अन्ये द्वादश रात्रयः। तेषु युग्म (६,८,१०,१२,१४ ,१६)रात्रयः सूतदाः नाम पुत्रप्रदाः। अन्ये अयुग्माः(५, ७,९, ११, १३, १५)रात्रयः कन्याप्रदाः भवन्तिः। उपर्युक्त द्वादशरात्रिषु कस्यां कस्यां परिस्थितौ निषेकःन कुर्यादिति विशेष वचनं एकैकं आलोचयामः।

१)त्रिविध गण्डान्तनक्षत्रेषु (अश्विनी,मूला,मघा,नक्षत्रणां आद्यदण्डत्रयं) (रेवती,आश्लेषा,ज्येष्ठा नक्षत्राणां अन्तिमपञ्चदण्डाः) निषेकःनैव कर्त्तव्यः।

२)पितुःश्राद्ध दिवसे ।

३)निधननक्षत्रे , जन्मनक्षत्रे च ।

४)वैधृति–व्यतिपात पातं विहाय ।

५)व्रते ,उपवासे ,भद्रासमये, षष्ठी इत्यादि विविध निषिद्धदिवसाः।

## ३.२.४–बोधप्रश्नाः

१)निषेकशब्दस्य कोऽर्थं ?

२)गर्भधारणेकयोः प्राधान्यता अस्ति ?


३)जलतत्वप्रधानः ग्रहः कः ? तस्मात् किं जायते ?

४)अग्नितत्वप्रधानः ग्रहः कः ? तस्मात् किं जायते ?


५)गर्भाधानार्थं कति दिवसाःस्वीकृताः ?

## ३.२.५ आधानकालानुसारेण स्त्रीपुरुषयोः मृत्युपदयोगाः–

अध्येतारः! निषेकविधेः ज्ञानात्परं स्त्रीपुरुषयोः रोगः तथा मृत्यु ः विषयाणी चर्च्चां वयं कुर्मः। अयं विचारःगर्भाधानकालात् प्रसवसमयपर्यन्तं भवति । तत्तु आधानःतथा प्रश्नकुण्डल्यनुसारं विचारं भवति । अस्य ग्रह योगः यथा – सूर्यात् चन्द्रात् च क्रमेण भौमशनी सप्तमभावगतौ स्यात्तां तदा पुरुषस्य स्त्रियाः च कृते रोगप्रदः । स्पष्टाववोधनार्थं कुण्डली लिख्यते।




पुरुष रोगप्रद कुण्डलि




स्त्री रोगप्रदः योगः


इदानीं स्त्रीपुरुषयोः मृत्युप्रदयोगस्योपरि आलोचनां कुर्मः। चन्द्रात् उभयत्र यदि भौमशनैश्चरौ स्यात्तां तदा स्त्री मरणं भवति । सूर्य उभयतः यदि शनिभौमौ स्यात्तां तदा पुरुषस्य कृते मृत्युप्रदः भवति । अत्र एवं मनसि निध्यातव्यं यत् सूर्येण भौमशनैश्चरौ युतौ तथा च चन्द्रेण भौमशनैश्चरौ युतौ स्यात्तां ,दृष्टिः अपि स्यात् तदा क्रमेण पुरुषस्य स्त्रियाः वा मरणम् । एतेषु यः ग्रहः बलीयान् सः स्व मासे एव रोगादिकं उत्पादयति ।विषयस्य स्पष्टयर्थं कुण्डलीं उपस्थाप्यते ।




मृत्युप्रदःस्त्री योगः



मृत्युप्रद पुरुष कुण्डलि



### ३.२.५.१ पुरुष -स्त्री -क्लीव तथा यामलप्रभृति जन्मयोगाः

प्रिय अध्येतारः! एतावत् पर्यन्तं निषेकविषये वयं आलोचितवन्तः । अधुना आलोचयामःस्त्रीपुरुषयोः जन्मयोग विषये । एतस्य विचारः आधान- कालिक कुण्डल्यनुसारं ,प्रश्नकालिक कुण्डल्यनुसारं वा कर्त्तुं शक्यते । तत्र सर्वादौ पुरुषजीवोत्पत्तियोगाः-


१)विषमराशौ विषमनवांशे लग्न -गुरु -सूर्य -चन्द्राणां स्थितिः पुरुषजीवोत्पति कारकः ग्रहयोगः।

२)तथैव लग्न -गुरु-सूर्य -चन्द्राणां स्थितिः यदि समराशौ समनवांशे वा स्यात्तदा स्त्रीजीवोत्पतिः भवति।


३)गुरुसूर्यौ विषमराशिनवांशगतौ तथा चन्द्र-मङ्गल-शुक्राःसमराशि नवांशगताः सन्तः क्रमेण पुरुषस्य,स्त्रियाः च उत्पत्तिः भवति ।

४)सूर्य-चन्द्र-मङ्गल -गुरु-शुक्राः द्विस्वभाव राशिनवांशगताःबुधेन अवलोकिताःयमल योग कारकाः।

५)द्विस्वभावस्य पुरुषांशे (३/९) गुरुसूर्यौ स्यात्तां तदा यमलः पुत्रजन्मः भवति । अपिच द्विस्वभावे स्त्रीनवांशे चन्द्र-मङ्गल-शुक्राः स्युः तदा यमल कन्याजन्मयोगः भवति । तत्र विशेषरूपेण योगद्वयं सम्भाव्यते तदा एकः पुत्रःएका च कन्या । तत्र पुरुष -स्त्री-यमल योगान् स्पष्टरुपेण अववोधयितुं कुण्डल्याः निर्माणं भवति । तद्यथा





| (पु. जन्मयोगः) | (स्त्री जन्मयोगः) |
|---|---|
| सूर्यः-४/०३ | लग्न-१/०९ |
| गुरु-८/०९ | सूर्यः-१०/०६ |
| चन्द्र-१०/०३ | गुरुः-३/०५ |
| लग्न-१/०२ | चन्द्रः १/०२ |
| शनिः-६/०३ | मङ्गल-७/०३ |
| | शनिः-९/०९ |
| | शुक्र-११/१० |




पुरुष जन्म कुण्डली

स्त्रीजन्म कुण्डली




श

जमल जन्म कुण्डली

अस्यां कुण्डल्यां रविः २/२७ं,गुरुः –११/१९,स्थितःत्वात् यमलपुरुषः जन्मयोगः। चन्द्रमा–१/२८ं, शुक्रः – ४/२९ं ,मङ्गलः–७/०९ं, स्त्रीनवांशे स्थितःत्वात् यमलकन्या जन्मयोगः ।

इदानीं क्लीवयोगान् निरुपयामः। तत्र क्लीवशब्दात् अयं वोधो भवति यत् यः सन्तान उत्पादयितुं अक्षमः । यथा अन्धस्य कृते चन्द्रदर्शनं दुष्करं तथैव नपुंसकस्य कृते सन्तानोत्पत्तिः दुष्करं एव ।क्लीवयोगाःवहुविधाः सन्ति । तेषु षट् (६) योगाः प्रमुखाः। तदधुनाआलोचयामः । तत्र सर्वप्रथमं क्लीवयोगः प्रतिपादकःशास्त्रीयवचनं निरूपयामः। तद्यथा–

अन्योन्यं यदि पश्यतःशशिरवी यद्यार्कि सौम्यावपि
वक्रो वा समगं दिनेशमसमे चन्द्रोदयौ चेत्स्थितौ
युग्मौजर्क्षगता वपीन्दुराशिजौ भूम्यात्मजेनेक्षितौ
पुंभागे सितलग्न शीतकिरणाः षट् क्लीवस्त्विमे ।।

(जा.पा.–३/२३)

प्रथमयोगः– चन्द्रसूर्यौ क्रमेण समविषम राशिगतौ अन्योन्यं परस्परं पश्यतः तदा क्लीवयोगः ।

द्वितीययोगः– शनिबुधौ क्रमेण समविषम राशिगतौ परस्परं पश्यतः तदा क्लीवजन्मयोगः ।


तृतीययोगः– भौमः विषमराशिगतः, सूर्यःसमराशिगतः,एवञ्च उभयोःअन्योन्यदृष्टिः क्लीवं उत्पादयति ।

चतुर्थयोगः– चन्द्रःलग्नं च विषमेराशौ स्यात् तस्योपरि समराशिस्थ भौमस्य दृष्टिःस्यात्तदा क्लीवस्य सृष्टिः ।

पञ्चमयोगः– यत्र कुत्रचित् समविषम राशिस्थितौ चन्द्रबुधौ मङ्गलेन दृष्टः सन् क्लीवं उत्पादयति ।

षष्ठयोगः– तात्कालिके लग्ने शुक्रःलग्ने स्यात् । चन्द्रमा यत्र कुत्रचित् (समे वा विषमे ) तिष्ठतु नाम,अवश्यं विषम नवांश गतः स्यात् चेत् नपुंसकयोगस्य लक्षणम् ।

छात्राः! इत्यत्र भवतां सौकर्यार्थं सुगमतया अवबोधनार्थं च उदाहरणमेकं प्रस्तूयते । उदाहरणम् –




इत्यत्र कुण्डल्यां चं एवं सूं लेखनस्य कारणं भवति एकस्मिन् कुण्डल्याम् एकाधिक योगानां प्रदर्शनार्थम्।

## ३.२.६. बोधप्रश्नाः–

१–आधानकालिकाः के ग्रहाः पुरुषस्य कृते रोगप्रदाः?

२–कः ग्रहः सप्तमभावगतः स्त्रियाः रोगप्रदः भवति ?

३–एकस्य यामलयोगस्य ग्रहयोगं लिखतु ?

४–द्वयकन्या जन्मयोगं निरूपयत ?

५–समविषमभावगतौ कौग्रहौ अन्योन्यं दृष्टेः सति क्लीवयोगः भवति ?

## ३.२.७ – सर्पवेष्टितःजन्मयोगाः, बहुकालप्रसवयोगाः, तथा पितृपरोक्षे जन्मयोगानां निरूपणम् ।

एतत् पर्यन्तं अस्माभिःआलोचितं पुं स्त्री नपुंसकादि योगानां विषये । परन्तु किञ्चित् वयं अग्रेसरामः । अधुना अस्माकं आलोचितः विषयः सर्प –वेष्टितः जन्मयोगः । सर्पशब्देन अस्माकं मनस्तु भयं उत्पद्यते । परन्तु इत्यत्र सर्पशब्देन बहुःविशिष्टनालेन वेष्टितो भवति जातकः । तर्हि कस्मिन् योगे एतादृशी स्थितिः शिशोः जायते, तदधुना अस्माकं विचारितविन्दुः । तत्तु एकैकं विचारयामः ।

प्र.यो.– लग्ने राहुअष्टमेशयोः मिलितस्थितिः । नालवेष्टित ः जन्मं सूचयति।

द्वि यो.– लग्ने पापग्रहःएवञ्च अष्टमेशः उभयोः स्थितियोगः ।

तृ यो.– केन्द्रे (१,४,७,१०) राहुः, लग्नेशः गुलिकेन अष्टमेशेन वा युक्तः, तथा लग्ने पापद्रेष्काणे साति सर्पवेष्टित शिशोः जन्मः ।

च.यो. – लग्नस्य द्रेष्काणे अण्डजः (सिंहस्य प्रथमद्रेष्काण ः), सर्पः (कर्कस्य द्वितीयः, मीनस्यतृतीयः, वृश्चिकस्य प्रथमद्रष्काणः) कोलः – (सुकरः– मकरस्य प्रथमद्रेष्काणः) स्यात् एवं द्रेष्काणःस्व अधिपतिना युक्तः,लग्नस्योपरि शुभ ग्रहाणां दृष्टेरभावः स्यात्तदा नालेन वेष्टितःभवति शिशुः ।

प.योः– चन्द्रः पापग्रहस्य राशौ लग्ने वा भवेत् ,भौमस्य द्रेष्काणे भवेत् ,शुभ– ग्रहाः द्वितीये एकादशे स्थाने स्थिताः स्युः तदा नालेन वेष्टितः भवति शिशुः ।

ष.योः – सूर्यः चतुष्पदराशिगतः अन्ये चन्द्रादि ग्रहाःद्विस्वभावराशिगताःस्युः तदा एकः जरायुः वेष्टितौ यमलौ उत्पद्येते ।

स.योः– मेषस्य ,सिंहस्य ,वृषस्य वा लग्नं स्यात् । तस्मिन् शनिः वा भौमः स्थितःस्यात् तदा लग्ननवांशस्य राशियुक्तःअङ्गमेव नालेन वेष्टितःभवति।


अ.यो. – लग्ने पापग्रहः स्यात् वा तस्योपरि पापदृष्टिः स्यात् वा पापग्रहाणां राशौ स्यात् तदा जातकः नालवेष्टितः भवति ।

### ३.२.७.१:बहुकाल:प्रसव-ज्ञानम्


*प्रिय जिज्ञासवः! नाल वेष्टितजन्म ज्ञानात्परमेव वयं आलोचयामः बहुकाल : प्रसव–ज्ञानस्य विषये। बहुकालः प्रसव –ज्ञानात् अयं वोधो भवति यत् गर्भाधान कालात् त्रि वर्षात्परं इतोप्यधिके काले सन्तानजन्मः। इयं कथा बहुकाल : प्रसवः शद्वेन उच्यते। अस्य शास्त्रीयं प्रमाणं यथा –*

*उदयाति मृदुभांशे सप्तमस्थे च मन्दे।*
*यदि भवति निषेकः सूतिरब्द त्रयेण ।।*
*शशिनि तु विधिरेषः द्वादशाब्दैःप्रकुर्यात्।*
*निगदितमिह चन्त्यं सूतिकालेऽपि युक्त्या ।।*
*(जा.पा ३/४४)*

*तत्र गर्भाधानकाले प्रश्नकाले वा चन्द्रमा यस्य राशेः यस्मिन् द्वादशांशे भवेत् तस्मात् द्वादशांश राशेःतत्तुल्यः राशिः सहिते तावन्मिते राशौ चन्द्रे अग्रत : विद्यमाने दशमे मासे सति प्रसवः भवति।यदि चन्द्रमायाः नवांशःआधान लग्ने स्यात् तथा चन्द्रमा सप्तमे स्थाने स्थितः स्यात्तदा शिशोः जन्मः द्वादशवर्षे भवति। सम्यक् अववोधनार्थं कुण्डल्यां प्रदत्ताग्रहस्थितिं अवलोकनीयम्।*




*(बर्षत्रयोः प्रसव योगः)*




*( द्वादशाद्वे प्रसवयोगः)*

### ३.२.७.२ *पितुः प्रत्यक्षे परोक्षे वा जन्मज्ञानम् –*

*पाठकाः! बहुकालः प्रसवज्ञानात्परमेव इदानी स्वपितुः उपस्थितौ सन्तान–*

*जन्मयोगः तथा पितुःपरोक्षे जन्मयोगस्य विचारं वयं कुर्मः। एतादृशी परिस्थितौ कीदृशी ग्रहस्थितिः स्यात् ?*

*यदि जातस्य शिशोः जन्मकुण्डल्यां चन्द्रमा लग्नं न पश्येत् तदा बालकस्य जन्मसमये तस्य पिता तस्मिन् स्थाने अनुपस्थितः आसीत् । तदानीं पिता स्वदेशे परदेशे वा आसीत् इति प्रश्नस्य उत्तरं यथा–*

*सूर्यःचरराशिस्थिते दशमस्थानात् अग्रे राशी द्वये (एकादश द्वादश भावस्थे)अथवा पृष्ठराशि द्वये (अष्टम ,नवम भावगते ) स्यात्तदा पिता* **विदेशे** *अस्ति ।अन्यच्च–अर्कः स्थिरराशिगतः सन् उपरोक्त योगःस्यात्तदा जातस्य शिशोःपिता स्वदेशे स्थितोऽपि स्व शिशोः जन्मकाले जन्मस्थाने अनुपस्थितः स्यात् इति। एतादृशी स्थितिःयदि द्विस्वभावराशिगते सूर्ये मध्यलग्नात् राशिद्वयं अग्रे पृष्ठे वा स्यात्तदा विदेशस्वदेशयोः मध्यभागे जातस्य शिशोः पिता अस्ति इति ।*

### ३.२.८ बोधप्रश्नाः

*१. इत्यत्र सर्पशद्बेन कस्य बोधो भवति ।*

*२. सिंहस्य प्रथमद्रेष्काणःकिम् ?*

*३. कस्य राशेः द्रेष्काणः सर्पसंज्ञकः ? एकस्य नामं लिखतु।*

*४. बहुकाल प्रसवशद्बेन किं अवगम्यते ?*

*५. पितुःपरोक्षे जन्मविचारः कं ग्रहं आधारीकृत्य अस्ति ?*

## ३.२.९ शिशोःप्रसवस्थान निरूपणं,सूतिकागृहे दीपद्वारादि ज्ञानं,गृहस्वरूपविचारः

*प्रिय अध्येतारः! शिशोः जन्मस्थानं तस्य जीवनस्य कश्चित् महत्वपूर्णः अंशः। स्थानस्य प्रभावानुसारेण जातकस्य मानसिकतायाः विकाशःवौधिकतायाः च विकाशः भवति । उदाहरणरूपेण विचारयामः यत् कश्चित् शिशुः सुन्दरे पोरिवेशे*

तस्य वाल्यजीवनं निर्वाहं करोति । तादृशः शिशो ःव्यवहारः यथास्यात् तदा कलुषिते परिवेशे वर्धितः शिशोः न । अस्मात् वयं जानीमः स्थानस्य परिवेशस्य वा कीदृश ःमहत्त्वः। नवजात शिशोः जन्मस्थान निरूपणेन जन्मकालस्य ग्रहस्थितिः एव प्रमुखस्थानं अलंकरोति । तत्र पितृसंज्ञकौ शनिसूर्यौ जातके बलवन्तौ स्यात्तां तदा जातकस्य जननं पितुः गृहे एव भवति ।मातृसंज्ञकौ ग्रहौ चन्द्रशुक्रौ बलवन्तौ स्यात्तां तदा जातकस्य जन्मः मातु ःगृहे,मातृश्वसायाः गृहे वा भवति । शुभग्रहाः नीचराशिगताः स्युः तदा वृक्षस्य मूले ,काष्ठनिर्मिते गृहे, नदीतटे वा शिशोः जननं भवति । यदि लग्नं चन्द्रं च एकराशिस्थिताः अनेके ग्रहाः न पश्यन्ति तदा निर्जने स्थाने जननं इति अवगन्तव्यम् । यदि लग्नं चन्द्रं च एकराशिस्थिता : अनेके ग्रहाः पश्यन्ति तदा जनशंकुले स्थाने जननं इति वोध्यम् ।

### ३.२.९.१ सूतिकागृहे दीपज्ञानम् ।

इदानीं चर्चां कुर्मः सूतिकागृहे दीपज्ञान–विषये । अन्धकारं निवारयितुं दीपस्य आवश्यकता । जन्मं तु दैवाधीनम् । तस्यां परिस्थितौ सूतिका न ज्ञातुं प्रभवति यत् आलोकस्य अन्धकारस्य वा स्थितिः। प्रायः एते विषयाः लग्न शुद्धिर्निमित्तं आवश्यकम् । अधुना ग्रहस्थितिविषयं चर्चां कुर्मः।

यदि चन्द्रमा प्रारम्भनवांशे स्यात्तदा प्रसवसमये दीपे तैलस्य पूर्णता इति । जन्मकाले चन्द्रस्य अन्तिमनवांश स्थितिः दीपे तैलस्य अभावत्वं सूचयति। मध्यनवांशगते चन्द्रे अनुपातेन तैलस्य स्थितिविषयं अवगन्तव्यम् ।

अनेन प्रकारेण दीपे वर्त्तिकायाः स्थितिः अपि ज्ञातुं शक्यते । तत्र लग्नस्य आद्य नवांशे दीपे पूर्ण वर्तिका ,मध्यनवांशे अर्धज्वलिता वर्त्तिका ,अन्त्य नवांशे पूर्णज्वलिता वर्त्तिका इति अगन्तव्यम् । तद्वदेव सूर्यस्य चरराशिस्थितिः दीपस्य चञ्चलतां ,सूर्यस्य स्थिरराशिस्थिति ःदीपस्य स्थिरतां ,एवञ्च सूर्यस्य द्विस्वभावराशिस्थितिः चलायमानं दीपं प्रसूति गृहे अस्तीति अवगन्तव्यम् । सूर्यः

अष्टौ प्रहरे अष्टदिक्षुः परिभ्रमति । तस्मिन् समये सूर्यः यस्मिन् दिगे तिष्ठति तस्यां दिशायां एव दीपस्य स्थितिः । लग्नस्य यः वर्णः तदनुसारं एव वर्त्तिकायाःवर्णःस्यादिति । केन्द्रे ये ग्रहाःसन्ति तेषां दिगनुसारं एव सूतिकागृहस्य द्वाराणि भवन्ति । यदि केन्द्रे एकाधिकाःग्रहाःसन्ति तेषु यः ग्रहःअधिकःबलवान् तस्य या दिशा तदनुसारं एव सूतिकागृहस्य द्वारं भवति । केन्द्रे ग्रहाणां अभावःस्यात्तदा लग्नराशेःया दिशा अथवा लग्नस्य द्वादशांशे यः राशिः तस्य या दिशा तस्यां दिशायां एव सूतिकागृहद्वारं भवति।

## ३.२.९.२ सूतिकागृह स्वरूपम्

सूतिकागृहे दीपज्ञानं तथा द्वारज्ञानं वयं अधुना पर्यन्तं पठितवन्तः । एते विषयाः मुख्यतया लग्नशुद्धिःनिमित्तं प्रयुक्ताःसन्ति । परन्तु अधुना अस्माकं अलोच्य विषयः अस्ति सूतिकागृहस्वरूपम् । गृहस्वरूपं ज्ञातुं पद्यं यथा–

जीर्णं संस्कृतमर्कजे क्षितिसूते दग्धं नवं शीतगौ
काष्ठाढ्यं सुदृढं रवौ शशिसुते चानेक शिल्प्युद्भवम् ।
रम्यं चित्रयुतं नवं च भृगुजे जीवे दृढं मन्दिरम्
चक्रस्थैस्तु यथोपदेश रचनां सामन्तपूर्वां वदेत् ।। (जा.पा. ३/७२)

आधानलग्ने प्रश्नलग्ने वा यदि शनिःबलवान् तदा सूतिकागृहं पुरातनं इति ज्ञातव्याम् । मङ्गलःबलवान् तदा सूतिकागृहं अग्निना ज्वलितं स्यात् । चन्द्रःबलवान् तदा सूतिकागृहं नूतनं स्यात् । सूर्यः बलवान् स्यात्तदा सूतिका गृहं काष्ठेन निर्मितं स्यात् । बुधस्य बलत्वे शिल्पकलायुक्तः सूतिकायाःगृहं स्यात् । गुरोः सर्वाधिके बलत्वे दृढं सूतिकागृहं भवेत् । शुक्रस्य सबलत्वे सूतिकागृहं रम्यं चित्रयुक्तं च भवति । तत्र गुरुः यदि दशमभावगतः भवति तदा प्रसूतिः त्रिशाल (थ्रीस्टेयार)विशिष्टे गृहे भवति । दशमभावगतःगुरुः कर्कटराशिगतः नाम उच्चस्थःस्यात्तदा चतुःशाल (फोरस्टेयार) विशिष्टे गृहे प्रसवः भवति । गुरुः मिथुन,कन्या,मीनस्थे द्विशालविशिष्टं गृहं भवति । धनुराशौ सबलत्वे अपि त्रिशालविशिष्टे गृहे प्रसवः भवति । एवं लग्न चन्द्रयोःअन्तराले यावत् संख्यकाः ग्रहाःस्युः तावत्

संख्यका:उपसूतिका:(अन्य स्त्री जना:)सूतिकाया: पार्श्वे तिष्ठन्ति इति निश्चयार्थ: । ग्रहाणां वर्ण:अवस्थानुसारं उपसूतिकानां वर्णा: अवस्था: च भवन्ति । लग्नात् सप्तमभावपर्यन्तं अदृश्यचक्रार्धम् । तत्र ये ग्रहा: सन्ति तावत्य: उपसूतिका:सूतिकागृहस्य अन्त: तिष्ठन्तीति अवगन्तव्य: । ये ग्रहा: दृश्य चक्रार्धे सन्ति तावत्य: उपसूतिका:सूतिकागृहात् बहि:तिष्ठन्तीति वयं जानीम: ।

## ३.२.१० बोधप्रश्ना:

१) कौ ग्रहौ मातृसंज्ञकौ ?

२) प्रसवसमये दीपे तैलस्य स्थिति:,क: ग्रह: सूचयति ?

३) दीपस्य स्थति: कस्य ग्रहानुसारं भवति ?

४) शनैश्चरस्य बलत्वे सूतिकागृहं कीदृशम् ?

५) उच्चस्थ: गुरु: कीदृशे गृहे प्रसवं कारयति ?

६) केन्द्रे अधिका:ग्रहा: स्यु: तदा कस्यानुसारं सूतिका गृहद्वारं भवति ?

७) दृश्यचक्रार्धेन किमवगम्यते ?

## ३.२.११ जातस्य स्वरूपं तथा जाताङ्गे चिह्नज्ञानप्रकार:

एतावत् पर्यन्तं वयं आलोचितवन्त: निषेकाध्यायस्य विभिन्न अंशानां विषये । अधुना अस्य पाठस्य अन्तिमं विन्दुं एव चर्चां कुर्म: । तत्र सर्वादौ जातस्य स्वरुपं एव आलोचयाम: । प्रिय अध्येतार: ! ज्योतिषशास्त्रे किमपि विचारं भवतुनाम तत्र ग्रहयोग: एव प्रमुख: । इदानीं जातस्य स्वरुपविषये चर्चावसरे ग्रहस्थितिं आदौ निरूप्यते ।

लग्ननवांशपतुल्यतनु: स्याद्वीर्ययुत ग्रहतुल्यतनुर्वा ।
चन्द्रसमेतनवांशपवर्ण: कादिविलग्नविभक्तभगात्र: ।।

(जा.पा ३/७६)

अस्य श्लोकस्य अयं भावार्थ: यत् जन्मलग्ने यस्य ग्रहस्य नवांश: भवति तदनुसारं (ग्रहानुसारं)जातस्य शिशो:शरीरं भवति । यदि कुण्डल्यां कोऽपि ग्रह:

सर्वतो बलीयान् तदनुसारं एव शिशोःशरीरं भवति । अथवा यस्मिन् नवांशे चन्द्रःतिष्ठति तस्य राशेःयः अधिपतिः तदनुसारं जातकस्य शरीरं भवति ।


### ३.२.११.१ जातकस्य शरीरे द्रष्काणविभागवशात् भावानां त्रिधा विभजनम् :-

प्रिय पाठकाः! अयं प्रकारः सूक्ष्म विचारत्वेन आचार्यैःपरिकल्पिताः। द्रेष्काणशद्बेन राशेः त्रिभागाः इति पूर्वं ज्ञातमेव । तत्र लग्नस्य त्रयः द्रेष्काणाः भवन्ति। तदनुसारं त्रयविभागाः अपि भवन्ति । त्रयविभागाः जातकस्य शरीरे निवेशिताः सन्ति । तत्र प्रथमद्रेष्काणः शिरः तः मूर्धापर्यन्तम् । लग्नस्य प्रथमद्रष्काणे लग्नं मस्तकं । तस्मात् द्वितीयराशिःदक्षिणनेत्रं, द्वादश राशिः वामनेत्रं भवति । तृतीयराशिः दक्षिणकर्णः, एकादशराशिः वामकर्णः भवति ।

चतुर्थराशिः दक्षिणनासापुटः,दशमराशिःवामनासापुटः । पञ्चमराशिः दक्षिणकपालः , नवमराशिः वामकपालः। षष्ठराशिः दक्षिणहनुः , अष्टमराशिः वामहनुः। शप्तमराशि :सम्पूर्ण मुख मण्डलम्। इति प्रथमद्रेष्काणस्य अङ्गादि विभागाः ।इदानीं द्वितीयद्रेष्काणस्य चर्चां कुर्मः ।द्वितीयद्रेष्काणः कण्ठात् वस्ति पर्यन्तम् । लग्नस्य द्वितीयद्रेष्काणे लग्नं कण्ठः । तस्मात् द्वितीयराशिः दक्षिणस्कन्धः,द्वादशराशि : वामस्कन्धः।

तृतीयराशिः दक्षिणबाहुः,एकादशराशिः वामबाहुः। चतुर्थराशिः दक्षिणपार्श्वं, दशमराशिः वामपार्श्वम् । पञ्चमराशिः दक्षिण हृद्भागः,नवमराशिः हृद्भागः। षष्ठराशिः दक्षिणउदरभागः,अष्टमराशिः वामउदरभागः । सप्तमराशिः नाभि : इति द्वितीय द्रेष्काण विभागाः। इदानीं तृतीय द्रेष्काणस्य चर्चां कुर्मः.। तृतीयद्रेष्काणः वस्तितः अन्तिम भागः पर्यन्तम् । लग्नस्य तृतीयद्रेष्काणे लग्नं वस्तिः(नाभितः लिङ्ग उपरिभाग पर्यन्तम्) । तस्मात् द्वितीयराशिः लिङ्गम् ,द्वादशराशिः गुदा । तृतीयराशिः दक्षिणअण्डकोषः, एकादशराशिःवामअण्डकोषः । चतुर्थराशिः दक्षिणउरुभागः,दशमराशिःवामउरुभागः। पञ्चमराशिः दक्षिणजानुप्रदेशः,

नवमराशिः वामजानुप्रदेशः। षष्ठराशिः दक्षिणजंघप्रदेशः, अष्टमराशिः वामजंघप्रदेशः।सप्तमराशिः चरणप्रदेशः इति तृतीयद्रेष्काणविभागः । छात्राः ! अस्य पाठस्य सम्यक् अववोधनाय भवतां कृते नराकार रेखाचित्रं प्रस्तूतये । सावधानेन चित्रस्य अवलोकनं कुरु ।



अत्र लग्नस्य त्रयः द्रेष्काणानुसारं विभागाः निरुपिताः भवन्ति ।

### ३.२.११.२ जाताङ्गे चिह्नस्य निरूपणम् ।

प्रिय पाठकाः ! लग्नद्रेष्काणवशात् विभिन्नानां अङ्गानां ज्ञानं वयं आलोचित – वन्तः।इदानीं जातस्य शिशोः विभिन्नेषु अङ्गेषु कुत्रकुत्र चिह्नानि सन्ति तदधुना विचारयामः। कालाङ्गे पापग्रहाणां स्थितिः वशात् अङ्गे पीडाःभवन्ति। तत्र लग्नस्य

प्रथमद्रेष्काणानुसारं शीर्षादौ ,द्वितीयद्रेष्काणानुसारं कण्ठादौ तथा तृतीयद्रेष्काणानुसारं वस्त्यादौ पापग्रहाणां युतित्वात् व्रणाःभवन्ति । एवं शुभग्रहाणां युतिः दृष्टिः वा यदि तस्मिन्नङ्गे स्यात्तदा तिलमसकादि चिह्नानि भवन्ति। ब्रणादि कारकः ग्रहः निजराशौ निजनवांशे वा , स्थिरराशौ स्थिरनवांशे च भवेत्तदा ब्रणस्य चिह्नं जन्मात् एव भवति । यदि चिह्नः उत्पादकः ग्रहः शनिः तर्हि चिह्नः प्रस्तरेण ,वायुना च जातमिति ज्ञातव्य ः।

मङ्गलः स्यात् तदा अग्निना शस्त्रेण च जातमिति ।

सूर्यः स्यात् तदा काष्ठेन, चतुष्पदेन च चिह्नम् ।
बुधः स्यात्तदा भूमेः पतनात् चिह्नम् ।
चन्द्रमा स्यात्तदा शृङ्ग युक्तः पशुद्वारा तथा जल जन्तुना चिह्नम् ।
गुरुशुक्रौ कदापि ब्रणप्रदौ न भवतः। यतोहि शुभग्रहत्वात् ।

## ३.२.१२-बोधप्रश्नाः

१) लग्नस्यद्रेष्काणात् कस्य अङ्गस्य विचारः भवति ?

२) लग्नस्य प्रथमद्रेष्काणे लग्नात् चतुर्थराशितःविचारितःअङ्गस्य नाम किम् ?

३) द्वितीयद्रेष्काणे लग्नात् सप्तमराशितःविचारितःअङ्गस्य नाम किम् ?

४)तृतीयद्रेष्काणात् कस्य अङ्गस्य विचारः ?

५) जाताङ्गे चिह्नःउत्पादकग्रहःशनिःयेत् चिह्नःकथं भवति ?

६) कौ ग्रहौः ब्रणप्रदौ न भवतः ?

## ३.२.१३संक्षिप्तउत्तरमूलकप्रश्नाः

१) निषेकशद्वात् किम् अवगम्यते ?

२) जलतत्वः,अग्नितत्वः ग्रहौ कौ ?

३) गर्भाधानस्य कृते कति दिवसाः प्रशस्ताः ?

४) गर्भधारणस्य निषिद्धदिवसाः कतिसंख्यकाः ?

५) ब्रते,उपवासे च गर्भधारण कुर्यात् न कुर्यात् वा ?

६) चन्द्रात् सप्तमभावगतौ भौमशनी कस्याः कृते रोगप्रदा भवति ?

७) सूर्य उभयतः भौमशनी स्यात्तां तदा पुरुषस्य कृते किं उत्पादयति ?

८) क्लीवशद्वेन किं अवगम्यते ?

९) यमल शव्देन किमवगम्यते ?

१०)गुरुसूर्यौ कस्य भावस्य पुरुषांशे यमल पुत्रजन्मयोगः भवति ?

११)विषमसम राशिगतौ सूर्यचन्द्रौ अन्योन्यं दृष्टेः किम् उत्पादयति ?

१२)नालशद्रेन कस्य बोधः ?

१३)चन्द्रमा लग्नं यदि नपश्येत्तदा शिशुः जन्म समये पिता उपस्थितः अनुपस्थितो वा ?

१४)कालाङ्गे केषां ग्रहाणां स्थितिवशात् अङ्गे पीडाः भवन्ति ?

१५)दशमभावगतःउच्चस्थःगुरुः कस्मिन् स्थाने शिशोःप्रसवं कारयति ?

## ३.२.१४ नातिदीर्घ उत्तरमूलक प्रश्नाः ।

१) सूतिकागृहे दीप निरूपणं कथं क्रियते ?

२) नालवेष्टित योगद्वयं सोदाहरणं लिख ।

३) यामल जन्मयोगस्य ग्रहस्थितिं निरूपयत ।

४) सोदाहरणं पितुःपरोक्षे जन्मज्ञानं आलोचयत ।

५) जन्माङ्गे चिह्नानि कथं भवन्ति ।

## ३.२.१५दीर्घोत्तरमूलक प्रश्नाः ।

१) द्रेष्काणवशात् शरीरस्य त्रिप्रकारकं वर्गीकरणं कुरु ।

२) उदाहरणपूर्वकं क्लीवजन्मयोगाःलेख्याः ।

३) स्त्री ,पुरुष ,क्लीव, यामल ,ग्रहयोगान् उदाहरणपूर्वकं निरूपयत ।

## ३.२.१६ वस्तुनिष्ठ प्रश्नानां उत्तराणि ।

१.गर्भाधानम् २.चन्द्रभौमौ ३.पञ्चतःषोडशदिन पर्यन्तम् ४.चतुःसंख्यकाः ५.न कुर्यात् ६.स्त्रियाः ७.मृत्युप्रदः८.नपुंसकः९.शिशुद्वयम् १०.द्विस्वभावस्य ११.क्लीवः१२.शिराप्रशिराः १३.अनुपस्थितः १४.पापग्रहाणां १५.चतुःशालविशिष्टे गृहे ।

# चतुर्थ पाठ्यसूची


| क्रं.सं. | | पृ.सं |
|---|---|---|
| ४.१ | प्रस्तावना– | |
| ४.२ | उद्येश्यानि: | |
| ४.३ | आयुषां भेदाः तत्र अरिष्टप्रदाग्रहस्थितिः | |
| ४.३.१ | पित्रादीनामरिष्टाः तथा जननी मरण योगाः | |
| ४.३.२ | मातु मरण योगः | |
| ४.४ | बोधप्रश्नाः | |
| ४.५ | जातस्य विभिन्न अरिष्टप्रदः ग्रह स्थितयः तथा मृत्युयोगाः | |
| ४.५.१ | निर्द्दिष्टे वर्षे अरिष्ट ज्ञान प्रकारः । | |
| ४.५.२ | जातस्य अल्पायुयोगाः | |
| ४.६ | बोधप्रश्नाः | |
| ४.७ | अरिष्ट निराकरणार्थं ग्रहयोगाः (अरिष्टभङ्गाः) | |
| ४.७.१ | चन्द्रकृत अरिष्टभङ्गः– | |
| ४.७.२ | देवगुरुःकृतः अरिष्टभङ्गः | |
| ४.७.३ | राहुकृतः अरिष्टभङ्गः | |
| ४.७.४ | अरिष्टभङ्गस्य अन्याविधयः | |
| ४.८ | बोधप्रश्नाः | |
| ४.९ | विविध आयुयोगाः | |
| ४.९.१ | पूर्णायुयोगाः | |
| ४.९.२ | अमितायु– योगः | |
| १.१० | बोधप्रश्नाः | |

४.११ संक्षिप्त उत्तरमूलक प्रश्नाः

४.१२ नातिदीर्घ उत्तर मुलक प्रश्नाः

४.१४ संक्षत्पि उत्तर मुलक प्रश्नानां उत्तराणि।

❖❖❖

# चतुर्थपाठः

## ४.१प्रस्तावना–

*मनुष्यस्य जन्मतः मृत्यु पर्यन्तं किमपि कर्म शुभाशुभत्वेन प्रतिदिनं प्रचाल्यमानः अस्ति। तत्र शुभकर्मानुसारं शुभफलानांभोगः अशुभकर्मानुसारं पापफलानां भोगः भवन्ति। निषेकाध्याये वयं आलोचितवन्तःगर्भाधानं,शिशुजन्मज्ञानं एवं अन्येषां विषयाणाम् तत्र विबाहात्परमेव निषेककर्मणि बहुःशुभताः अशुभताः च भवन्ति। तदर्थं शास्त्रेषु प्रतिपादितं विद्यते यत् निषेककर्म रोषेण विलासेन वा । कृतमस्ति इति? गर्भाधानात्परमेव स्त्रियाः उदरे बीजवपनात्परं भृणस्य उद्गमः। तद् भृणःदशमासेषुविभिन्नाकारत्वेन वर्धितः भवति । यतोहि उदरस्थः शिशुःमातुःशुभाशुभःकर्मवशात् एव शुभाशुभं भोगं करोति । शुभफलं शुभाय भवति नव जात शिशुं प्रति । अशुभफलं शिशोःअरिष्टत्वेन गण्यते । चिकित्सकानां* (Doctor) *मतानुसारेण मनुष्याणां विशेषभावेन मृत्युसंख्याः बाल्यावस्थायां एव भवति । अतःज्योतिषशास्त्रे एतस्य स्पष्ट विवेचनं प्रतिपादितमस्ति। अतएव विविध प्रकारकाः बालारिष्टाः,ग्रहारिष्टाः त्रिपताकीचक्रवशात् अरिष्टाःतथाच ग्रहयोगवशाात् अरिष्टभङ्गाःअस्मिन् पाठे विचारितमस्ति । तत्र किन्नाम अरिष्टम्? इति प्रश्नस्य समाधानार्थं उच्यते – जातस्य शिशोः यानि विघ्नानिप्रतिदिनं संगठितानि भवन्ति तानि अरिष्टसंज्ञानि । एकवाक्येन वदामः– शिशोःअशुभग्रहयोगाःअरिष्टप्रदाः भवन्ति ।*

## ४.२उद्येश्यानिः–

*१)अस्यपाठस्य पठने पाठकाःअरिष्ट योगान् जानन्ति ।*

*२)अरिष्टयोगानां परिहारविषये अपि जानन्ति ।*

*३)अरिष्टः अस्ति चेत् तदर्थं प्रयत्नशीलाः भवन्ति ।*

*४)स्व स्थानीय समाजे यदि एतद् विषये जनानां अज्ञानता अस्ति*

चेत् शिशोः अरिष्ट प्राप्तिकाले एव तेषां परिवारवर्गान् सूचयन्ति ।
येन पूजादि विधिना अरिष्टः निवारणः स्यादिति ।

## ४.३ आयुषां भेदाः तत्र अरिष्टप्रदाग्रहस्थितिः

श्रद्धेय पाठकाः! विषयप्रारम्भात्पूर्वं बालारिष्टविषये सप्रति विचारयामः। तत्र जन्मतःअष्टवर्षाभ्यन्तरे(१–८) एव बालारिष्टाःभवन्ति। अष्टवर्षात्परं(८–२०) विंशतिवर्षपर्यन्तं योगारिष्टाः (दुष्टग्रहोत्पन्नाः) भवन्ति। ततो द्वात्रिंशत् वर्षपर्यन्तं (२१–३२) अल्पायुः । ततः सप्ततिवर्ष(३३–७०) पर्यन्तं मध्यमायुः । ततः एकशतवर्ष (७१–१००)पर्यन्तं पूर्णायुः। ततःविंशत्यधिकं एकशतवर्षपर्यन्तं(१०१–१२०) परमायुः । इदानीं प्रकृतविषयं अनुसरामः ।

सर्वेषां योनिजानां प्रायःइयमेव स्थितिः भवति यत् द्वादशवर्षाभ्यन्तरे आयुषःनिर्णयः निश्चितरूपेण कर्त्तुं न शक्यते । यतोहि पितृमातृकृतःपापकर्मवशात् एव नवजात शिशुः विविधअरिष्टप्रभावैःएव प्रभावितः भवति । आजन्मनःद्वादशवर्षपर्यन्तं चतुः चतुःवर्षाभ्यन्तरे एव बालकस्य कृते अरिष्टाः भवन्ति ।प्रथमवर्षचतुष्टये मातुःपापैः, द्वितीयवर्षचतुष्टये पितुःपापैः, तृतीयवर्षचतुष्टये स्वकृतदोषैः बालकः अरिष्टभोगं करोति। अतःअरिष्टःअस्ति चेत् बालकस्यकृते तस्य पितरौ जप पूजार्च्चनादिकं कृत्वा तस्य दोषस्य परिहारं कर्त्तुं शक्यते । जन्मात् द्वादशवर्षपर्यन्तं आयुः ज्ञातुं न शक्यते । अतः आजन्मनः द्वादशवर्षपर्यन्तं जप–होम–चिकित्सा माध्यमेन बालरक्षां कारयेत् । इदानीं अरिष्टप्रदग्रहयोगान् विचारयामः । पाठकाःभवन्तःसावधानेन ग्रहयोगान् पश्यन्तु ।


तत्र जन्मकाले यदि चन्द्रमा षष्ठभावः,अष्टमभावः,द्वादशभावगतःवा स्यात् एवं सूर्यं विहायःअन्येषां पापग्रहाणां दृष्टिसम्बन्धःस्यात्तदा जातकः मृत्युं प्राप्नोति। यदि गुरुः लग्नस्थ तदाऽपि एष योगः अरिष्टप्रदः। इति प्रथम योगः। गण्डान्त नक्षत्रे चन्द्रमा स्यात्, पापग्रहेण दृष्टः युक्तःवा स्यात्तदा जातस्य कृते अरिष्टप्रदः।


एवञ्च तादृशः चन्द्रः यदि मृत्युभावःगतःस्यातदा जातस्य मृत्युःअवश्यमेव ।

## ४.३.१पित्रादीनामरिष्टाः तथा जननी मरण योगाः-

यादृशी ग्रहस्थितिः बालस्य मृत्योःकारणं भवति तदवदेव कीदृशे ग्रहयोगे बालस्य पित्रादि गुरु जनानं कृते अशुभप्रदः भवति तदधुना वयं चर्चां कुर्मः। लग्नात् पञ्चमे,नवमे वा यदि पाप ग्रहः स्यात्तदा पित्रादीनां कृते अशुभप्रदःस्यात्। तत्र पञ्चमे ,नवमे वा योगकारकत्वेन यदि सूर्यः स्यात्तदा पितुः कृते निधनप्रदः भवति। चन्द्रस्य स्थितिः मातुःकृते निधनप्रदः। भौमस्य स्थितिःभ्रात्रोः कृते निधनप्रदः। बुधस्य स्थितिः मातुलस्य कृते कष्टप्रदः। गुरोःस्थतिःस्वमातुःमाता (मातामही)कृते निधनप्रदःभवति। शुक्रस्य स्थितिःमातुः पिता (मातामहः)कृते निधनप्रदः। शनैश्चरस्य स्थिति :जातकस्य कृते एव मृत्युप्रदा भवति। यदि लग्नात् द्वादशे शनि-सूर्यो भवेतां तत्र क्षीणचन्द्रमा सप्तमे स्यात्तदा शिशोः जन्मात्परमेव पितुःमृत्युं प्राप्नोति। अस्यां परिस्थितौ यदि शुभग्रहाणां दृष्टिः उपरोक्त ग्रहयोगे स्यात्तदानीं बर्षत्रये एव पितुःमरणं भवति ।


यदि जन्मकालः रात्रौस्यात् ,चरराशिस्थ चन्द्रं बुधेन दृष्टःस्यात् तदा दूरदेशे स्थितोऽपि पितुःमरणं भवति । रात्रिकाले चरराशौः शनिसूर्यौः युतौ स्यात्तां तदा विदेशे पितुः मरणं भवति । अस्य ज्ञानस्य सम्यक् अवबोधनाय कुण्डलीं पश्यामः।




## ४.३.२मातुः मरण योगाः-

अस्य विषयस्य अन्ययोगमेकं शस्त्रानुसारं लिख्यते। तत्र सूर्यचन्द्रमसौ लग्नात् चतुर्थ भावगतौ,तथा च शनिः सप्तमभावगतःस्यात्तदा अयं योगः मातुःकृते मरणप्रदः भवति। लग्नं ,चन्द्रः च पापग्रहेण दृष्टः शुभग्रहेण दृष्टःयुतःच न स्यात् बृहस्पतिः केन्द्रे अवस्थितः न स्यात्तदा जातस्य शिशोः माता निश्चितरुपेण मृत्युं प्राप्नोति । लग्नात् षष्ठस्थाने क्रूर ग्रहः स्यात्तदा मातृनाशकयोगः भवति । छात्राः! अस्य विषयस्य सम्यक् ज्ञानार्थं इमां कुण्डलीं प्रस्तुयते।




(मातुः मरणयोगः)

इत्यत्र लग्नं पापाक्रान्तः, भौमः पूर्ण दृष्ट्या षष्ठभावस्थ चन्द्रं पश्यति। बृहस्पति ःद्वादश भावगतः शुक्रक्षेत्रस्थः च ।

**अन्य योगाः-**

१)चन्द्रात् चतुर्थे दशमे भावे पाप ग्रहःस्यात् तत्र शुभ ग्रहाणां दृष्टिःन स्यात् तदा मातुःमरणप्रदः भवति।

२)सूर्यात् दशमे पापग्रहाःस्युः तत्र शुभदृष्टिःन स्यात्तदा मातुः मरणःभवति ।

३)बलवान् सूर्यःशनिना दृष्टःयुक्तःसन् तृतीयभावे स्यात् अपि च क्षीण चन्द्रमा पापग्रहेण साकं शुक्रात् तृतीये भावे स्यात्तदा प्रसवसमये मात्रा सह पुत्रः मत्युं प्राप्नोति ।

४)लग्नात् अष्टमे सूर्यः, भौमः वा पापदृष्ट ःस्यात् ,शुभग्रहेण न अवलोकितः

स्यात् ,चन्द्रमा कृष्णपक्षस्य स्यात्तदा जातस्य माता नूनं म्रियते।

५)दिवसे जन्मः स्यात् शुक्रात् पञ्चमे नवमे वा सूर्यः स्यात् एवं रात्रौजन्मः स्यात्, चन्द्रात् शनिःपञ्चमे नवमे वा स्यात्तत्र पापग्रहाणां दृष्टिः स्यात् , शुभ ग्रहाणां दृष्टिःन स्यात् ,चन्द्रमा बलहीनः स्यात्तदा मातुःमरणं निश्चितमेव।

## ४.४ बोधप्रश्ना:-

१)कति प्रकारकाः बालारिष्टाः ?

२)कस्मिन् वयसि शिशुः मातुः पापात् अरिष्टभोगं करोति ?

३)पूर्णायोः वयससीमा कति ?

४)लग्नात् पञ्चमे नवमे वा सूर्यः स्यात्तदा कस्य कृते अरिष्टप्रदः ?

५)सूर्यात् दशमे पापग्रहः,तत्र शुभदृष्टेःअभावे कस्य मरणं भवति ?

## ४.५जातस्य विभिन्न अरिष्टप्रदः ग्रह स्थितयः तथा मृत्युयोगाः


प्रिय छात्राः! योगःमनुष्यजीवनं पल्लवितं पुष्पितं करोति । पुनःतादृशः ग्रहयोगः शीघ्रातिशीघ्रं मरणाय मार्गप्रस्तुतं कारयति। तर्हि कस्यां परिस्थितौ अरिष्टप्रदाः ग्रहयोगाःभवन्ति तद् अधुना आलोचयामः।


क) यदि लग्ने क्षीणचन्द्रमा स्यात् ,पापग्रहाःकेन्द्रे(१,४,७,१०) अष्टमे वा स्युःतदा जातस्य मृत्युः अवश्यम् । यदि षष्ठे वा अष्टमे भावे स्थिताः शुभग्रहाः पापग्रहैःअवलोकिताः तदा एकमासाभ्यन्तरे एव शिशोः मरणम्।

ख) शनिभौमौ एकत्र अवस्थितौ,सूर्यःअष्टमस्थाने वा षष्ठस्थाने स्थितःशुभग्रहेण न अवलोकितः तदा जातस्य सद्यमृत्युः भवति ।

ग) लग्ननवांशस्य अधिपतिः चन्द्रःस्यात् । भौमः लग्नात् शप्तमे स्यात्

शुभ दृष्टिः न स्यात्तदा बालकः स्वजन्म नक्षत्रात् सप्तसप्तति(७७) तमे नक्षत्रे मृत्यु : भवति । अपि च शनिः, मङ्गलः, सूर्यः, पञ्चमस्थानगतः स्यात्तदा सप्तसप्ततितमे नक्षत्रे शिशुः मृत्युं प्राप्नोति । छात्राः ! इदानीं कुण्डलीं पश्यन्तु ।




सप्तसप्ततितमं नक्षत्रं कथं ज्ञायते एतस्य उदाहरणम् – यथा कश्चित् बालकः अश्विनी नक्षत्रे जन्मः । तस्य सप्तसप्ततितमं नक्षत्रं विचारयामः –

अश्विनीतः रेवती = २७

\+ पुनःअश्विनी तः रेवती = + २७

५४


\+ २३


पुनःअश्विनीतः २ ३ संज्ञक नक्षत्र = ७७

अतः धनिष्ठानक्षत्रे शिशोःमरणं सुनिश्चितंमेव ।

क) भौमः चन्द्रस्य नवांशे, लग्ननवांशे वा स्यात् । तस्योपरि गुरोःदृष्टिः न स्यात् एवं चन्द्रमा पञ्चम भावगतःस्यात्तदा बालकस्य मरणं निश्चितमेव ।

पाठकाः अस्य विषयस्य सम्यक् ज्ञानाय कुण्डलीद्वयं सम्यक् पश्यन्तु ।






श.

ख) लग्नेशः नीच राशिगतः एवञ्च लग्नात् अष्टमे वा स्यात् तदा जातस्य मृत्युः भवति ।

ग)सूर्यादि बलहीनाः ग्रहाः यदि आपोक्लिमोस्थाः(३ ,६ ९,१२)स्तात्तदाजातकः मासद्वयाभ्यन्तरे अथवा षड्मासाभ्यन्तरे मृत्युं प्राप्नोति।

घ) चन्द्रमा लग्ने ,षष्ठे, अष्टमे,द्वादशे वा स्यात् तस्योपरि शुभग्रहाणां दृष्टेः अभावःस्यात्तदा जातस्य मरणं भवति ।

ङ) मङ्गलः,सूर्यः तथा शनिः अष्टमे भावे स्यात्तदा जातस्य मरणं शीघ्रमेव भवति । यस्मिन् नक्षत्रे केतोःउदयः भवति तस्मिन् नक्षत्रे जायमानशिशोः मरणं मासद्वयाभ्यन्तरे भवति ।

च) चन्द्रमा षष्ठे,अष्टमे वा भावे स्यात् ,पापग्रहाणां दृष्टिःतत्र स्यात्तदा जातस्य मरणं शीघ्रं भवति । तत्र शुभग्रहाणां दृष्टिः स्यात्तदा मृत्युः अष्टमे वर्षे भवति ।


## ४.५.१ निर्दिष्टे वर्षे अरिष्ट ज्ञानप्रकारः ।

एतावत्पर्यन्तं विभिन्न ग्रहयोगः वशात् अरिष्टस्य सामान्य परिचयः जातः। अधुना निर्दिष्टे अब्दे मृत्युं ज्ञानाय विविध योगान् आलोचयामः । तद्यथा –

प्रथमेवर्षे शिशोःमरणयोगः–


जन्मकाले अरिष्टकारक ग्रहाणां मध्ये यो ग्रहःबलीयान् सःयस्मिन् राशौ भवेत् तस्मिन् एव राशौ चार वशात् गते चन्द्रे , अथवा जन्मनि यस्मिन् राशौ चन्द्रः भवेत् तस्मिन् एव चारवशात् पुनरागते चन्द्रे वा जन्मलग्न राशौ पुनःसमागते चन्द्रे वर्षमध्ये मरणं स्यात् ।

वर्षद्वयं आयुः–वक्री शनिः भौमस्य गृहे सन् अपि केन्द्रगतः स्यात् ,षष्ठे,अष्टमे वा भावे स्यात्, बलवान् भौमस्य दृष्टिःतस्योपरि स्यात् तदा तस्मिन् समये जायमानः बालकः वर्षद्वयं जीवति । ततःम्रियते। छात्राः! भवतां स्पष्ट अवबोधनार्थं वर्षद्वयात्मक–आयोः निरूपणं कुण्डली माध्यमेन क्रियते।




द्विवर्षायुः

पञ्चवर्षायुः—रवि, चन्द्र, मङ्गल, गुरु, एकत्रावस्थितःस्यात्, अथवा मङ्गल, गुरु, शनि चन्द्रमा एकत्रावस्थितःअथवा रवि, शनि, चन्द्रमा एकत्रस्यात्तदा जातकायुः पञ्चवर्षात्मकं भवति । छात्राः! स्पष्टयर्थं कुण्डली प्रयुज्यते।





पञ्चवर्षायुः

नववर्षायुः—सूर्य, चन्द्र, भौमाः यदि पञ्चमभावगताः स्युःतदा जातस्य मृत्युः नवमे अब्दे भवति । लग्नेशः पापग्रहः स्यात् । चन्द्रमा द्वादश स्थाने स्थितः स्यात् अथवा लग्नेशः कस्यापि राशेः चन्द्रनवांशगतःस्यात्तस्योपरि पापग्रहाणां दृष्टिः स्यात्तदा जातस्य मरणं नवमे अब्दे भवति ।

दशवर्षायुः—शनिःमकरराशेः नवांशे स्यात् तस्योपरि बुधस्य दृष्टिःस्यात् तदा तेन साकं जनानां आजन्म शत्रुता एवं तस्यायुः दशवर्षमेव भवति ।

द्वाविंशत्यायुः—सूर्येण साकं गुरुः कर्कराशि गतःसन् लग्ने स्यात् । अष्टमेशः केन्द्रे स्यात् तदा जातस्य मृत्युःद्वाविंशत्यब्दे भवति । स्पष्टीकरणाय कुण्डलीं उपस्थाप्यते।





*सप्तविंशति अद्वे मृत्युयोगः–लग्ने शनिः शत्रुराशि गतः स्यात् तदा शुभग्रहाः आपोक्लिमभावे स्युःतदा जातस्य आयुः विंशति अथवा सप्तविंशतिवर्षाभ्यन्तरे एव।द्वात्रिंशदद्वे निधनयोगः– अस्य योगस्य शास्त्रीयं प्रमाणं यथा–*

*अष्टमाधिपतौ केन्द्रे लग्नेशे बलवर्जिते ।*
*त्रिशद्वर्षमितायुष्मान् द्वात्रिंशद्वत्सरे मृतिः।।*
*क्षीणे शशाङ्के यदि पाप युक्ते रन्ध्राधिपे केन्द्रगतेऽष्टमे वा।*
*पापान्विते हीनबले विलग्ने द्वात्रिंशदद्वेनिधनं प्रयाति ।।*

*(जा.पा. ४/६६,६७)*

*अर्थात् अष्टमेशःकेन्द्रे स्यात् ,लग्नेश बलहीन स्यात्,तदा जातक त्रिंशद् वर्षायुः भवति । अपिच द्वात्रिंशे तमे वयसि मृत्युः प्राप्नोति । यदि क्षीणचन्द्रमा पापग्रहैः पीडिताः स्युः ,अष्टमेशःकेन्द्रे अष्टमे वा स्यात् ,लग्ने पापग्रहः अपिच लग्नं दुर्वलं स्यात्तदा जातस्य आयुः द्वात्रिंशदद्वं भवति। छात्राः! भवतां अववोधनार्थं कुण्डली स्थित ग्रहयोगं पश्यन्तु ।*




## ४.५.२जातस्य अल्पायुयोगाः–


*पाठकाःएतावत् पर्यन्तं वयं विभिन्न अरिष्टप्रद निधन योगान् पठितवन्तः अधुना*


आलोचयामः अल्पायु योगस्य किं तावत् लक्षणम् ?का च ग्रह स्थितिः ?अल्पायुयोगस्य लक्षणं भवति – यस्मिन् योगे अत्यल्प वयसि जातकस्य मरणं जायते तस्य योगस्य अल्पायुयोगः इति संज्ञा। तस्य योगस्य ग्रहस्थिति :–

पाप ग्रहः षष्ठे,अष्टमे,द्वादशे वा स्यात् । लग्नेशःबलहीनः शुभग्रहैरदृष्टःअयुतःवा स्यात्तदा बालकः अल्पायुः भवति। अनपत्यदोषैः (सन्तान रहित दोषः)च पीडितः भवति । इति प्रथम योगः।

अष्टमेशःअथवा शनिःक्रूरग्रहाणां षष्ठ्यंशे स्यात् पापग्रहः पाप ग्रहैःयुक्तस्यात् तदा जातकःअल्पायुःभवति। इति द्वितीय योगः।

द्वादशद्वितीयभावौ पापग्रहेण संयुक्तौ शुभग्रहाणां दृष्टिरहितौ क्रूर षष्ठ्यंश गतौ जातस्यः बालकस्य आयुः अल्पायुः भवतीति तृतीयपाठः। पाठकाः!अल्पायु योगस्य स्पष्ट बोधनार्थं निम्ने कुण्डली प्रस्तूयते ।




## ४.६बोधप्रश्नाः–

१.अल्पायुःइत्यस्य कोऽर्थः ?

२.वक्री शनिः भौमस्य गृहे स्यात् तस्योपरि शुभ दृष्टेः अभावःस्यात्तदा बालकः कस्मिन् वयसि मृत्युं प्राप्नोति ?

३.बालकः सप्तसप्तति तमे नक्षेत्रे म्रियते । तत्र गणना क्रमः कस्मात् भवति ?

४.पञ्चमभावगताःसूर्य,चन्द्र,भौमाः जातस्य मृत्युं कस्मिन् अब्दे सूचयन्ति ?

५.शनिः क्रूरग्रहाणां षष्ठ्यंशे स्थिते किं भवति ?

## ४.७अरिष्ट निराकरणार्थं ग्रहयोगाः (अरिष्टभङ्गाः)

प्रिय जिज्ञासवः ! दोषाःभवन्ति चेत् तस्य परिहारार्थं उपायाः अपि भवन्ति । तथैव ग्रहस्थित्यनुसारं जातस्य विविधाः अरिष्टाःभवन्ति। तेषां अरिष्टानां निराकरणार्थं तादृशाः ग्रहयोगाः अपि जातके भवन्ति ।जनस्य अरिष्ट निराकरणाय लग्नेशः गुरुःतथा अन्येऽपि ग्रहयोगाः सतत कार्यशीलाः भवन्ति ।

अधुना लग्नेशकृतःअरिष्टभङ्गं विचारयामः–लग्नेशःअति बलवान् स्यात् ,शुभग्रहेण दृष्टःयुक्तःच स्यात्, पापग्रहेण अदृष्टःस्यात्तदा जातकः सर्वदा सौभाग्येण युतः सन् दीर्घायुः भवति ।

### ४.७.१ चन्द्रकृत अरिसससष्टभङ्गः–

चन्द्रोऽपि अरिष्टं विनाशयितुं कदाचित् समर्थः स्यात् ।तर्हि कस्मिन् योगे चन्द्रमा अरिष्टं विनाशयति तद् योगं पश्यामः।पूर्णचन्द्रमा शुभगृहे शुभनवांशे वा स्यात्तदा तादृशः चन्द्रः अरिष्टनाशकः भवति । तत्र शुक्रःयदि चन्द्रस्योपरि दृष्टिःपातयेत्तदा विशेषतया चन्द्रमा अरिष्टं नाशयतुं समर्थः।


अन्ययोगः– यथा सूर्यः स्व किरणेन घनान्धकारं नाशयति तथैव उच्चस्थ (वृषः)चन्द्रः,स्वगृहस्थः(कर्क)चन्द्रः,स्वमित्रवर्गस्थितःचन्द्रः,शुभवर्गस्थितः चन्द्रः,शुभग्रहेण दृष्टःचन्द्रः सम्पूर्णतया अरिष्टं नाशयति ।

अन्ययोगः–शुक्लपक्षे रात्रौ जन्मःस्यात् ।तथा कृष्णपक्षे दिवसे जन्मःस्यात् ।शुभाशुभः दृष्टः चन्द्रमा षष्टाष्टमे स्थितोऽपि जातस्य पूर्णसुरक्षां कारयति । यथा पितापुत्रं रक्षति

अन्यच्च–चन्द्रमा शुभवर्गे स्यात् ,तस्योपरि शुभदृष्टिः स्यात्तदा जातस्य सम्पूर्णं अरिष्टं प्रशमितं भवति ।यथा गरुडः सर्पसमूहं नाशयति इति ।

## ४.७.२ देवगुरुःकृतः अरिष्टभङ्गः

*सर्वतो भावेन बृहस्पतिः जातस्य शिशोः विविधान् अरिष्टान् नाशयति । तत्र पूर्ण बलवान् गुरुः वा निर्मलः विम्बयुक्तः बृहस्पतिः यदि केन्द्रे (१,४,७,१०)स्यात्तदा एकाधिकान् अरिष्टान् नाशयति । यथा भगवन्तं शङ्करं प्रणामं कृते सति ते भक्तस्य कष्टान् नाशयन्ति तथैव ।छात्राः! स्पष्टतया अवबोधनाय इमाम् कुण्डलीं उपस्थाप्यते*




*इत्यत्र दशमभावेशःतथा लग्नभावेशःगुरुः केन्द्रे दशमेभावे अस्ति । तस्योपरि बुधशुक्रयोःदृष्टिः वर्त्तते । अतः योगोऽयं अरिष्टनाशकः ।*

## ४.७.३ राहुकृतः अरिष्टभङ्गः

*राहुः पापग्रहः सन्नपि कथं अरिष्टं नाशयति तदधुना वयं आलोचयामः । इत्यस्य शास्त्रीय वचनं यथा –*

*राहुस्त्रिषष्ठलाभे लग्नात् सौम्यैर्निरीक्षितः सद्यः ।*
*नाशयति सर्वदुरितं मारुत इव तूलसङ्घातम् ।। (जा.पा.४/७९)*

*अर्थात् राहुः यदि त्रिषष्ठलाभे(३,६,११) स्यात् एवं तस्योपरि शुभग्रहाणां दृष्टिः कदाचित् स्यात्तदा जातकस्य सर्वाः अरिष्टयः नाशं याति । अथ राहुः मेष–वृष–कर्कटानां अन्यतमे लग्ने स्थिते जातस्य शिशुं निरन्तरं रक्षति ।*

## ४.७.४ अरिष्टभङ्गस्य अन्याविधयः

*लग्नेशःतथा राशीशः अपि जातस्य अरिष्टनिवारणं कर्त्तुं प्रभवन्ति । चन्द्राधिष्ठितःराशिः लग्ने स्यात् ,तस्योपरि शुभग्रहाणां दृष्टिः स्यात् अपिच उच्चस्थ चन्द्रमा शुक्रेण दृष्टेः तदा जातस्य अरिष्टनाशं भवति । इति राश्याधिपतिना अरिष्ट*

भङ्गयोगः।

अधुना लग्नाधिपतिः यद् अरिष्टभङ्गं करोति तस्य विचारं कुर्मः । लग्नेशः अतिबलवान् सन् केन्द्रे स्यात् ,तस्योपरि शुभग्रहाणां दृष्टिः स्यात् (पापदृष्टिः न स्यात् ) तदा जातस्य सर्वप्रकारकान् अरिष्टान् विनाशनं कृत्वा जातकस्य कृते दीर्घायुप्रदः भवति । उक्तं च –

लग्नाधिपोऽतिबलवानशुभैरदृष्टः केन्द्रस्थितःशुभखगैरवलोक्यमानः।
मृत्युं विधूय विदधाति सुदीर्घमायुः सार्धं गुणैर्बहुभिरूर्जितराज लक्ष्म्याः।।
(जा.पा.४/८३)

## ४.८बोधप्रश्नाः

क) अरिष्टभङ्गः इत्यस्य कोऽर्थः ?

ख) किं बृहस्पतिः अरिष्टनिवारणं कर्त्तुं शक्यते ?

ग) कीदृशः चन्द्रः अरिष्टं नाशयति ?


घ) कस्मिन् ग्रहयोगे पापग्रहाः अरिष्टभङ्गं कुर्वन्ति ?

ङ) कस्यां अवस्थायां लग्नेशःअरिष्टं नाशयति ?

## ४.९ विविध आयुयोगाः

आयुः प्रत्येकस्य जीवस्य महत्वपूर्णः अंशः । आयुषाभावे जीवनस्य अस्तित्वमेव नास्ति । अतः सर्वादौ मध्यायुषः विचार्यते । मध्यायुः भवति द्वात्रिंशत् वर्षात् परे

सप्ततिवर्ष पर्यन्तम् (३२ तः ७०) । लग्नेशः बलरहितःस्यात् ,बृहस्पतिः केन्द्रे, (१,४,७,१०)त्रिकोणे,(१,५,९) वा स्यात् , पापग्रहाः षष्ठे,अष्टमे वा स्युःतदा जातस्य मध्यमायुः भवति । छात्राः! स्पष्टाववोधार्थं इयं कुण्डलीं सावधानेन अनुशीलनं कुर्वन्तु ।



## ४.९.१पूर्णायुयोगाः

*पूर्णायुःइत्यस्यार्थः भवति सप्ततिवर्षात्परं शतवर्षपर्यन्तम् (७० तः १००)। जातस्य केन्द्रे शुभग्रहाः स्युः, लग्नेशः शुभग्रहेण प्रभावितःस्यात् , बृहस्पतिः लग्नाधिपतिं पश्येत्तदा जातस्यायुःपूर्णायुः इति ।*

*अन्ययोगः– जन्मलग्नपतिः केन्द्रे स्यात् , तस्योपरि गुरुशुक्रयोःदृष्टिः स्यात्तदा जातस्यापि पूर्णायुः इति जानीमः ।*

*अन्ययोगः– त्रयःग्रहाःउच्चराशिगताः,लग्नेशेन अष्टमेशेन वा युक्तःस्यात्, तथा च अष्टमस्थानं पापग्रहरहितःस्यात् तदा जातस्य पूर्णायुः इति ।*

*अन्ययोगः– पापाग्रहाः त्रि,षष्ठ,एकादाश ,भावगताः एवं शुभग्रहाः केन्द्रे,कोणे वा स्युः, लग्नेशः बली स्यात्तदा जातस्य पूर्णायुः भवति ।*

*अन्ययोगः– जातस्य जन्मःद्रिस्वभावलग्ने स्यात्,लग्नेशः केन्द्रस्थः, उच्चस्थः,कोणस्थःवा स्यात्तदा जातकः चिरकालं जीवति,भाग्यशाली अपि भवति ।*

*अन्ययोगः– सूर्य–शनि–मङ्गलाः चरनवमांशे स्यात् ,बृहस्पतिः शुक्रः च स्थिरराशेः नवांशे तथा अन्ये ग्रहाः (च.बु.रा.के.) द्रिस्वभाव राशिगताः स्युः तदा अस्मिन् योगे उत्पन्नः बालकः शतवर्षं जीवति ।*


## ४.९.२ अमितायु– योगः

*यस्मिन् योगे जायमानः जातकःपरमायुषः परे जीवति । वा यस्य आयुः गणनायोग्यः न । तस्य अमितायुः (अपरिमितायुः) इति संज्ञा । इत्यस्य शास्त्रीयवचनं सर्वप्रथमं उपस्थाप्यते । तद्यथा –*

*गुरुशशि सहिते कुलीरलग्ने शशितनये भृगुजे च केन्द्रयाते ।*

*भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्रिना स्यात् ।। (जा.पा.४/९९)*

*अर्थात् कर्कटलग्नं स्यात् ,गुरुःएवं चन्द्रः तत्र स्यात् ,बुधशुक्रौ केन्द्रे स्यातां, अन्ये ग्रहाःषष्ठे,अष्टमे,द्वादशे वा स्युः तदा जातस्यायुः अप्रमितं भवति । छात्राः! इमां कुण्डलीं ध्यानेन पश्यन्तु ।*



आमितायु योगाः

## १.१० बोधप्रश्नाः

१) पूर्णायुः इत्यस्य कोऽभिप्रायः ?

२) मध्यमायुः इत्यनेन किम् ?

३) जन्मलग्नपतिः केन्द्रेस्यात् गुरुशुक्राभ्यां अबलोकिते आयोः कीदृशयोगः ?

४) अमितायुः किम् ?

५) कर्कलग्ने कीदृशे ग्रहस्थितौ अमितायुः भवति ?

## ४.११ संक्षिप्त उत्तरमूलक प्रश्नाः

१) अरिष्टःइत्यनेन कीदृशं फलम् ?

२) अल्पायुषः परिमाणः कति वर्ष पर्यन्तम् ?

३) सप्तति वर्षात्परे आयोः कीदृशयोगः ?

४) जन्मात् अष्टवर्षाभ्यन्तरे अरिष्टस्य कृते उत्तरदायी कौ ?

५) कति वर्षात् परं बालकस्य स्व कर्म वशात् अरिष्टं भवति ?

६)लग्नात् पञ्चमे सूर्ये सति कस्य कृते अरिष्ट प्रदः ?

७) लग्नात् पञ्चमे शुक्रे सति कस्य कृते अरिष्ट प्रदः ?

८) बालारिष्टाः कतिविधाः ?

९)सप्तसप्ततितम नक्षत्रस्य गणना कस्मात् नक्षत्रात् भवति ?

१०) राहुः केतुःच अरिष्ट निवारणं कर्त्तुं समर्थः असमर्थः वा ?

११) अरिष्ट भङ्गः : कथं भवति ?

१२)पापग्रहाः कस्मिन् कस्मिन् भावगताः सन्तः अरिष्ट नाशप्रदाः भवन्ति?

१३) अमितायुः कथं ज्ञायते ?

## ४.१२नातिदीर्घोत्तर मूलक प्रश्नाः

१)चन्द्रकृतः अरिष्टयोगं व्याख्यां कार्या ।

२)पितृ मातृ मरण योगाः विलिख्यताम्।

३)सोदाहरणं पञ्चवर्षायुयोगः लेख्यः।

४)राहोः कृतः अरिष्टभङ्गं विलिख्यताम् ।

## ४.१३दीर्घोत्तरमूलक प्रश्नाः

१)सोदाहरणं अरिष्टभङ्गं विवेचयत ।

२)मध्यायुः ,पूर्णायुः तथा अमितायु योगानां निरूपणं कुरु ।

३)त्रिविध मृत्यु योगानां निरूपणं सोदाहरणं व्याख्या कार्या ।

## ४.१४संक्षिप्त उत्तर मूलक प्रश्नानां उत्तराणि ।

१) अशुभफलम् २)२१ तः३२ वर्ष पर्यन्तम् ३)पूर्णायुः ४)पितरौ ५) अष्टवर्षात्परं ६)स्व पितुःकृते ७)स्व मातुः कृते ८)त्रिविधः ९)अश्विनीतः १०)समर्थः ११) ग्रहयोगवशात् १२)३,६,११ भवगताः १३)परमायुः तः परे येषां जीवनम्

❖❖❖

# षष्ठपाठ्यसूची

--------------------------------------------

**क्रं.सं.** **पृ.सं**

--------------------------------------------


*६.१ प्रस्तावना*

*६.२ प्रयोजनानि*

*६.३.१ राजयोगस्य नाशक योगाः*

*६.४ बोधप्रश्नाः*

*६.५ रेकायोगाः*

*६.६ बोधप्रश्नाः*

*६.७ प्रेष्य योगः*

*६.७.१. प्रेष्ययोगफलानि*

*६.८ बोधप्रश्नाः*

*६.९ जन्मकालानुरोधेन अशुभयोगाः*

*६.९.१ विविध राजयोगाः*

*६.१० बोधप्रश्नाः*

*६.११ संक्षिप्त उत्तर मूलक प्रश्नाः*

*६.१२ नातिदीर्घोत्तर मूलकः प्रस्नाः*

*६.१३ दीर्घोत्तर मूलक प्रश्नानां उत्तराणि*


❖❖❖

# षष्ठपाठः

## ६.१ प्रस्तावना –

*प्रिय पाठकाः ! प्रत्येकस्य इयं भावना मनसि प्रतिसमयं आगच्छति यत् अहं धनवान् भवामि। राजतुल्य सम्मानस्य आनन्दं अनुभविष्यामि । अहं निरोगेण जीवननिर्वाहं करिष्यामिति अनेके विषयाः। प्रत्येकस्य चिन्तनं इत्थमेव। परन्तु सर्वे धनवन्तः राजस्मानं प्राप्तुं योग्याः वा ? सूक्ष्मरुपेण विचारयामः यत् उत्तरं न इति आगच्छति । प्रत्येकस्य मनुष्यस्य जीवनचक्रस्य सम्यक् रीत्या सुसंगठ – नाय मूलतत्वरूपेण ग्रहप्रभावमेव विद्यते । कदाचित् नीचकूलोत्पन्नः राज सन्मान भाजः भवति। अपि च राजकूलोत्पन्नः निन्दकः नीच कर्मरतः भवति । इत्यत्र प्रमुखः हेतुः भवति ग्रहस्य प्रभावः। ते सूर्यादि ग्रहाः मानवानां भाग्यनिर्णायकत्वेन तिष्ठन्ति । एवं च कदाचित् भाग्यापकर्षकत्वेनापि । अस्मिन् पाठे अस्माकं आलोचित विषयःअस्ति राजयोगभङ्गाः । जातकःराजोयोगत्पन्नः सन् अपि राजयोगस्य फलं प्राप्तुं अक्षमःभवति । तर्हि सा स्थिति कीदृशी इति अस्मिन् पाठे वयं पठामः ।*

## ६.२ प्रयोजनानि

*अस्य पाठस्य पठने छात्राः निम्नलिखित अंशानां ज्ञानं प्राप्स्यन्ति ।*

*१ )राजयोग भङ्गान्*

*२ )विविध कष्ट प्रद योगाः*

*३ )दरिद्रय योगान्*

*४ )केम द्रुमादि अशुभ योगाः*

*५ )सदन्त कुब्ज पङ्गुजडजन्म योगानां*

*६ )शरीरस्य विविध रोगाणां विषये*

*एवमेव पाट पठनात्परमेव उपरिलिखितां प्रश्नां ब्यतिरेक अन्योअंशाः अपि*

पाठकाः ज्ञातुं प्रभवन्ति ।

## ६.३राजयोगः भङ्गाः

अये पाठकाः ! विषयस्यास्य श्रवणमात्रेण मनसि भावना समुदेति यत् जातक – पत्रे ग्रहाणां सकाशे प्राप्तराजयोगस्य भङ्गः एव । राजयोगस्यभङ्गः कथं भवति तदधुना विचारयामः। राजयोगाः ग्रहस्थिति वशात् एव उत्पद्यत । तस्य भङ्गोऽपि ग्रहस्थिति वशात् एव भवति । यदि कस्यापि शुभग्रहाणां स्थितिवशात् योगोत्पत्तिः,तदानीं एव अशुभग्रहाणां योगवशात् खण्डनं नाम राजयोगभङ्ग : भवति। विषयस्य स्पष्टीकरणार्थं शास्त्रीयवचनं पश्यामः । तद्यथा–

केचिद् योगा राजयोगस्य भङ्गाः केचिद्रेका नाम दारिद्र्ययोगाः ।
केचित्प्रेष्याः के च केमद्रुमाख्यास्ते चत्वारो जातभङ्गाकराः स्युः।।
(जा.पा. ६ / १)

अस्यार्थं एवं चिन्तयिन्तुं शक्यते यत् – केचित् योगाः राजयोगनाशकाः,केचित् रेकानामकः दारिद्र्ययोगाः,केचित् प्रेष्ययोगाः,के च केमद्रुमाख्याःचत्वारः जातभङ्गकराःस्युः इति ।इदानीं राजयोगस्य नाशकयोगान् आलोचयामः ।

## ६.३.१ राजयोगस्य नाशक योगाः

जिज्ञासवः ! अस्य पञ्च षड् उदाहरणैः राजयोगनाशक योगान् विचारयामः । येन पाठकाः कुण्डली दर्शनमात्रेण राजयोगभङ्गस्य अशुभ फलान् अवबोध्य जनान् सूचयिष्यन्ति । तदर्थं ते सतर्कभूताः भविष्यन्ति । योगाः –

१) जातकपत्रे सूर्यःमेषराशिगतःस्यात् अपि च नवांशे तुलायां स्यात् पापग्रहाणां दृष्टिः सूर्यस्योपरि स्यात्तदा जातकः निर्धनः भवति ।

२)यदि सूर्य :जातके परमनीचांशगतः(तुला – १०°) स्यात्तदा राजकुलोत्पन्न : जनः अपि लक्ष्मी,स्त्री,पुत्ररहितःदारिद्र्यःभवति ।


३)बृहस्पतिः यदि शनि–भौम–राहुणा युतः स्यात् एवं बुधशुक्राभ्यां दृष्टः स्यात्तदा जातकःशूद्रकुलोत्पन्नः सन् सम्पूर्ण विद्या तथा लक्ष्म्याधिकारी भवति ।

४)लग्नात् षष्ठे स्थाने चन्द्रमा तथा सूर्यः स्यात् । तत्र यदि शनेः दृष्टिःस्यात्तदा जातकःनीचकर्मकर्त्ता भवति । तदनुसारं तस्य जीविका निर्वाहं भवति ।

५)शनैश्चरः केन्द्रे स्यात्, वा लग्नगतः स्यात् । तस्योपरि यदि शुभग्रहाणां दृष्टिः न स्यात्, अपिच भौमस्य कालहोरायां स्यात्तदा जातकःभिक्षुकः भवति ।


६)भौमचन्द्रौ मेषराशिगतौ, शुभग्रहेण नावलोकिते, केवल शनिना दृष्टे सति जातकः भिक्षुकः भवति । सूर्य–चन्द्र–शनैश्चराः केन्द्रगताः स्युःतदा जातकः प्रज्ञाहीनः शरीरः, दरिद्रः तथा उच्छिष्टभोजी भवति ।

७)शनिःकेन्द्रगतःस्यात्, चन्द्रमा लग्नगतः स्यात्, बृहस्पतिःद्वादश भावगतः स्यात् तदा जातकःभिक्षुकःचिन्तासागरे निम्नग्नःसन् परदेशं प्रति (विदेशं)गच्छति। उदाहरणार्थं कुण्डल्याः निर्माणं क्रियते।




← भिक्षुकः तथा परदेश गमनयोगः


अपि च नवम भावाधिपतिःद्वादशे स्यात्, पापग्रहःकेन्द्रे स्यात्तदा जातकः पापकर्मरतः, परान्नभोजी तथा मूर्खः भवति । कुण्डलीं यथा–




← निन्दनीय कर्मयोगः


पुनरपि, भाग्याधिपतिः (नवमेश) द्वादशभावगतः, तृतीये पापग्रहः, व्ययाधिपतिः द्वितीयभावे स्यात्तदा जातकः दुर्भोजी नाम गर्हितभोजनप्रियः, बन्धनयुक्तः, परेषां

स्त्रीषु रतः भवति । उदाहरणरूपेण कुण्डलीं उपस्थाप्यते ।




← कुत्सितकर्मयोगः

एवमेव सर्वेग्रहाःनीचराशिगताः, शतृनवांशगताः, दशमेशः भिन्नस्थानगताः सन्तःजातकःविद्या, बुद्धि , स्त्री, पुत्र, रहितः सन् भिक्षावृत्तिं करोति। कुण्डली स्थित ग्रहयोगाः यथा–




← भिक्षावृत्तिकर्मयोगः


पुनश्च पापग्रहाः शुभग्रहाः च केन्द्रगताः चन्द्रमा लग्नाधिपतिना दृष्टेः शनैश्चरस्य नवांशः स्यात्तदा जातकः कूलं नाशयति।

चर राशीनां अन्त्य भागे, स्थिर राशीनां आदौ, द्विस्वभावानां मध्ये चन्द्रस्य स्थितिः स्यात् । एवं लग्ने कोऽपिग्रहःन स्यात्तदा राजयोगस्य विनाशःभवति ।


जन्मलग्नः, जन्मराशिः, नवमभावाधिपतिः तथा सूय– चन्द्र –गुरवः , सर्वे स्व शत्रु गृहस्य नवांशगतः स्यात् अपिच स्व स्व नीचांशे स्यात्तदा जातकः अन्येषां अनुचरः भवति ।

यदि चन्द्रमा दशमभावे स्यात्, शुक्रःसप्तमभावे स्यात् , पापग्रहः नवमभावे स्यात् तदा जातकः कुलनाशकः भवति । सूर्य, बुध , चन्द्रमा, यदि केन्द्रगतः स्यात् राहुः जन्मलग्ने स्यात्तदा जातकः विहित कर्मनाशकःतथा नीच कर्म कर्त्ता भवति।

उदाहरणार्थं कुण्डलिं उपस्थाप्यते।





कुलनाशकयोगः





विहितकर्मनाशकयोगः

अपि च बृहस्पतिःअथवा सूर्यः नीचराशि गतः सन् केन्द्रगतः स्यात् । पापग्रहेण युक्तः स्यात्तदा जातकःबालघातकः भवति । यदि केन्द्रे पापग्रहाणां स्थितिःस्यात् , तस्योपरि शुभग्रहाणां दृष्टेरभावःस्यात् ,अपि च गुरुः अष्टम भावगतः स्यात्तदा जातकः गो,मृग जीवानां हन्ताः भवति । उदाहरणार्थं कुण्डली पश्यन्तु ।




← बालघातकयोगः




गोमृगयोनिनां विनाशकयोगः

यदि सर्वे पापग्रहाः केन्द्रे स्युः वा नीचांशके स्युः अपि च शत्रु राशौ स्युः, तेषां उपरि यदि षष्टाष्टम द्वादश भावगताःशुभग्रहाणां दृष्टिः स्यात्तदा राजयोगस्य भंगः भवति । अनेन प्रकारेण नीचराशिगताः शत्रुराशिगताः,क्रूर षष्टयंशगताःग्रहाः राजयोगान् नाशयन्ति । अन्येऽपि बहवः राजयोगानाशकाः योगाः सन्ति येषां ज्ञानं भवद्भिः विविधशास्त्राणां अनुशीलनेन कर्त्तुं शक्यन्ते । इदानीं राजयोग भङ्गस्य अन्यांशं आलोचयामः।

## ६.४ बोधप्रश्नाः

१)राजयोग भङ्गस्य कोऽर्थः ?

२)जातकपत्रे सूर्यः उच्चांशे अस्ति परन्तु नवांशे नीचराशौ तिष्ठति चेत् कः योगः ?

३)गुरुः,भौम–शनि –गुरुणा युतः एवं बुधशुक्राभ्यां युते किं फलम् ?

४)नवम भावाधिपतिः द्वादशे स्यात् ,पापग्रहाः केन्द्रे स्थिते जातकः कीदृश कर्मकर्त्ता भवति ?

५)क्रूर षष्ट्यंशगताः ग्रहाः किं कुर्वन्ति ?

## ६.५ रेकायोगाः


रेका कश्चित् योगो विशेषः । रेका योगे येषां योगानां विचारः भवति ते सन्ति दारिद्रय योगाः। तर्हि एकैकं आलोचयामः। सर्वप्रथमं रेकायोगस्य लक्षणं ग्रहस्थित्यनुसारं चर्चयामः । तद्यथा –


लग्नेशे बलवर्जिते परिभवस्थानाधिपेनेक्षिते
सूर्योच्छिन्नकरे पुरन्दरगुरौ रेकास्य योगो भवेत्
बन्धुस्थानपसंयुतांशकपतौ तिग्मांशुलुप्तद्युतौ
रिःफेशेन निरीक्षिते सति यदा योगस्तु रेकाह्वयः।।(जा.पा.६–२१)

१. अर्थात् बलहीनलग्नेशं यदि अष्टमाधिपतिः पश्येत् एवं बृहस्पतिः सूर्येण साकं स्थितोऽपि अस्तंगतःस्यात्तदा रेकानामको योगो भवति । इति प्रथमयोगः।

२.चतुर्थाधिपेनयुक्तः नवांशाधिपतिः सूर्येण साकं स्थितः अस्तंगतःस्यात् एवं द्वादशांशेन दृष्टः स्यात्तदा तादृशः योगः रेकाख्या । इति द्वितीययोगः

३.जिज्ञासवः ! एतस्य सुष्पष्ट ज्ञानाय कुण्डलीस्थ ग्रहस्थितिं अबलोकयामः तद्यथा–



पुनश्च योगस्यास्य अन्य ग्रहस्थितिं विचारयाम : –

४)चतुर्थेशः अष्टमेशेन युक्तः सन् षष्ठेशेन दृष्टः स्यात्तदा रेका नामकः दारिद्र्ययोगःभवति । अयं तृतीययोग :

५)दशमेशः पञ्चमेभावे स्यात्,लग्नेशः नीचराशि गतः स्यात्तदा रेकायोगः। यदि शुभ ग्रहाः ६, ८, १२ भावगताः, पापग्रहाः केन्द्रे ,कोणे वा स्युः एवं लाभेश : निर्वलः स्यात्तदा रेकानामकःदारिद्र्य योगः। अयं चतुर्थयोगः।


६) लग्नेशःपापग्रहाणां साकं स्यात्,गुरुशुक्रौ अस्तं गतौ स्यातां तदा रेका योगः। इति पञ्चमः ।


७)चतुर्थ भावाधिपतिः पापग्रहाणां साकं सन्नपि अस्तंगतः स्यात्तदा रेकायोगः भवति । इति षष्ठयोगः।


८)भाग्य (नवम) भवनाधिपतिः सूर्येणास्तमयः स्यात्त , लग्नेशः द्वितीयेशः च नीचे स्यात्तदा रेका नामकः कश्चित् दारिद्र्ययोगः। इति सप्तमः ।


पाठकाः! उपरि पठित योगानां स्पष्ट अबवोधनार्थं अधःभागे कुण्डल्यः निर्मियते।


तद्यथा–






रेकायोग कुण्डली–७

एतदतिरिक्त अन्येयोगाःसन्ति अपि रेकायोगस्य । तत्तु शास्त्राणां पूर्ण अनुशीलनेन कर्तुं शक्यते । इदानीं योगेऽस्मिन् जायमानस्य जातकस्य किं तावत् फलं तत् सामान्य रूपेण आलोचयामः । तद्यथा –

निर्विद्यो विधनो दरिद्रसहितो रेकोद्भवः कामुकः
क्रोधी दुःखितमानसो रुचिकरः सौभाग्यहीनः पटुः ।
भिक्षाशी मलिनो विवाद निरतो मात्सर्यरोषान्वितो
देवब्राह्मणदूषकः प्रतिदिनं दारात्मजैर्निन्दितः ।।
दुष्टात्मा कुनखी कुमार्गनिरतो दौर्भाग्ययोगान्वितो
बन्धूनामपकारदूषणपरःस्वल्पायुराभिक्षुकः ।
मूकोऽन्धो बधिरःप्रमत्तहृदयःकामातुरोषवान्
पङ्गुर्नेत्रविकारबावसहितो रेकोद्भवः स्यान्नरः ।।(जा.पा. ६ / २६, २७)

अर्थात् रेकायोगोत्पन्नःमनुष्यःमूर्खः,धनरहितः , दारिद्र्यात् विकलः । कामी,क्रोधी,दुःखी, रुचिकरः, सौभाग्यहीनः ,चतुरः,भिक्षुकः ,मालिन्यः ,विवादी रोषयुक्तः,प्रतिदिनं देवब्राह्मणनिन्दकः,स्त्री–पुत्र निन्दकः, दुष्टात्मा,कुनखी,कुमार्ग निरतः,अभागा ,बान्धवानां उपकारदूषकः,अल्पायुः,भिक्षुकः,बधिरः, प्रमत्त हृदयः,नेत्ररोगी,इत्यदि बहवः अशुभ फलानि भवन्ति योगेस्मिन् जायमान – मनुष्यस्य ।

## ६.६बोधप्रश्नाः

१)रेका कीदृशः योगः ?

२)योगेऽस्मिन् जायमानः कीदृशं फलं लभ्यते ?

३)नवमाधिपतिः अस्तंगतः स्यात्तदा कस्य योगोत्पत्ति ?

४)लग्नेशः पापग्रहाणां साकं स्यात् गुरुशुक्रौ अस्तं गतौ कीदृशः योगः ?

## ६.७प्रेष्य योगः

जिज्ञासवः! प्रेष्य शब्दस्य श्रवणमात्रेण अयं भावः आगच्छति यत् भृत्यः इति । अस्य सामान्य भावार्थः भवति ,यः परस्य गृहे स्थितः सन् तस्य प्रत्येकस्य कार्यस्य आज्ञाकारी इव करोति । तर्हि प्रेष्ययोगस्य के खलु ग्रहयोगाः तदधुना आलोचयामः।

१) यदि जातकपत्रे सूर्यः दशमभावगतः,चन्द्रमा सप्तम भावगतः,शनिःचतुर्थ भावगतः ,भौमः तृतीय भावगतः, बृहस्पतिः द्वितीय भावगतः , एवञ्च लग्नं चरराशि(१,४,७,१०)गतः, अपिच रात्रौ जन्मः स्यात्तदा जातकः परकार्यकृत् भवति ।

२) चेत् यदि शुक्रःनवमभावगतः,चन्द्रमासप्तम भावगतः, भौमः अष्टमभावगतः,बृहस्पतिः लग्नेशः वा धनेशः भवतु ,लग्नं स्थिराख्यं (२,५,८,११)स्यात्तदा योगःप्रेष्यसंज्ञकः। योगेऽस्मिन् जायमानः जातकःख्यातियुक्तः सन् परकार्यकृत् भवति ।

३) रात्रौ जन्मनि चरराशौ लग्नं स्यात् ,लग्नेशःसन्धि स्थानगतः, पापग्रहाःकेन्द्रगताः स्युः तदा जातकः प्रेष्यः भृत्यः वा भवति । यदि दिवसे जन्मः स्यात्, स्थिरराशौ लग्नं स्यात् ,शनि–चन्द्र–गुरु–शुक्राः केन्द्रे वा कोणे स्थिताः स्युः अपिच सन्धिगताः स्युः तदा जातकः प्रेष्यः भवति ।

४) बृहस्पतिःस्व ऐरावतांशे (प्र.अ४५–४८ श्लोके) सन्धिगतश्च भवेत्, चन्द्रमा स्व उत्तमवर्गे स्थितः सन् केन्द्रात् बहिःस्यात् , कृष्णपक्षस्य रात्रौ जन्मःस्यात्,शुक्रःलग्नगतःस्यात्तदा जातकःपरकर्मजीवी

भवति।

५) मङ्गल–बृहस्पति–तथा सूर्याःक्रमेण षष्ठ,चतुर्थ,तथा दशमभाव सन्धियाताः,चन्द्रमा पापग्रहस्य नवांशे स्यात्, बृहस्पतिः लग्नेशेन युतः स्यात्तदा जातकः परकर्मकर्ता भवति ।

६) बृहस्पतिः स्व नीच राशि गतः सन् षष्ठाष्टमद्वादश भावगतः स्यात्, चन्द्रमा लग्नात् चतुर्थे स्यात् तदा जातकः नित्यरूपेण परस्य दासत्वं स्वीकरोति । अर्थात् भृत्यत्वेन जीविकां निर्वहति ।

## ६.७.१. प्रेष्ययोगफलानि –

साधारणरूपेण यः कोऽपि योगोत्पन्नः जनः तद् योगजन्यः शुभाशुभं फलं भुङ्क्ते । परन्तु अयं प्रेष्ययोगः अशुभयोगत्वेन स्वीक्रियते । अतः योगस्यास्य फलनिरूपणाय पठित विषयं एव अनुसरामः। तद्यथा–

पापात्मा कलहप्रियः कठिनवाग् भूदेवतादूषको
विद्या भाग्यविहीनदुष्टरसिको मात्सर्यकोपान्वितः ।
मिथ्यावाद विनोदवञ्चनरतः शिश्नोदरे तत्परः
कारुण्यास्थिरमान भङ्गिचतुरो योगे पर प्रेष्यके ।।(जा.पा.६/४५)

अर्थात् प्रेष्ययोगोत्पन्नः पापात्मा, कलहप्रियः,कठिनवाक्भाषी, भूमिदेवता दूषकः, विद्याभाग्य विहीनः,दुष्टः,रसिकः,मात्सर्ययुक्तः,क्रोधि,मिथ्यावादी, वञ्चकः, दुष्टः तथा नष्टचरित्रः, चलचित्तः, कारुणिकः,अपमानं सोढुं चतुरः भवति ।

## ६.८ बोधप्रश्नाः

क) प्रेष्य शब्दस्य कोऽर्थ ?

ख) भृत्यः किं करोति ?

ग) बृहस्पतिःनीचराशौ सन्,षष्ठाष्टमद्वादशभावगतःस्यात्तदा कःयोगः?

घ) प्रेष्ययोगोत्पन्नः जातकः समाजे सम्मानं, निन्दा वा प्राप्नोति ?

ङ) स्थिरलग्ने शुक्रःनवमे, चन्द्रमा सप्तमे, गुरु लग्ने कः योगः ?


## ६.९- जन्मकालानुरोधेन अशुभयोगाः

पाठकाः ! भवगतः प्रसादात् मनुष्यस्य जन्मःभवति । तत्तु ग्रहाणां प्रभाव वशात् ।प्रारब्धकर्मानुकुलं अस्माकं वर्तमानस्य अवस्था । मातुः गर्भे यदा अस्माकं संरचना भवति तदानीं अपि ग्रहस्थितेःप्रमुख प्रभावः विद्यते ।शुभग्रहाणां अङ्गोपरि प्रभाववशात् अङ्गाः पुष्टाः, अशुभग्रहाणां प्रभावत्वात् उपद्रवग्रस्ताःच भवन्ति ।तर्हि अधुना कतिपय अशुभयोगानां चर्चां कुर्मः ।

### अङ्गहीनयोगः -

मेषेवृषे चापधरे विलग्ने विकार दन्तो यदि पाप दृष्टे ।
मन्दे मदस्थेऽहियुते कुजे वा बलैर्विहीनेऽङ्गविहीनवान् स्यात् ।।
(जा.पा. ६/४६)

अर्थात् मेषः,वृषः अथवा धनुलग्ने जन्मः स्यात् ।तस्योपरि पापग्रहाणां दृष्टिः स्यात् तदा जातस्य विकारयुक्तःदन्तः भवति ।यदि शनिःसप्तमे,स्यात् भौमेन राहुणा वा युक्तः सन् नवमे स्यात्तदा जातस्य कश्चिदेक अङ्गः हीनः भवति ।छात्राः! उदाहरणार्थं अधस्थित कुण्डलीं पश्यन्तु ।




←जन्मकुण्ड़ली

### सदन्तजन्मयोगः -

बुधस्य नवांशः(मिथुन,कन्या) स्यात्, तत्र शनिभौमौ स्यातां तदा जातस्य शिशोःजन्मःसदन्तो भवति ।नाम जन्मकाले तस्य दन्ताः स्युः इति भावः ।

### कुब्जयोगः -

कर्कटराशिगतः चन्द्रः स्यात् अपिच लग्नगतः स्यात् ।तस्योपरि मन्दमाहेय

(मङ्गल) दृष्टेः जातकः कुब्जः भवति ।

## पङ्गुयोगः -

मीनराशेः लग्नं स्यात्, तस्योपरि शनि-चन्द्र -भौमानां दृष्टिःस्यात्तदा जातकः पङ्गु भवति ।

## जडयोगाः-

चन्द्रमा तथा पापग्रहाःयदि राशिसन्धिस्थाःस्युः,तस्योपरि शुभग्रहाणां दृष्टेरभावः स्यात्तदा जातकःजडः(वधिरः) भवति ।

## बामन जन्मयोगः-

मकरराशेः अन्तिम नवांशखण्डे लग्नं स्यात् ,तस्योपरि शनि,चन्द्र,सूर्याणां दृष्टिः स्यात्तदा जातकः वामनः(लघुकायः)भवति । पञ्चम,नवम तथा लग्नस्य द्रेष्काणेशः पापग्रहेण पीडितःसन्नपि यदि क्रमेण शनि -चन्द्र-सूर्याणां दृष्टिः स्यात्तदा जातकः क्रमशःहस्तहीनः पदहीनः,शीरहीनश्च भवति ।

## नेत्ररहितयोगः-


सिंहलग्ने सूर्यचन्द्रौ स्यात्तां एवञ्च तस्योपरि कुजार्की निरीक्षिते तदा जातः नयनरहितः स्यात् । उपरिस्थ ग्रहयोगे यदि शुभाशुभ ग्रहाणां दृष्टिः स्यात्तदा जातः बुद् बुद् (Blear-eyed)नेत्र युक्तः भवति । यदि व्यये चन्द्रमा स्थिते वामनयोगस्य नाशःएवञ्च सूर्यः स्यात्तदा दक्षिण नेत्रं नाशयति । सूर्यचन्द्रौ द्वादश-भावगतौ जातकः अन्धः भवति । एवमेव नेत्र नष्टस्य अन्येऽपि योगाः सन्ति । तत्तु शास्त्राणां अवलोकनेन ज्ञातुं शक्यते । इदानीं प्रबलान्ध योगं आलोचयामः ।

षष्ठे चन्द्रेऽष्टमे भानौ लग्नादन्त्यगतेऽर्कजे
वित्तस्थानगते भौमे शक्रोऽप्यन्धोभवेद् ध्रुवम् ।।(जा.पा. ६ / ५ ८)


अस्यायं भावः यत्- लग्नात् षष्ठे चन्द्रमा स्यात् ,लग्नात् अष्टमे सूर्यः स्यात्, लग्नात् द्वादश स्थानगतःशनिः स्यात् , अपिच द्वितीये भौमःस्यात्तदा जातकः निश्चित रूपेण अन्धत्वं व्रजति ।

## रात्र्यन्धयोगः(**Night blind**)–

*यदि द्वितीय भवनाधिपतिःलग्नेशेन युक्तःस्यात् षष्ठाष्टम द्वादश भावगताःवा स्युःतदा जातकः अन्धत्वं उपैति। यदि द्वतीयेशः शुक्रः चन्द्रेण साकं लग्नगतः स्यात्तदा जातकः रात्र्यन्धःभवति । छात्राः! रात्र्यन्धः तथा अन्धयोगस्य उदाहरणं कुण्डली माध्यमेन स्पष्टीक्रियते।*




(रात्र्यन्धयोगः)




## ६.९.१ विविध रोगयोगाः –

*पाठकाः! जन्मकालस्य स्थिति वशात् विविध अशुभ योगाः वयं आलोतिवन्तः।*

*इदानीं आलोचयामः विविधःरोगयोगाः। यस्मिन् योगे प्रभावितःजनः रोगाक्रान्तःभवति । शास्त्रेप्रतिपादितेषु बहुविध रोगयोगेषु सामान्य रुपेण संगठित प्रमुख योगानां चर्चां वयं कुर्म । भवन्तः अनुशीलनं कुर्वन्तु ।*

*सूर्यः लग्ने स्यात्, तस्योपरि मङ्गलस्य दृष्टि :स्यात् तदा जातकः गुल्मः क्षयः तथा श्वास (*colic,consumption,asthma)*रोगेण प्रपीडितः भवति । मङ्गलः लग्ने स्यात् तस्योपरि शनेः सूर्यस्य च दृष्टि स्यात्तदा बसन्तरोगेण*(smallpox) *पीडितः भवति मनुष्यः ।*


## शुनकजन्यभयः–

*द्वितीयभावे शनिःपापग्रहेण दृष्टःयुक्तः वा स्यात्तदा जातकः शुनकःभयं प्राप्नोति*


## सर्प भय योगःतथा गलः योगः –

*सहजभवनाधिपतिः राहुणा समेतः यः राशिः तन्नाथेन सहितःअथवा राहुः लग्नगतःस्यात्तदा जातकस्य सर्पभयं भवति । तृतीयेशः बुधेन युक्तः स्यात्तदा*

गलरोगः भवति । जिज्ञासवः! योगद्वयस्य स्पष्टाववोधनार्थं कुण्डलीं उपस्थाप्यते। तद्यथा –




सर्पभय योगः




गलरोगः

## कर्ण रोगः –

पापग्रहःतृतीये स्यात्तदा गलरोगप्रदः भवति । गुलिकेन्दुयुतःतृतीयेशः सुनिश्चित रुपेण गलरोगं कारयति । तृतीयभावे भौमेन युक्तःगुलिकः जातकस्य कर्णरोगं कारयति ।

तृतीयभावः पापग्रहेण दृष्टः युक्तः वा स्यात् तदा जातकः कर्णरोगेण पीडां प्राप्नोति । तृतीय भवनाधिपतिः क्रूरादि षष्ठ्यंशे स्यात्तदा निश्चितरूपेण जातकः कर्णरोगं भुङ्क्ते ।

## ब्रणरोगः तथा श्लेष्मा रोगः –

बुधेन युक्तः भौमःषष्ठस्थाने क्रूरांशके स्यात् , तस्योपरि चन्द्रशुक्रयोः दृष्टिः स्यात्तदा जातकः श्लेष्मा रोगेण पीडामुपैति । केतुः धनाष्टमभावे पापग्रहेण दृष्ट : सन् ब्रणरोगं उत्पादयति ।

षष्ठाधिपतिः लग्ने पापग्रहेण युक्तः,अथवा षष्ठाधिपतिः अष्टमे भवेत्तदा शरीरः ब्रणरोगेण पीडितः भवति ।

## लिङ्ग रोगः–

षष्ठभावाधिपतिः भौमेन युक्तः स्यात् , शुभग्रहैः अदृष्टःस्यात्तदा जातकः

*लिङ्ग रोगी भवति ।*

## स्त्रीक्लीवयोगः -

*सप्तमेशः शुक्रेण युक्तः षष्ठ स्थानगतः भवेत् तदा स्त्री क्लीवत्वं उपैति ।*

## अभिचारकृत रोगः -

*चरराशि (१, ४, ७,१०)गतः लग्नःस्यात् , तस्योपरि षष्ठभावाधिपतेः दृष्टिःस्यात् अथवा मङ्गलः लाभे स्यात् ,धर्मभावस्य राशिःस्थिरः(२ ,८ ,५ ,११) स्यात् ,सप्तमे द्विस्वभावराशिः स्यात्तदा शत्रुकृतः अभिचारकर्मवशात् जातकः रोगग्रस्तः भवति ।*

## उन्माद रोग योगः-

*लग्ने सूर्यः स्यात् ,सप्तमे भौम स्यात् ,तदा मनुष्यःउन्मादः(पागलः) रोग-ग्रस्तः भवति । परन्तु लग्ने शनिः, सप्तमे अथवा त्रिकोणे भौमः स्यात्तदा जातकस्य उन्मादबुद्धिः भवति । अपि च लग्ने त्रकोिणे वा सूर्यचन्द्रौ भवेतां , गुरुःतृतीये भावे वा केन्द्रभावे स्यात् ,धनोः आद्यांशे लग्नं स्यात्तदा जातस्यापि उन्मादबुद्धिः भवति।*

## गुह्यरोगः कण्ठरोगः च-

*चन्द्रमा शनैश्चरेण साकं कर्कटः,कुम्भः,तथा वृश्चिकः नवांशगतः स्यात्तदा जातकः गुह्य रोगी भवति । चन्द्रमा चतुर्थ भावगतःस्यात्तदा वा चतुर्थभावः राशि नवांशगतः स्यात् ,पापग्रहेण युक्तः स्यात्तदा जातकः कण्ठ रोगेण पीडितः भवति ।*

## कुष्ठरोगयोगः-

*लग्नेशग्रहं वर्जयित्वा अन्ये पापग्रहाः लग्नगताः स्युःतदा स्युः तदा शरीरे कुष्ठं भवति । अर्थात् लग्नेशः लग्नगतःस्यात्तदा कुष्ठं न भवति इत्यर्थः । लग्न गतः शनिः पाप प्रभावेण प्रभावितःत्वात् नीलकुष्ठं भवति । सूर्यःस्यात्तदा रक्त कुष्ठं ,भौमःस्यात्तदा श्वेतकुष्ठं । शनैश्चरेण वा भौमेन युक्तः चन्द्रमा कर्क,मीन,तथा मकर नवांशगतः, तस्योपरि शुभग्रहाणां दृष्टेरभावः स्यात्तदा मनुष्यः कुष्ठ व्याधिना पीडिता भवति ।*

## गुल्मरोगं दाहरोगञ्च –


चन्दमा पापग्रहेण पीडित सन् शनैश्चरस्य (मकर,कुम्भ)गृहे षष्ठाष्टम भावगतः स्यात्तदा जातकःवायुजनिते गुल्मादिरोगे कष्टं प्राप्नोति । चन्द्रमा पापग्रहयोः मध्ये स्यात् ,शनिःसप्तम भावगतः स्यात्तदा जातकः दाहरोगे सन्तप्तःभवति ।

## उदररोगः–


भौमः लग्नगतः स्यात् ,षष्ठेशः निर्वलः स्यात्, तदा अजीर्णः तथा गुल्मरोगेण जातकः पिडामुपैति । लग्नं पापग्रहेण युक्तः स्यात्,राहुणा युक्तःस्यात् वा शनिः अष्टमे स्यात्तदा जातकः कुक्षिरोगेण पीडितःभवति ।

## हृच्छूलरोगः–

राहुः सुख(४)भवनगतः ,लग्ननाथः पापदृष्ट :तथा बलहीनः स्यात्तदा हृदय–शूलरोगेण पीडितःभवति जनः। लग्नेशः शत्रुगृहे वा नीच राशि गतः स्यात् भोमः चतुर्थ भावगतः स्यात् ,शनिः पापग्रहेण दृष्ट : स्यात्तदा शूलरोगेण मनुष्यःपीडितः भवति । उदर तथा हृच्छूल योग कुण्डली –



(हृच्छूलयोगः)



(कुक्षिरोगयोगः)

## जलोदर रोगयोगाः–

शनैश्चरः कर्कराशिगतः, चन्द्रमा मकर राशिगतः स्यात्तदा जातकः जलोदर रोगे पीडितः भवति । प्रतिपादितानां विविधयोगानां वर्णनं केवलं (जातकभङ्गाः राजयोगभङ्गा )अशुभत्वेन पठिता :। परन्तु यदि बृहस्पतिः स्व वर्गोत्तमे शुभवर्गे स्थितः सन् लग्नेस्यात् अथवा चतुर्थे स्यात् वा बलवान् स्यात् एवं च सर्वे ग्रहाः द्वितीय, एकादश ,चतुर्थः भावगताः स्युः तदा जातकः प्रच्छन्न सुखप्राप्तिं करोति ।

## ६.१०बोधप्रश्नाः

१)सदन्त जन्मस्य कोऽर्थः ?

२)सप्तमेशः शुक्रेण युक्तः षष्ठभावगतः कः योगः ?

३)उन्माद बुद्धिः कस्मिन् ग्रहयोगे भवति ?

४)विशेषतःकःभावः पापप्रभाविते रोगादिकं जायते ?

५)जलोदर रोगस्य किं लक्षणम् ?

## ६.११-संक्षिप्त उत्तरमूलक प्रश्नाः

१) भाग्याधिपतिःद्वादशभावगतः,तृतीये पापग्रहाः स्युःत्तदा कस्य योगस्य लक्षणम् ?

२)सूर्यःपरम नीचांश गते कीदृशं फलम् ?

३)रेकायोगः कीदृशः ?

४)प्रेष्ययोगाः शुभाः अशुभाःवा ?

५)शनिः केन्द्रे लग्ने वा स्यात् तस्योपरि अशुभ दृष्टेः कीदृशःयोगः ?

६)क्रूर षष्ठ्यंशगताःग्रहाः किं कुर्वन्ति ?

७)गुरुः सूर्यो वा नीचांशगतःसन् केन्द्रे एवं पापदृष्टेःकः योगः ?

८)लग्नेशः पापग्रहाणां साकं स्यात्, गुरुशुक्रौ अस्तं गतौ कस्य योगस्य लक्षणम् ?

९)प्रष्य योगोत्पन्नः जनः कीदृशः ?

१०)सदन्तः जन्मयोगे कस्य ग्रहस्य नवांश विचारं भवति ?

## ६.१२ नातिदीर्घोत्तर मूलकप्रस्नाः

१)नेत्ररहितः तथा रात्र्यन्धयोगस्य लक्षणं निरुपयत ?

२)सोदाहरणं सदन्तजन्मयोगं व्याख्याकार्या ?

३)हृच्छूलरोगः तथा शूलामयरोगस्य लक्षणं निरूपणं कुरु ।

४)सर्पभययोगः तथा गलरोगस्य लक्षणं विविच्यताम् ?

५)पञ्च राजयोगनाशकाः योगाः लेख्याः ।

## ६.१३ दीर्घ उत्तर मूलक प्रश्नाः

१)जन्म कालानुरोधेन अशुभयोगाः सोदाहरणं निरूपयत ।

२)पञ्च रोग योगानां सोदाहरनं ब्याख्या कार्याः ?

३)शास्त्रोक्तरिक्त्या प्रेष्य योगात् फलंविलिक्षताम् ?

## ६.१६ संक्षिप्तोत्तरमूलक प्रश्नानां उत्तराणि

१)कुत्सितकर्मयोगः २)दारिद्र्ययोगः ३)दारिद्र्यसूचकः४)अशुभाः ५)भिक्षुकः ६)राजयोगान् नाशयन्ति ७)बालघातकः८)रेकायोगस्य ९)पापात्मा,कलहप्रियः च १०) बुधस्य

❖❖❖

# सत्पमपाठषष्ठपाठ्यसूची

---

| क्रं.सं. | | पृ.सं |
|---|---|---|

---


७.१ प्रस्तावना

७.२ उद्येशानि

७.३ राजाधिराजयोगाः

७.४ पञ्चमहापुरुषयोगाः

७.४.१ रुचकयोगस्य लक्षणम्

७.४.२ भद्रयोगस्य लक्षणं

७.४.३ हंस योगस्य लक्षणं फलं च

७.४.४ मालव्य योगस्य लक्षणं तत्फलंञ्च

७.४.५ शशक योगस्य लक्षणं फलं च

७.५ चन्द्रकृत राजयोगाः

७.५.१ सुनफा योगफलानि

७.५.२ अनफायोग फलानि

७.५. ३ दुरुधरायोग फलानि

७.५.४ केमद्रुम योगफलानि

७.६ रविकृत राजयोगाः

७.६.१ वासि योगे जायमानस्य शुभाशुभ फलम् –

७.६.२ वेशियोगे जायमानस्य शुभाशुभ फलम्

७.६.३ उभयचरी योगे जायमानस्य शुभाशुभ फलम्

७.७ नाभसयोगाः

७.८ अन्येऽपि प्रमुखाः राजयोगाः–

७.९ संक्षत्पि उत्तरमुलकः प्रश्नाः

७.१० नातिदीर्घोत्तर मूलकप्रश्नाः

७.११ दीर्घोत्तरमूलक प्रश्नाः

७.१२ संक्षित्प उत्तरमूलकप्रश्नानां उत्तराणि

❖❖❖

# सप्तमपाठः

## ७.१प्रस्तावना

*शुभं भूयात्, शुभंभूयात् शुभं भूयात् तु सर्वदा । इति न्यायेन केवल मनुष्यः एव शुभाशुभं ज्ञातुं समर्थोऽस्ति नान्ये । इत्यत्र ग्रहाः सर्वत्र योगकारकाः भवन्ति । भवतुनाम शुभयोगाः, भवतुनाम अशुभयोगाः । जातकशास्त्रे उक्तमस्ति यत्*

*"ग्रहा राज्यं प्रयच्छन्ति, ग्रहाः राज्यं रहिन्ति च" । अस्मात् वचनात् सिध्यति यत् मनुष्यस्य भाग्य निर्णायकाः सन्ति एव रव्यादि ग्रहाः । अस्माकं प्रकृत पाठस्य अनुशीलने वयं सर्वादौ जानीमः यत् के तावत् राजयोगाः एवञ्च किं तस्य लक्षणम् । किं वा राजयोगे जन्मितः राजा भवति ? अस्माकं गणतन्त्रराष्ट्रे राजतन्त्रं तु न चलति । सामान्यरूपेण चिन्तयामः यत् राजयोगोत्पन्नः जातकः प्रभावशाली तथा प्रभुत्व सम्पन्नः भवति । अद्यतने समाजे ये खलुः नेतारः ते सर्वे राजयोगेन प्रभाविताः भवन्ति । यः राजयोगः प्रभावितः न भवति अपितु तस्यां पदव्यां कार्यं करोति सः सुष्ठुरूपेण राजकर्मं संचालयितुं अक्षमः भवति । तर्हि राजयोगाः भवन्ति,– यस्मिन् योगे जायमानः जनः नृपतिः भवति वा नृपति तुल्यं सम्मानं प्राप्नोति । तादृशः योगः राजयोग शब्देन उच्यते । राजयोगेन प्रभावितः जनः समाजस्य कृते बहु हितकरं कार्यं सम्पादयति । उक्तं च*

*ग्रहाणां स्थिति भेदेन पुरुषान् योजयन्ति हि ।*
*फलैः कर्मसमुद्भूतैः इतियोगः प्रकीर्त्तितः ।। (प्रश्नमार्गः)*

## ७.२उद्येशानि

*छात्राः विविध राजयोगान् जानन्ति ।*

*राजयोगः प्रभावितः जनस्य स्वभावं अनुभवन्ति ।*

*पञ्चमहापुरुषयोगाः, रविचन्द्रकृतराजयोगाः, गजकेशरी योगः तथा विशिष्ट राज योगानां परिचयः भवन्ति ।*

*ग्रहाणां योगः वशात् राजयोगस्य प्रावल्यं, दौर्वल्यञ्च ज्ञानं भवति ।*


## ७.३ राजाधिराजयोगाः


*प्रिय पाठकाः ! सर्वप्रथमं राजयोगानां चर्चावसरे राजाधिराज योगस्य चर्चा कुर्मः । तत्र आङ्ग्लोभाषायां (*king of kings*) इति उच्यते । विषयस्यास्य शास्त्रीय वचनं यथा–*

> ceevemLeeveHel eewlej eYeJei el esHeej eJel eeDMeş LeJee
> mJee®®emJe# e&eğ VeJeeDMekeÀ el esj epeeeÐej epeesYeJesed~
> uei vesveeR®ei eÞsHeg vo j i eg ewj vOeśmeHeeHeû en s
> l eê eM³ eDMe mec eeqJel es³ eeõ l eo ej epeeeÐej epeesYeJesed~(pee.Hee.7 / 1 6 )

Dem³ eMueekeÀm³ eDe³ ec esleeLe&YeJeef e³ el ed pev c ekeğÀC[ u³ eebo Mec eeeÐeHeef e: Deä ces YeeJesm³ eel eDeeHe®e Hej eJel eeDMekeÀm³ eel ed(mJe®®e;mJe# e)l ee¿ Me: yeeuekeÀ: c eveg³ e: Jee j epeeeÐej epe: veec e®e¬eÀJeÊeea YeJeef e~

SJeb®e vee®ej eeMei el e: i eg© : m³ eel ed,Deä c eYeeJe: HeeHeû enwÒeYeeeÐel e: , l eê eM³ eDMe: mec eeqJel esped esvej : j epeeeÐej epe: YeJeef e ~ í e$ee: ! efvec ves Òeo Êe: pev c ekeğÀC[ ueeR meeJeOeeveswe HeM³ evl eg~




De$e ÒeLec e Go enj Ceso Mec eMe: Meefve: Deä c eeYeeJesl eg ee³ eebG®®e: l eLee ®ej eefMe veJeeDMei el e: ³ eeisekeÀej keÀ ~ eÜl ee³ e Go enj Cesc ekeÀ ueï vesl eHee³ eveJeeDMesi eg© :, Deä c eYeeJes l eHee³ eveJeeDMei el e: me³ e%e³ eeisebkeğÀ© l e: ~

## ७.४ पञ्चमहापुरुषयोगाः–

*पञ्चमहापुरुषयोगाः भारतीय ज्योतिषशात्रस्य राजयोगेषु प्रमुखं स्थानं*


अलंकरोति । तत्र पञ्चमहापुरुष योगानां लक्षणानि शास्त्रानुसारं लिख्यते ।

तद्यथा–

मूलत्रिकोण निजतुङ्ग गृहोपयाता भौमज्ञजीवसितसूर्यसूता वलिष्ठाः ।
केन्द्रेस्थिताःयदि तदा रुचभद्रहंस मालव्यचारुशशयोगकराःभवन्ति।।
(जा.पा.७/५९)

## ७.४.१ रुचकयोगस्य लक्षणम्

पञ्चमहापुरुषेषु प्रथममहापुरुषयोगः भवति रुचकः। तस्य ग्रहः स्थितिं यथा यदि बलवान् मङ्गलः मूलत्रिकोणे,स्वगृहे,उच्चे वा प्राप्तः सन् केन्द्रगतःभवति , तादृशः योगः रुचकनामध्येयःमहापुरुष योगः। तस्मिन् योगे जन्मितः नरःबलयुक्तः,शीलयुक्तः सौन्दर्ययुक्तः,कोमलशरीरवान् ,योगी एवश्च सप्ततिवर्ष पर्यन्तं सुखी भवति। तर्हि छात्राः! रुचकयोगस्य ग्रहस्थितिं अनुसरामः। तद्यथा – इत्यत्र भौमःलग्ने उच्चः। तदर्थं अयं योगः रुचकयोगस्य उदाहरणम्।





रुचक जन्म कुण्डली

## ७.४.२ भद्रयोगस्य लक्षणं

बुधःयदि निजतुंग राशिगतःस्यात्तदा जातकस्य जन्मयोगः भद्रयोगेन भवति । उदाहरणं यथा –

भद्र कुण्डली➔




अस्मिन् योगे जायमानः जनस्य शरीर सदृशः मुखः, गज इव गतिः , बन्धुउपकारी, विशिष्टबुद्धियुक्तः, यशः धनयुक्तः, अशीति वर्षपर्यन्तं सुखभोगी तथा राज भोगी भवति।

### ७.४.३ हंसयोगस्य लक्षणं फलं च

इदानीं हंस योगस्य लक्षणं तत् फलं च विचारयामः। जन्मकाले यदि गुरुः मूल-त्रिकोणे , निजतुङ्गे, स्वगृहेषु वा कश्चित् एकस्मिन् राशिगतः स्यात् तदा जातकः हंस नामकः महापुरुषयोगे जन्मितः इति ज्ञातव्यः । हंसयोगस्य उदाहरणं यथा – अस्मिन् योगे जायमानःजनःउच्चमहत्वाकांक्षी, गौराङ्गी, शास्त्रज्ञानपारग , कार्येषु निपुण :। एतस्य आयुः ८४ वर्ष पर्यन्तं भवति ।

हंस योगस्यकुण्डली ➔





### ७.४.४मालव्ययोगस्य लक्षणं तत्फलंञ्च

इदानीं मालव्य महापुरुषयोगस्य लक्षणं तत् फलं च विचारयामः। तत्र मालव्य योगः शुक्रस्य स्थिति वशात् एव भवति । यदि शुक्रःमूलत्रिकोणे, निजतुङ्गे , स्वगृहेषु वा कश्चित् एकस्मिन् अंशे अवस्थितः स्यात्तदा जातकःमालव्य नामध्येयः महापुरुषयोगे जन्मः भवति । तर्हि उदाहरणं एव पश्यामः–

अस्मिन् योगे जायमानः सुनेत्रयुक्तः, तेजस्वी, धनी, शास्त्रार्थज्ञः, ज्ञः उत्साही, त्यागी, परस्त्रीरतः एवञ्च अन्तिमे सप्तति वर्षपर्यन्तं सुखभोगं कृत्वा मृत्युं प्राप्नोति ।


मालव्य योग कुण्डली ➔




### ७.४.५ शशाक योगस्य लक्षणं फलं च

*अये च्छात्राः! इदानीं पञ्चमहापुरुष योगस्य अन्तिमयोगःभवति शशकयोगः। शशकयोगः शनैश्चरस्यस्थिति वशात् एव भवति । उपरि प्रतिपादितेषु,स्थितिषु यदि शनि : यस्मिन् कस्मिन् अपि स्थाने तिष्ठति तदा शशकनामध्येयः महापुरुषयोगः भवति । इदानीं शशकयोगस्य उदाहरणं पश्यामः–*

*शशकयोगस्य कुण्डली➔*




*शशक योगोत्पन्न :पुरुषःराजा अथवा मन्त्री भवति । क्रूरबुद्धिः,मातृशक्तिनिरतः,पराक्रमी, सेनाध्यक्षः एवं सप्तति वर्षप्रमितं तस्यायुःभवति ।*

**<u>महापुरुष योगाः</u>**

| | |
|---|---|
| **रुचकः** | **मङ्गलः** |
| **भद्रकः** | **बुधः** |
| **हंसकः** | **बृहस्पतिः** |
| **मालव्यः** | **शुक्रः** |
| **शशकः** | **शनिः** |


*तत्र राजयोगे इयं विशेषता भवति यत्– यस्मिन् कस्मिन्नपि राजयोगे योग–कारकः ग्रहः यदि बलीयान् वा बलीग्रहेण दृष्टःयुतः वा स्यात्तदा सःग्रहः स्व दशायां जातकाय विशिष्टं फलं प्रददाति। निर्बलत्वे योगस्य नष्टता इति ।*

## ७.५ चन्द्रकृत राजयोगाः


*प्रिय पाठकाः! चन्द्रः अपि राजयोगप्रदः भवति । चन्द्र वशात् यद्राजयोगःभवति तद् सुनफा,अनफा,दुरुधरा तथा केमद्रुमः योगाः। इदानीं अनफादि राजयोगान् चर्चां कुर्मः–*

*सूर्यं विहाय चन्द्रात् द्वादश स्थान स्थितः ग्रहः अनफा योगकारकः भवति ।*


सूर्यं विहाय: चन्द्रात् द्वितीय स्थानगत: ग्रह:स्यात् तदा सुनफा योगकारक: भवति। सूर्यं विहाय: चन्द्रात् उभयपार्श्वे यदि ग्रहा: स्यु:तदा तादृश: योग: दुरुधरा योगाख्य: ।एवं च सूर्यं विहाय: चन्द्रात् उभयपार्श्वे यदि ग्रहाणां अभाव: स्यात्तदा केमद्रुम नामध्येय: योग: भवति । छात्राणां स्पष्ट अववोधनाय चन्द्रकृत राजयोगानां कुण्डल्य: उपस्थाप्यन्ते ।





अनफा योग कुण्डली




सुनफा योगकुण्डली




दुरुधरा योगकुण्डली.




केमद्रुम योगकुण्डली

तत्र केमद्रुमयोगा: दारिद्र्य योगा: इत्युच्यन्ते । केमद्रुमयोगस्य कश्चित् अपवाद: शास्त्रान्तरे प्राप्यते । तस्य सामान्य आलोचनां कुर्म: ।

केमद्रुमयोग:सन्नपि यदि चन्द्रमा अथवा शुक्र: केन्द्रे स्यात् तत्र गुरुणा दृष्ट:स्यात्तदा केमद्रुम: नामक: दारिद्र्ययोग:न भवति । चन्द्रमा शुभग्रहै:युक्त:तथा बृहस्पतिना दृष्ट:स्यात्तदा दरिद्र योग: न भवति ।

इदानीं सुनफादि योगानां फलानि विचारयाम: ।

## ७.५.१ सुनफा योगफलानि

सुनफायोगे समुत्पन्न:जातक: स्वपौरुष:वशात् धनं अर्जयति । राजतुल्य प्रभुतां

*धनं च प्राप्नोति । सः बुद्धिमान् ,यशस्वी अपि भवति ।*

### ७.५.२अनफायोग फलानि

*अनफा योगोत्पन्नः जातकः अन्यान् जनान् स्व वशे स्थापयति । सः निरोगी, शरीर सुख इच्छुकः, सुशीलः, विख्यातः, भोगैश्वर्य युक्तः च भवति ।*

### ७.५.३दुरुधरायोग फलानि

*अस्मिन् योगे जायमानः जनः प्राप्तसुखोपभोगी, धन-वाहनसम्पन्नः, दानप्रियः, चरित्रवान् सुगुणयुक्तः भृत्यस्नेही च भवति ।*

### ७.५.४ केमद्रुम योगफलानि


*केमद्रुमयोगे जन्मितः बालकः राजवंशोत्पन्नः सन्नपि दुःखी, दृष्टप्रकृतियुक्तः, धनहीनः तथा अन्य जनसेवा निरतः भवति ।*

## ७.६रविकृत राजयोगाः


*यथा चन्द्रस्य द्वि,द्वादशः तथा उभयस्थिति वशात् अनफादि योगाः भवन्ति । तथैव सूर्यस्य द्वि द्वादशः तथा उभयत्र स्थिति वशात् अपि योगाः भवन्ति । तेतु, वासी, वेशी,उभयचरी नाम्ना प्रसिद्धिः । तर्हि वास्यादि योग बोधकं पद्यं यथा –*

**व्ययधनयुतखेटैर्वासि वेशी दिनेशात्**
**उभयचरिकयोगश्चोभयस्थानसंस्थैः ।**
**निजगृह सुहृदुच्चः स्थानयातैश्च जाता**
**बहुधन सुखयुक्ताः राजतुल्या भवन्ति** *।। (जा.पा ७/१२१)*


*अस्य श्लोकस्य अयं अभिप्रायः यत् चन्द्रं विहायः सूर्यात् द्वादशभावे यदि ग्रहाः भवन्ति तदा वासि योगस्य लक्षणम् । सूर्यात् द्वितीये ग्रहे वेशी योगस्य लक्षणम् । एवञ्च सूर्यस्य उभयभावे ग्रहाणां अवस्थितिः उभयचरी योगस्य लक्षणम् । तत्र विशेष रूपेण ग्रहाः यदि उच्चराशिस्थिताः, मित्रस्यगृहेगताः, स्युः तदा वास्यादि योगः अतिप्रभावपूर्णः भवति । इदानीं छात्राः ! सुगमतया अवबोधनार्थं कुण्डलीं निरूप्यते । तद्भवन्तः सावधानेन अनुशीलनं कुर्वन्तु ।*




वासियोग कुण्डली




वेसियोग कुण्डली




उभयचरी कुण्डली

## ७.६.१वाशि योगे जायमानस्य शुभाशुभ फलम् –

*यस्य जातकस्य जन्मःशुभग्रहयुक्तः वासियोगे भवति चेत् सः चतुरः,दानी , विद्वान् , सदा आनन्दितः,परमसुखी,यशस्वी तथा बलवान् भवति । यदि अयं योगः पापग्रहेण स्यात्तदा जातकः विदेशी, महामूर्खः,कामातुरः,रक्तपिपासु तथा विकृतमुखयुक्तः च भवति ।*

## ७.६.२ वेशियोगे जायमानस्य शुभाशुभ फलम्

*पाठकाः! वेशियोगोत्पन्नः नरः सुशीलः,वक्ता,धनी,अभयः तथा शत्रुजयी भवति। तत्र वेशि योगः पापग्रहः कृतः चेत् जातक : दुष्टजनसेवकः,पापात्मा,तथा धन सुखाभ्यां हीनः भवति ।*

## ७.६.३ उभयचरी योगे जायमानस्य शुभाशुभ फलम्

*उपरि लिखितानां ग्रहयोगानां फल इव उभयचरी योगस्य फलं भवति । तत्र*

उभयचरी योगःशुभग्रहाणां सकाशे भवेत्तदा जातकः पुरुषेषु श्रेष्ठः। राज्ञः सदृशः धन–सुख सम्पन्नः,दयया अनुरक्तः भवति । अशुभग्रहाः योगकारकाः स्युःतदा जातकःपाप कर्मतत्परः,रोगयुक्तः,एवं अन्यस्य कर्मकर्ता भवति ।

## ७.७ नाभसयोगाः

प्रिय पाठकाः! नाभसयोगाःअपि राजयोग तुल्याः भवन्ति । नाभस योगस्य अयं अभिप्रायः यत् नभसि स्थितानां ग्रहाणां स्थितिः। जातकपत्रे ग्रहाणां अवस्थितिः भिन्नरीत्या भवति । कदा शुभाय तु कदा अशुभाय इति । तत्र नाभसयोगाः बहुप्रकारकाःसन्तिः। तत्तु दल–आश्रय –वीणा...... प्रभृतयः ।

तत्र दलयोगः द्विविधः–१) स्रक् २)सर्पः

आश्रययोगः च त्रिविधः–१)रज्जुः २)मूषलः ३)नलः

संख्यायोगःसप्तः – १)वीणा २)वरदामः३)पाशः ४)केदारः ५)शूलः ६)युगः७)गोलकः

आकृतियोगाः विंशत्यः –१)यूपः२)इषुः३)शक्तिः४)यवः५)दण्डम् ६)गदा ७)समुद्रः ८)छत्रम् ९)अर्धचन्द्रम् १०)शकटम् ११)अम्बुजम्१२)पक्षी १३)नौ१४)चक्र १५)वज्र१६)हलः१७)कार्मुकम् १८)कूटम् १९)वापी २०)शृङ्गाटकः


इत्यत्र उपरि लिखिताः योगाः नाभसयोगाख्याः। तत्र सर्वादौ आश्रययोगत्रयं विचारयामः। तेषु सर्वप्रथमं रज्जुयोगस्य लक्षणम् – ग्रहाः यदि चरराशि गताः स्युःतदा रज्जु नामकः कश्चित् राजयोगः। तत्तु नाभस योगाख्यः ।

ततः द्वितीयं मूषलयोगस्य लक्षणम् – ग्रहाःस्थिरराशि गताःस्युः तदा मूषल नामकः कश्चित् नाभसयोग विशेषः।


ततः तृतीयं नलयोगस्य लक्षणम् – ग्रहाःद्विस्वभावराशि गमने उत्पन्नः योगः नल योगः इति ।

आश्रययोगः इति नामकरणस्य अयमेव अभिप्रायः यत् ग्रहाः निर्दिष्टभावाश्रये स्थितःत्वात् । इदानीं जिज्ञासवः ! नाभसयोगाश्रितः दल नामकस्य योगस्य चर्चां कुर्मः । सर्वादौ श्रक् (माला) योगस्य किं तावत् लक्षणम् ? मालायोगं नाम ग्रहाः मालाकारेण कुण्डल्यां सन्निवेशिताः सन्ति इति भावः । तर्हि तस्य ग्रहयोगं यथा – सर्वे शुभग्रहाःकेन्द्रगताः स्युः । एवं पापग्रहाः केन्द्रे न स्युः तदा तादृशः ग्रहयोगः मालायोगः इति नाम ।


सर्पयोगः – उपरिलिखितस्य योगस्य वैपरीत्येन सर्पयोगःभवति । अर्थात् सर्वे पापग्रहाः केन्द्रगताः स्युः, एवञ्च शुभग्रहाः केन्द्रे न स्युः तदा तादृशःयोगः सर्पयोगः इति । जिज्ञासवः ! इदानीं भवतां सौविध्यार्थं उपरि प्रतिपादितानां योगानां कुण्डल्यः निर्मियन्ते । तद्यथा –




रज्जुयोगः




नलयोगः



मूषलयोगः



मालायोगः



सर्पयोगः

अध्येतारः ! इदानीं अन्यान्अपि नाभस योगान् आलोचयामः ।

१)सर्वे ग्रहाः द्वि समीपवर्त्ती केन्द्रे स्युःतदा तादृशः योगः गदायोगःइति। द्वि समीपवर्त्ती केन्द्रं अर्थात्(१,४), (४,७), (७,१०), (१०,१)।

२)सर्वे ग्रहाः लग्ने सप्तमे वा स्युःतदा शकट नामकयोगः भवति ।

३)सर्वे ग्रहाःचतुर्थे दशमे वा स्युः तदा विहग नामकयोगः भवति।

४)सर्वे ग्रहाः लग्ने नवमे,पञ्चमे,(त्रिकोण) स्युः तदा शृङ्गाटकयोगः भवति ।

५)सर्वे ग्रहाःलग्नं त्यक्त्वा अन्य त्रिकोणस्थाने स्युः तदा हलनामकयोगः।

एवमेव अन्येषां नाभसयोगानां अधिकाधिक ज्ञानाप्तये फलितशास्त्रस्य बहु पुस्तकानां अनुशीलनं कर्तुं शक्नुमः। उपरिलिखितानां नाभस योगानां फलानि विचारयामः।

१)रज्जु योगोत्पन्नः जातकः अन्यस्य उन्नतिं इच्छति,निरन्तरं परदेश निवासी भवति एवं च सर्वदा उचिते मार्गे गन्तुं रुचिः उत्पादयति।

२)मूषल योगोत्पन्नः मानी,धनी,तथा बहु भृत्यासक्तः भवति ।

३)नल योगोत्पन्नः अङ्गहीनः,दृढनिश्चययुक्तः,निपुणः प्रत्येककार्येषु सूक्ष्मदृष्टिसम्पन्नः भवति ।

४)माला योगोत्पन्नःजातकःभोगी,तथा सर्पयोगोत्पन्नः मनुष्यः विविधैः दुखैः पीडितो भवति ।

५)गदायोगोत्पन्नःजातक यज्ञकर्मकर्त्ता, धनभोगी,तथा धन संग्रहे उद्यमी भवति।

६)शकटयोगोत्पन्नःजातकः स्व आजीविकां शकटेन तथा यान माध्यमेन करोति । सःनित्यरोगी एवं तस्य पत्नी कुरूपा भवति ।

७)विहंग योगेन जायमानः जनः दूतःभवति । तथा कलहप्रियःअपि भवति ।

८)शृङ्गाटकयोगोत्पन्नः नरः बहुकालं सुखी भवति ।

१०)हलयोगोत्पन्नःजनःकृषिकर्मनिपुणःपशुपालनेदक्षः तथा समाजे लोकमान्यः भवति।

## ७.८ अन्येऽपि प्रमुखाः राजयोगाः-

नाभसयोगानां वर्णनात्परमेव अन्येपि विशिष्टराजयोगाः सन्ति । येषां स्थिति


वशात् मनुष्यःनृपतुल्य प्रभुतां प्राप्नोति । तेषां राजयोगानां नामानि भवन्ति –गज –केशरीयोगः, कलानिधियोगः,अंशावतारयोगः, हरिहरविधियोगः, कुसुमयोगः,पारिजातयोगः,प्रभृतयः । इदानीं तेषां योगानां लक्षणानि उदाहरणानि च आलोचयामः ।

सर्वादौ गजकेशरी योगस्य चर्चा –

**“ केन्द्रेस्थिते देवगुरौ मृगाङ्काद्योगस्तदाहु र्गजकेशरीति । ,,**


अर्थात् चण्द्रात् देवगुरौ केन्द्रगते गजकेशरीयोगःभवति । अस्मिन् योगे जायमानःजनः तेजस्वी,धनधान्यसम्पन्न :मेधावी,गुणसम्पन्नः, तथा राजप्रियः भवति । अस्य योगस्य सुस्पष्ट अववोधनाय कुण्डलीं उपस्थाप्यते । तद्यथा –

गजकेशरी योगः➔




**कलानिधि योगः** – बृहस्पतिः यदि लग्नात् द्वितीये पञ्चमे भावे बुधशुक्रभ्यां युक्तः,दृष्टःवा स्यात्तदा जातक कलानिधियोगे जन्मः भवति । कलानिधि योगस्य ु स्पष्ट ज्ञानार्थं उदाहरणं प्रस्तूयते ।

कलानिधियोगः➔




कलानिधि योगे जायमानःजनःकामी,सुन्दरगुणयुक्रः,राजपूजितः, सेनापूजितः भेरी ,शंख बाद्यप्रेमी,रोगरहितः भवति ।

## ततः अंशावतार योगः-

शुक्रः एव बृहस्पतिःकेन्द्रे स्यात् । शनैश्चरः स्वच्चे स्थितः सन् केन्द्रे स्यात्


एवं चर लग्नं स्यात्तदा जातकः अंशावतार योगे जन्मः। अंशावतार योगे उत्पन्नः जतकः पूण्यचरित्रयुक्तः, तीर्थसेवी , कलावित् , कामाशक्तः, तेजप्रियः, वेदतत्वज्ञाता तथा राजश्रीयुक्तः भवति ।

## ततः हरिहर विधियोगः–


सर्वप्रथमं हरियोगस्य लक्षणं भवति – द्वितीयभावाधिपतितःयदि द्वितीय, अष्टम, द्वादश, भावेषु, शुभग्रहाः स्युः तदा हरिनामधेयः राजयोगः भवति।

ततःहर योगस्य लक्षणम् – सप्तमाधिपतितः चतुर्थ–अष्टम–नवम–भावेषु यदि गुरु, चन्द्र, बुधाणां अवस्थितिः स्यात्तदा तादृशः राजयोगः हरनामधेयः योगः भवति।


ततः विधियोगः आलोचयामः। विधियोगस्य अन्य नाम ब्रह्मयोगः भवति । अस्य राजयोगस्य लक्षणं भवति – लग्नेशात् चतुर्थ, दशम, एकादश भावेषु क्रमेण सूर्य, भोम, शुक्राःस्युःतदा ब्रह्मः नामकः राजयोगः भवति । अस्मिन् हरिहर राजयोगोत्पन्नः जातकः भिन्नशास्त्राणां ज्ञाता, सत्यवादी, सकल सुखभोगी, प्रिय वादी, कामशीलः, शतृजयी, सर्वजीवोपकारी तथा पुण्य कर्मकर्त्ता भवति । छात्रा ! भवतां स्पष्ट अववोधनाय कुण्डलीं उपस्थाप्यते।



कुण्डली१ (हरि)



कुण्डली२ (हर)



कुण्डली३ (बिधि)

अये च्छात्रा ! एतान् राजयोगान् विहाय अन्येऽपि राजयोगाः सन्ति । तदर्थं होराशास्त्रस्य अन्येग्रन्थाः अवलोकनीयाः। अस्य पाठस्य लेखःसूक्ष्मः त्वात् पाठस्य अन्तर्भागे बोधप्रश्नान् न दत्वा अन्तिमे आदर्शप्रश्नाः एव दीयन्ते ।

## ७.९संक्षिप्तउत्तरमूलकप्रश्नाः

१) पारावतांशके इत्यस्य कोऽर्थः ?

२) रुचकयोगस्य किं लक्षणम् ?

३) पञ्चमहापुरुष योगाः के ?

४) चन्द्रात् द्वितीये स्थिते ग्रहे कीदृशःयोगः ?

५) दुरुधरायोगस्य किं लक्षणम् ?

६) सूर्यात् द्वितीये स्थाने स्थिते ग्रहे कः योगः ?

७) उभयचरीयोगस्य लक्षणं किम् ?

८) सर्वे ग्रहाः स्थिरराशि गताः सन्तः के योगाः ?

९) केन्द्रगताः सर्वे शुभग्रहाः कीदृशयोगं उत्पादयन्ति ?

१०) द्वि समीपवर्ती केन्द्रे ग्रहाःस्युः तदा कस्य योगस्य लक्षणम् ?

११) चन्द्रात् केन्द्रे स्थितेः गुरोः कीदृशः योगः ?

१२) चरराशिगताः ग्रहाः कीदृशं योगं उत्पादयन्ति ?

## ७.१०नातिदीर्घोत्तरमूलकप्रश्नाः

१) अनफायोगं विलिख्य सोदाहरणं व्याख्या कार्या ।

२)उभयचरीयोगस्य लक्षणं विलिख्य व्याख्या कार्या ।

३)नाभसयोगद्वयं विलिख्यताम् ।

## ७.११दीर्घोत्तरमूलकप्रश्नाः

१) पञ्चमहापुरुषयोगाः सोदाहरणं प्रतिपादयत ।

२) चन्द्रकृतराजयोगाः के विलिख्यताम् ।

३)स्वकल्पित उदाहरणं दत्वा राजयोगत्रयं विलिख्यताम् ।

## ७.१२ संक्षिप्त उत्तरमूलकप्रश्नानां उत्तराणि

१)ग्रहःउच्चस्थे,स्वर्क्षे,सुहृन्नवांशगते वा पारावतांशे इति कथ्यते। २)भौमस्य उच्च राशिगतः त्वात् , ३)रुचक,भद्रक,हंसक,मालव्य,शशक, ४)सुनफा, ५)सूर्यं विहाय चन्द्रं उभयतःग्रहस्थितिः, ६)वेशि,७)सूर्यं उभयतः ग्रहस्थितिः, ८)मूशलयोगः, ९)मालायोगः, १०)गदायोगः, ११)गजकेशरीयोगः, १२)रज्जुयोग

❖❖❖

# अष्टमपाठसूची

---

| क्रं.सं. | | पृ.सं |
|---|---|---|

---


| | |
|---|---|
| ८.१ | प्रस्तावना |
| ८.२ | उद्देश्यानि |
| ८.३ | द्विग्रहयोगाः |
| ८.३. १ | चन्द्रेण साकं द्विग्रहयोगाः |
| ८.३.२ | भौमेन साकं द्विग्रहयोगाः |
| ८.३.३ | बुधेन साकं द्विग्रहयोगाः |
| ८.३.४ | गुरुणा साकं द्विग्रहयोगाः |
| ८.३.५ | शुक्रेणसाकं द्विग्रहयोगाः |
| ८.४ | बोधप्रश्नाः |
| ८.३.४ | गुरुणा साकं द्विग्रहयोगाः |
| ८.३.५ | शुक्रेणसाकं द्विग्रहयोगाः |
| ८.४ | बोधप्रश्नाः |
| ८.५ | त्रिग्रहयोगाः |
| ८.६ | बोधप्रश्नाः |
| ८.७ | चतुर्ग्रहयोगाः |
| ८.८ | बोधप्रश्नाः |
| ८.९ | पञ्चग्रहयोगाः |
| ८.१० | बोधप्रश्नाः |

| | |
|---|---|
| ८.११ | षड् ग्रहयोगाः |
| ८.१२ह | ोधप्रश्नाः |
| ८.१३ | तन्वादि भावगतग्रहफलम् |
| ८.१३.१ | द्वितीयभावस्थ ग्रहफलम् |
| ८.१३.२ | तृतीयभावस्थित ग्रहफलम् |
| ८.१३.३ | चतुर्थभावस्थितः ग्रहफलम् |
| ८.१३.४ | पञ्चमभावस्थ ग्रहफलम् |
| ८.१३.५ | षष्ठभावस्थ ग्रहफलम् |
| ८.१३.६ | सत्पमभावस्थ ग्रहफलम् |
| ८.१३.७ | अष्टमभावस्थ ग्रहफलम् |
| ८.१३.८ | नवमभावस्थ ग्रहफलम् |
| ८.१३.९ | दशमभावस्थ ग्रहफलम् |
| ८.१३.१० | एकादश भावफलम् – |
| ८.१३.११ | द्वादशभावफलम् – |
| ८.१४ | बोधप्रश्नाः |
| ८.१५ | उच्च नीच मुलत्रिकोण तथा स्वक्षेगादिषु, ग्रहस्थिति फलम |
| ८.१६ | संक्षिप्तउत्तरमूलकप्रश्नाः |
| ८.१७ | नातिदीर्घत्तरमूलकः प्रश्नाः |
| ८.१८ | दीर्घोतोरमूलकप्रश्नाः |
| ८.१९ | संक्षिप्तउत्तरमूलकप्रश्नानां उत्तराणि |


❖❖❖

# अष्टमपाठः

## ८.१ प्रस्तावना

ज्योतिषशास्त्रं ग्रहचरितं इति सर्वजन विदितमेव। प्रत्येकस्य विषयस्य प्रारम्भः ग्रहचरितात्,एवं प्रत्येकस्य विषयस्य अन्तःग्रहचरिते एव भवति। तत्र ग्रहाः (रव्यादयः) योगकारकाःएव भवन्ति । साधारणरूपेण ग्रहाणां लेखन प्रकारः योगोत्पादकःन भवति । अपिच ग्रहाःयदि कुण्डलीमध्ये सन्निवेशिताःसन्ति तदानीं योगकारकाः भवन्ति । यथा प्रत्येके देवीदेवाःस्व स्व यन्त्रे अधिष्ठिताःभवन्ति तथैव ग्रहाः स्व यन्त्रे (कुण्डल्यां)अधिष्ठिताः सन्तः फलप्रदाः भवन्ति । अस्मिन् विषये नास्ति कस्यापि मतभेदः। अस्माकं आलोचितः विषयः भवति द्वित्र्यादि ग्रहयोगे जातकः कीदृशं फलं प्राप्नोति ?

## ८.२ उद्देश्यानि

अस्य पाठस्य पठने छात्राणां निम्न अंशानां ज्ञानं भविष्यति ।

१)द्विग्रहयोग–त्रिग्रहयोग–चतुर्ग्रहयोगान् ज्ञास्यन्ति ।

२)विभिन्न भावस्थितः ग्रहफलस्य ज्ञानं भविष्यति ।

३)उच्चनीच मूलत्रिकोण स्थित ग्रहफलानां ज्ञानं भविष्यति ।

४)मित्रशत्रुक्षेत्रे ग्रहयोग फलानां ज्ञानं भविष्यति ।

## ८.३ द्विग्रहयोगाः

जिज्ञासवः! ग्रहाधीनं भवेद्योगः,योगाधीनं फलंततः। अर्थात् जन्मसमये ग्रहाणां अवस्थानं ग्रहयोगशब्देन अभिधीयते । कुण्डल्यां द्वि द्वि ग्रहाणां योगः द्विग्रहशब्देन उच्यते । तत्र के तावत् ग्रहाः योगकारकाः भवन्ति तदधुना आलोचयामः। सर्वादौ सूर्येण साकं द्विग्रहयोगाःयथा –

१)यस्य जन्मसमये चन्द्रेण युतःसूर्यः स्यात्तदा सः जातकः सर्वदा स्त्रियाः अनुगामी तथा व्यावहारिक कार्येषु दक्षः भवति ।

२)मङ्गलेन साकं सूर्यःयोगकारकःस्यात्तदा सःजातकःबलवान् ,तेजस्वी, मिथ्यावादी,पापी च भवति ।

३)बुधेन सह सूर्यःयोगकारकः भवति चेत् जातकः विद्यया,रूपेण,बलेन च युक्तः भवति ।

४)बृहस्पतिना युक्तःसूर्यःयोगकारके सति जातकं विभिन्न श्रद्धाक र्मेषुनिरताः राज्ञः प्रियकरः तथा धनसम्पन्नं कारयति ।

५)सूर्यः शुक्रेण सह यदि द्विग्रहयोगं करोति तदानीं सः जातकाय स्त्री माध्यमेन अर्थाप्तिं कारयति । बान्धवेषु च युक्तः भवति ।

६)शनैश्चरेण सह सूर्यः यदि द्विग्रहयोगं करोति तदानीं जातकः मन्दबुद्ध्या पीडा,शत्रुमाध्यमेन कष्टं च प्रप्नोति ।

## ८.३.१चन्द्रेण साकं द्विग्रहयोगाः

१)चन्द्रमा भौमेन युक्तः स्यात्तदा जातकःवीरः,कुलीनः,धर्मात्मा,धनी, तथा गुणवान् भवति ।

२)चन्द्रमा बुधेन सह यदि द्विग्रहयोगं कुर्यात्तदा जातकः धर्मप्रियः,शास्त्रज्ञाता तथा विचित्र गुणेषु युक्तः भवति ।

३)चन्द्रःगुरुणा सह द्विग्रहयोगे जातकं साधुजनावलम्बी तथा पूर्णरूपेण बुद्धिमान् करोति ।

४)चन्द्रः शुक्रेण सह युक्तः स्यात्तदा जातकः पापी, क्रय–विक्रय कार्ये दक्षः भवति ।

५)चन्द्रमा शनैश्चरेण सह योगकारकःस्यात्तदा जातकः दुष्टपत्नी युक्तःपितुः निन्दकःतथा निर्धनः भवति ।

## ८.३.२भौमेन साकं द्विग्रहयोगाः

१)भौमः बुधेन सहःयोगकारकःस्यात्तदा जातकः सुवक्ता, विविध औषधीनां

ज्ञाता तथा शिल्पकला निपुणः भवति ।

२)भौमःगुरुणा सह द्विग्रहयोगकारकः स्यात्तदा जातकः कामक्रीडाप्रियः, पूज्यः, गुणवान् तथा गणित शास्त्रस्य ज्ञाता भवति ।

३)मङ्गलः जन्मसमये शुक्रेण सह योगकारकः स्यात्तदा जातकः विभिन्नधातु व्यवहारी,प्रपञ्च श्रवणप्रेमी तथा धूर्त स्वभावयुक्तः भवति ।

४)जन्मकाले भौमः शनैश्चरेण सह योगकारकः स्यात्तदा जातकःवादी नाम वाद्ययन्त्रचालकः, जडबुद्धियुक्तः च भवति ।

## ८.३.३बुधेन साकं द्विग्रहयोगाः

१)जन्मकाले बुधेन युक्तः देवगुरुः यदि द्वि ग्रहयोगं उत्पादयति तदा जातकः सुवक्ता, रूपवान् ,गुणवान् तथा धनवान् भवति ।

२)बुधः शुक्रेण युक्तः स्यात्तदा जातकः विविध शास्त्राणां ज्ञाता,संङ्गीतप्रेमी तथा सर्वदा हास्यमुखयुक्तः भवति ।

३)बुधः सूर्यसूतेन सह यदि द्विग्रहयोगं करोति तदा तादृशी परिस्थितौ जातकः विद्वान् ,धनबान् ,गुणबान् तथा धर्मात्मा भवति ।

## ८.३.४ गुरुणा साकं द्विग्रहयोगाः

१)बृहस्पतिःशुक्रेणसह योगकारकःस्यात्तदा जातकःतोजस्वी,राजप्रियः,तथा अत्यन्तःबुद्धिमान् भवति ।

२)गुरुः शनैश्चरेण सह योगकारकः स्यात्तदा जातकः शिल्पकारः भवति ।

## ८.३.५ शुक्रेणसाकं द्विग्रहयोगाः

१)शुक्रः शनैश्चरेण साकं द्विग्रहयोगं कृते सति जातकःपशुसम्पत्ति युक्तः तथा मल्लः भवति ।

## ८.४बोधप्रश्नाः

१)द्विग्रहयोगस्य कोऽर्थः ?

२)जन्मकाले शुक्रशनी द्विग्रहयोगे कीदृशं फलम् ?

३)सूर्यः शुक्रेण सह युति स्यात्तदा जातकः कस्य सकाशात् अर्थं उपार्जयति ?

४)क्रय विक्रय कार्येषु दक्षः जातकः कस्यां स्थितौ भवति ?

५) कस्मिन् ग्रहयोगे जातकःसंङ्गीतप्रेमी भवति ?

## ८.५ त्रिग्रहयोगाः

जातकपत्रे (सूय,चन्द्र,तथा भौम ) त्रयाणां ग्रहाणां समावेशःत्रिग्रहयोग शब्देन उच्यते । तत्र सर्वादौ

१)सूर्य–चन्द्र–भोमानां एकत्रावस्थितिः जातके त्रियोगं उत्पादयति । तस्मिन् योगे जायमानः जनःशत्रुहन्ता ,धनी ,नीतिशास्त्राभ्यासी च भवति ।

२)सूर्य–चन्द्र–बुधाः जातकपत्रे त्रिग्रहयोगं उत्पादयन्ति चेत् जातकः राजासमानःयशस्वी तथा विद्वान् भवति ।

३)सूर्य–चन्द्र–गुरवः योगकराः स्युःतदा जातकःगुणवान् , विद्वान् ,तथा राजप्रियः भवति ।

४)त्रिग्रहयोगे यदि सूर्य–चन्द्र–शुक्रणां स्थितिःस्यात्तदा जातकः परस्त्रीगामी क्रूरः,शत्रुभयकारी तथा धनवान् भवति ।

५)सूर्य–चन्द्र–शनयःयदि योगोत्पादकाःतदा जातकः खलवुद्धियुक्तः,मायावी, विदेशप्रियः च भवति ।

६)सूर्य–मङ्गल–बुधाः त्रिग्रहयोगोत्पादकाःस्युःतदा जातकः सुखरहितः, स्त्रीपुत्राभ्यां युक्तश्च भवति ।

७)सूर्य–मङ्गल–बृहस्पतिः त्रिग्रहयोगोत्पादकाःस्युः तदा जातकःजनप्रियः,मन्त्री च भवति ।

८)सूर्य–मङ्गल–शुक्राःत्रिग्रहयोगोत्पादकाःस्युः तदा जातकः नेत्ररोगी ,

धनवान् तथा भोगसाधनप्रियःभवति।

## ८.३.४ गुरुणा साकं द्विग्रहयोगाः

१)बृहस्पतिःशुक्रेण सह योगकारकःस्यात्तदा जातकःतोजस्वी,राजप्रियः,तथा अत्यन्तःबुद्धिमान् भवति ।

२)गुरुः शनैश्चरेण सह योगकारकः स्यात्तदा जातकः शिल्पकारः भवति ।

## ८.३.५ शुक्रेणसाकं द्विग्रहयोगाः

१)शुक्रः शनैश्चरेण साकं द्विग्रहयोगं कृते सति जातकःपशुसम्पत्ति युक्तः तथा मल्लः भवति ।

## ८.४बोधप्रश्नाः

१)द्विग्रहयोगस्य कोऽर्थः ?

२)जन्मकाले शुक्रशनी द्विग्रहयोगे कीदृशं फलम् ?

३)सूर्यः शुक्रेण सह युति स्यात्तदा जातकः कस्य सकाशात् अर्थं उपार्जयति ?

४)क्रय विक्रय कार्येषु दक्षः जातकः कस्यां स्थितौ भवति ?

५) कस्मिन् ग्रहयोगे जातकःसंङ्गीतप्रेमी भवति ?

## ८.५ त्रिग्रहयोगाः

जातकपत्रे त्रयाणां ग्रहाणां समावेशःत्रिग्रहयोग शब्देन उच्यते । तत्र सर्वादौ

१)सूर्य–चन्द्र–भोमानां एकत्रावस्थितिः जातके त्रियोगं उत्पादयति । तस्मिन् योगे जायमानः जनःशत्रुहन्ता ,धनी ,नीतिशास्त्राभ्यासी च भवति ।

२)सूर्य–चन्द्र–बुधाः जातकपत्रे त्रिग्रहयोगं उत्पादयन्ति चेत् जातकः राजासमानः यशस्वी तथा विद्वान् भवति ।

३)सूर्य–चन्द्र–गुरवः योगकराः स्युःतदा जातकःगुणवान् , विद्वान् ,तथा राजप्रियः भवति ।

४)त्रिग्रहयोगे यदि सूर्य–चन्द्र–शुक्रणां स्थितिःस्यात्तदा जातकः परस्त्रीगाामी

क्रूरः,शत्रुभयकारी तथा धनवान् भवति ।

५)सूर्य–चन्द्र–शनयःयदि योगोत्पादकाःतदा जातकः खलवुद्धियुक्तः,मायावी, विदेशप्रियः च भवति ।

६)सूर्य–मङ्गल–बुधाः त्रिग्रहयोगोत्पादकाःस्युःतदा जातकः सुखरहितः, स्त्रीपुत्राभ्यां युक्तश्च भवति ।

७)सूर्य–मङ्गल–बृहस्पतिः त्रिग्रहयोगोत्पादकाःस्युः तदा जातकःजनप्रियः,मन्त्री च भवति ।

८)सूर्य–मङ्गल–शुक्राःत्रिग्रहयोगोत्पादकाःस्युः तदा जातकः नेत्ररोगी , धनवान् तथा भोगसाधनप्रियःभवति।

९)सूर्य–मङ्गल–शनि ,त्रिग्रहयोगोत्पादिके जातकः वन्धु वान्धवः रहितः मुर्खः,धनी,तथा रोगी भवति।

१०)जातके सूर्य–वुध–गुरवः त्रिग्रहयोगं उतपादयन्ति चेत् मनुष्यः कोमळ शरीर युक्तः विद्वान् जशश्वी तथा शुखी भवति।

११)सूर्य–वुध– गुरुः त्रिग्रह योगं कृते सन्ति जातकः बन्धुहीनः धनहीनः वैरी दुराचारी भवति।

१२)सूर्य–बृहस्पति– शुक्रः च जातक पत्रे एकत्र स्यात्त तदा जातक स्त्री–पुत्र युक्तः,बुद्धिमान,नेत्र रोगी भवति।

१३)त्रि योगोत्पादक : सूर्यः–गुरुः शनियः चेत् जातकः निर्भयः सात्विकः सत्विकतथा राजप्रियः च भवति।

१४)योगोत्पादक : शुक्रशनयः चेत् जातकः दुष्ट चरित्र युक्त गर्वी तथा अभिमानी भवति।

१५)जन्म काले चन्द्र,मङ्गल बुधाः योग कारकाः स्युः तदा जातक सदा भोजन प्रिय भवति।

छात्राः भवतां अववोधनार्थं पंक्ति माध्यमेन योगाः लिख्यते।

| त्रिग्रहयोगाः | फलानि |
| --- | --- |
| गुरु,चन्द्र,मङ्गल | क्रोधी,कामातुर.रुपवान् |
| शुक्र,चन्द्र,मङ्गल | हीनस्वभाव,पुत्तहीन,भ्रमण शील |
| शनि,चन्द्र,मङ्गल | चञ्चल बुद्धि,दुष्टात्मा |
| गुरु,चन्द्र,वुध | धनि,राजप्रिय |
| शुक्र,चन्द्र,वुध | विद्वान् नीच कर्त्ता,सेवाप्रिय |
| शनि,चन्द्र,वुध | दानी ,राजपूज्य,गुणवान् |
| शुक्र,चन्द्र,गुरु | प्राज्ञः,सुपुत्री,कळअप्रिय |
| शनि,चन्द्र,गुरु | शास्त्रप्रमी,बृद्धस्त्रीयाशक्तः ,तथा राजतुल्य |
| शनि,चन्द्र,शुक्र | वेदज्ञ,राजपुरोहित,सुन्दरभाग्यो युक्तः |
| गुरु,बुध,मङ्गळ | गान्धर्व विद्याज्ञाता,काव्यनाटकस्य ज्ञाता |
| शुक्र,वुध,मङ्गल | हीनाङ्गः ,दुष्टवंशोत्पन्न,चञ्चल बुद्धियुक्तः |
| शनि,बुध,मङ्गल | सर्वदा भ्रमण सील,रतः |
| शुक्र,मङ्गल,चन्द्र | राजमित्र,सुपुत्री,सुखी |
| गुरु,मङ्गल, शनि | दुर्वल,दुराचारी,मानी |
| शुक्र,मङ्गल, शनि | कुपुत्री,सदा पर देशनिवासी |
| शुक्र,बुध,बृहस्पति | शत्रुजयी,कीर्त्तिमान् |
| शनि,बुध,बृहस्पति | विशेषसुखीः,श्रीमान् ,स्वस्त्रीप्रियः |
| शनि,शुक्र,बृहस्पति | स्वच्छबुद्धियुक्तः,विख्यातः,सुखी |

वि.द्र.- चन्द्रमा पापयुक्तःस्यात्तदा जातकःअल्पसुखीः। सूर्यःपापयुतःस्यात्तदा जातकःस्व पितरं स्वल्पसुखं यच्छति ।

## ८.६ बोधप्रश्नाः

१) त्रिग्रहयोगस्य कोऽर्थः ?

२) गुरु–चन्द्र–भौमाः जातके एकत्रावस्थितेः जातकाय किं प्रयच्छति ?

३) कस्यां परिस्थितौ जातकः परस्त्रीगामी भवति ?

४) त्रिग्रहयोगे पापयुक्तः चन्द्रमा जातकाय किं यच्छति ?

५) कस्य ग्रहस्य प्रभावे पिता अल्पसुखी भवति ?

## ८.७ चतुर्ग्रहयोगाः

प्रिय पाठकाः ! त्रिग्रहयोगात्परं जातके कदाचित् चतुर्ग्रहयोगाः अपि भवन्ति । केचन आचार्याः अयं चतुर्ग्रहयोगः प्रवज्या योगत्वेन स्वीकुर्वन्ति । चतुर्ग्रहयोगानां सविधि व्याख्यां न कृत्वा सुस्पष्ट अवबोधनाय पंक्तिरूपेण अत्र लिख्यते ।

| चतुर्ग्रहयोगाः | फलानि |
|---|---|
| सूर्य चन्द्र, मङ्गल, बुध | मायवी, प्रपञ्ची, लेखकः, रोगी |
| चन्द्र, मङ्गल, सूर्य, बृहस्पति | धनवान्, यशस्वी, बुधिमान्, राजाप्रिय, निरोगी |
| मङ्गल, सूर्य, चन्द्रमा, शुक्र | पुत्र–स्त्री धनयुक्तः, विद्वान्, अल्पभोजी, सुखी कार्यनिपुणः, कृपालु |
| सूर्य, चन्द्रमा, शनि, मङ्गल | चञ्चलनेत्रयुक्तः, भ्रमणप्रियः व्यभिचारिणी–स्त्रियाः स्वामी, निर्धनः |
| बुध, चन्द्र, सूर्य, गुरु | मित्र–पुत्र–स्त्रीयुतः, धनवान्, गुणी, बलवान्, उदारः |
| बुध, चन्द्र, सूर्य, शुक्र | वाचालः, मस्तिष्कपीडा |
| शनि, बुध, चन्द्र, सूर्य | निर्धनः तथा कृतघ्नः |
| गुरु, चन्द्र, सूर्य, शुक्र | जले, वने विचरणशीलः, राजपूज्यः तथा भोगी |
| गुरु, चन्द्र, सूर्य, शनि | विशालनेत्रयुक्तः, धनवान्, पुत्रवान् वेश्यापतिः |
| शुक्र, चन्द्र, सूर्य, शनि | निर्वलः, भयालु, कन्याद्वारा धनोपार्जकः |
| सूर्य, मङ्गल, बुध, गुरु | सवलः, विपत्तियुक्तः, स्त्री सम्पत्तियुक्तः, नेत्ररोगी तथा भ्रमणशीलः भवति । |
| सूर्य, मङ्गल, बुध, शुक्र | परस्त्रीरतः, विषम नेत्रयुक्तः चौरवुद्धिः, धनरहित, भवति । |
| सूर्य, मङ्गल, बुध, शनि | सेनापति, राजमन्त्री, नीचकर्मरतः, भोगी |

| | |
|---|---|
| सूर्य,मङ्गल,गुरु,शुक्र | राजासदृशः,विख्यातः, विशेषपूज्यः,धनी |
| सूर्य,मङ्गल,गुरु,शनि | निर्धनः,भ्रान्तः,मित्रयुक्तः,उत्तमपरिवारयुक्तः |
| सूर्य,मङ्गल,शुक्र,शनि | सर्वदा पराजितः,कुकर्म युक्तः |
| सूर्य,बुध,गुरु,शुक्र | धनः,यशप्रधानः,जननेता भवति। |
| सूर्य,बुध,गुरु,शनि | कलहकर्त्ता ,अभिमानी,दुराचारी |
| सूर्य,बुध,शुक्र,शनि | सुन्दरमुखः, आचारवान्,सत्यव्रती |
| चन्द्र,मङ्गल,बुध,गुरु | राजप्रियः,मन्त्री,कवि |
| चन्द्र,मङ्गल,बुध,शुक्र | सुन्दरीपत्नी,सुपुत्रयुक्तः,बुद्धिमान्, विरुपः, सुखी |
| चन्द्र,मङ्गल,बुध,शनि | माताद्वयं,पिताद्वयं,पराक्रमी,विशेषस्त्रीपुत्र युक्तः। |
| चन्द्र,मङ्गल,शुक्र,चन्द्र | पापकर्मनिपुणः,निद्रालु,धनातुरः |
| चन्द्र,मङ्गल,सूर्य,चन्द्र | स्थिरबुद्धिः,पराक्रमी,सुखी,पण्डितः |
| शुक्र,बुध,चन्द्र,गुरु | बधिरः,विद्वान्,यशस्वी,धनी |
| बुध,चन्द्र,गुरु,शनि | धनवान्,बन्धुप्रियः,धार्मिकः |
| शुक्र,शनि,चन्द्र,गुरु | सुखः,श्रद्धा तथा दयाहीनः भवति। |
| मङ्गल,बुध,शुक्र,गुरु | धनवान् तथा निन्दकः |
| मङ्गल,बुध,शनि,गुरु | रोगी,धनहीनः |
| बुध,शनि,गुरु,शुक्र | धनवान्, विद्वान ,शीलवान् भवति। |

उपरिलिखित ग्रहयोगानुसारं फलानि वर्णिताः सन्ति।

## ८.८ बोधप्रश्नाः

१)चतुर्ग्रहयोगः कथं भवति ?

२)जन्मकाले यस्मिन् राशौ सूर्य, चन्द्र,बुध,शुक्राःस्युःतदा जातकाय किं लभ्यते ?

३)कस्मिन् योगे जायमानःबालकःवाचालः भवति ?

४)निर्धनः तथा कृतघ्न योगस्य किं लक्षणम् ?

## ८.९पञ्चग्रहयोगाः

प्रिय जिज्ञासवः!चतुर्ग्रहयोगस्य आलोचनात्परं इदानी पञ्चग्रहयोगान् पठामः। पञ्चग्रह –योगाःतदानीं भवन्ति यदा एकस्मिन् राशौ एव पञ्चग्रहाः अवस्थिताः भवन्ति । पाठकाः! विषयस्य स्पष्टअववोधनाय पंक्ति माध्यमेन पञ्चग्रहयोगान् आलोचयामः। भवन्तःसावधानेन अवलोकयन्तु ।

| **ग्रह योगाः** | **फलानि** |
|---|---|
| सूर्य,चन्द्र,मङ्गल,बुध,गुरु | युद्धे कुशली,पिशुनः(चुगलखोर) |
| सूर्य,चन्द्र,मङ्गल,बुध,शुक्र | विधर्मी,श्रद्धावान्,बन्धुरहितः, परकार्यपरायणः। |
| सूर्य,चन्द्र,मङ्गल,बुध,शनि | पराश्रयी,इष्टरमणीविरहः,अल्पायुः |
| सूर्य,चन्द्र,मङ्गल,गुरु,शुक्र | आततायी,बन्धुजनव्यक्तः,नेत्रहीनः |
| सूर्य,चन्द्र,मङ्गल,गुरु,शनि | मानधनहीनः,मलिनः,परस्त्रीरतः |
| सूर्य,चन्द्र,बुध,गुरु,शुक्र | मन्त्री, धनी,अन्यस्य कृते दण्डदाता, |
| सूर्य,चन्द्र,बुध,गुरु,शनि | परान्नभोजी,भयालु,पापी,उग्रवृतिः |
| सूर्य,चन्द्र,बुध,शुक्र,शनि | धनहीनः,दीर्घाकृतिपुत्ररहितः, रोगवान् |
| सूर्य,चन्द्र,गुरु,शुक्र,शनि | स्त्रियाःसह वाचालता,इन्द्रजालिकः निर्भयः शत्रुयुक्तः |
| सूर्य,मङ्गल,बुध,गुरु,शुक्र | शोकरहितः,सेनाधिपतिः,परस्त्रीषु चञ्चलता |
| सूर्य,मङ्गल,बुध,गुरु,शनि | भिक्षान्नभोजी,पुरातनवस्त्रधारी |
| मङ्गल,बुध,गुरु,शुक्र,शनि | पूज्यः,रोगी, कलिप्रियः,बन्धनयुक्तः |
| सूर्य,मङ्गल,बुध,गुरु,शनि | श्रेष्ठदुःखी,रोगी,क्षुधार्तः |

| | |
|---|---|
| सूर्य, चन्द्र, गुरु, शुक्र, शनि | दूतः, दरिद्रः, मलिनवेशयुक्तः, चौरः महामूर्खः । |
| सूर्य, मङ्गल, बुध, गुरु, शनि | मन्त्रक्रियानिपुणः, बलप्रधानः |
| सूर्य, चन्द्र, गुरु, शुक्र, शनि | ज्ञानी, देवगुरु, भक्तः, धर्मशीलः |
| मङ्गल, चन्द्र, गुरु, शुक्र, बुध | साधु, सुखी, धनधान्यसम्पन्नःविद्वान् |
| चन्द्र, गुरु, शुक्र, बुध, शनि | सर्वपूज्यः, विकलनेत्रः, राजतुल्यः |

## ८.१०बोधप्रश्नाः

१)पञ्चग्रहयोगाःकथं भवन्ति ?

२)पञ्चग्रहयोगेषु के ग्रहाः सर्वादौ योगकारकाः ?

३)कस्मिन् योगे जातकःपरान्नभोजी, भयालु तथा पापी भवति ?

४)कस्मिन् योगे जातकः साधु भवति ?

## ८.११षड् ग्रहयोगाः

पाठकाः! पञ्चग्रहयोगस्य पठनात्परं अधुना षड्ग्रहयोगाःपठामः। पञ्चग्रहयोगः इव षड्ग्रहयोगः । पूर्वनियमानुसारं पंक्ति माध्यमेन षड्ग्रहयोगान् आलोचयामः। भवन्तः सावधानेन अनुशीलनं कुर्वन्तु ।

| **ग्रहयोगाः** | **फलानि** |
|---|---|
| सूर्य, चन्द्र, मङ्गल, बुध, गुरु, शुक्र– , | तीर्थाटनप्रेमी, वने, पर्वते च निवासी स्त्रीपुत्रयुक्तः |
| सूर्य, चन्द्र, बुध, गुरु, शुक्र, शनि– | शरोवेनाग्रस्त, उन्मादी , देवभूमिनिवासी, परदेशे निवासी । |
| सूर्य, मङ्गल, बुध, गुरु, शुक्र, | शनिसञ्चारशील:, विद्वान |
| चन्द्र, मङ्गल, बुध, गुरु, शुक्र, | शनितीर्थयात्री, ब्रतीूर्यऽचन्द्र, |
| मङ्गल , बुध, गुरु, शनि | चौरः, परस्त्रीरतः, बन्धुद्रोहीः, मूर्खः, पुत्ररहितः विदेशे निवासी । |

| | |
|---|---|
| सूर्य,चन्द्र,मङ्गल,बुध,शुक्र,शनि | नीच,अन्यकर्माशक्तः,क्षयरोगी |
| सूर्य,चन्द्र,मङ्गल,गुरु,शुक्र, | शनिान्त्री,सुखी,स्त्रीपुत्रहीनः, शान्तिप्रियः भवति। |

## ८.१२बोधप्रश्नाः

१)षड्ग्रहयोगाः कथं भवन्ति ?

२)कस्मिन् ग्रहयोगे जातकः शिरोवेदना ग्रस्तः भवति ?

३)ब्रती तथा तीर्थयात्रा योगं निरूपयत ।

४)षड्ग्रहयोगाःशुभः,अशुभः वा मिश्रितफलदाता भवन्ति ?

## ८.१३तन्वादि भावगतग्रहफलम्

सूर्यादि ग्रहाः तन्वादि द्वादशभावेषु स्थिताःसन्तःयोगकारकाः भवन्ति ।तत्र सर्वादौ प्रथमभावः तनुभावस्य चर्चां कुर्मः । यदि सूर्यः लग्ने स्यात्तदा जातकः अल्पसन्ततियुक्तः,सुखी,निर्दयी,अल्पभोजी,विकलेक्षणः,रणकौशलप्रियः, सुशीलः,नाट्यशास्त्रकुशलः स्यात् । परन्तु तादृशःरविःयदि उच्चराशिगतः स्यात्तदा जातकःज्ञानाचारयुक्तः,सुन्दरनेत्रयुक्तः,यशस्वी तथा स्वतन्त्रशीलः भवति ।

ततःचन्द्रः–

क्षीणचन्द्रमा लग्ने स्यात्तदा जातकः वधिरः तथा अङ्गहीनः भवति । चन्द्रमा पापग्रहैः युक्तः स्यात्तदा जातकः प्रेष्यः तथा अल्पायुषः भवति ।यदि तादृशः चन्द्रमा उच्चराशि(वृष)गतः स्यात्तदा जातकः रूपवान्,यशस्वी तथा धनवान् भवति ।पूर्ण चन्द्रमा यदि लग्ने स्यात्तदा नरः दीर्घायुषः तथा विद्वान् भवति ।

**ततःमङ्गलः**-मङ्गलःलग्ने स्यात्तदा जातकःक्रूरः,साहसी,भ्रमणप्रियः, चपलमतिः तथा रोगी भवति।

**ततः बुधः**–लग्ने बुधस्य स्थितिः स्यात्तदा जातकःविद्या, धन ,तपस्यया युक्तःसन् धर्मात्मा भवति ।

**ततः गुरुः** –*लग्ने बृहस्पतिः स्यात्तदा जातकः दीर्घायुयुक्तः, स्वच्छ, ज्ञानी, धनी तथा रूपवान् भवति ।*

**ततः शुक्रः**- *लग्ने शुक्रस्य स्थितिः जातकं कापुरुषः, कामप्रियः, उत्तमशरीरः, स्त्रीपुत्रादियुक्तः तथा विद्वान् कारयति ।*

**ततः शनिः**- *लग्नभावगतः शनिः स्यात्तदा जातकः दुर्नासिका, वृद्धास्त्रीयुक्ता, रोगी तथा अङ्गहीनः भवति ।*

**ततः राहुः**- *लग्नगतः राहुः जातकं दया–धर्महीनः, शीलवान् तथा रोगी प्रकृतिकं कारयति ।*

**ततः केतुः** –*लग्नगतः केतुः जातकाय बहुप्रकारकं रोगं यच्छति तथा जातकः लोभी भवति ।*

**विशेष वचनम्** – *लग्ने सूर्यस्य राशिः(सिंह)स्यात् , तत्र यदि राहुः स्यात्तदा जातकाय राजभोगप्रदः भवति । तथा च लग्ने शनैश्चरस्य गृहे (मकर, कुम्भ) केतुः स्यात्तदा जातकः स्थिरधनं पुत्रं च प्राप्नोति ।*

## ८.१३.१द्वितीयभावस्थ ग्रहफलम्

*इदानीं छात्राः ! धनादिभावेषु ग्रहस्थितिफलं सविस्तृतरूपेण पंक्ति माध्यमेन भवतां सौकर्यार्थं निरूप्यते । तद्यथा –*

| *भावः* | *ग्रहः* | *फलम्* |
|---|---|---|
| *द्वितीयभावः* | *सूर्यः* | *दानी, धातुद्रव्ययुक्तः, वाचालः ।* |
| | *चन्द्रमा* | *कामी, तेजस्वरुपः, सुन्दरवचनाभाषी, बुद्धिमान्, विद्याशीलः, धनवान्* |
| | *मङ्गलः* | *कृषिकर्मनिरतः, भ्रमणप्रियः, क्रोधी ।* |
| | *बुधः* | *स्वबुद्धया धन–शील–गुणानांवृद्धिः, साधुः ।* |
| | *गुरुः* | *वाचालः, भोजनसौख्यता, दानी, तथा धनी भवति ।* |

| | |
|---|---|
| शुक्रः | विद्या तथा काम कलाज्ञाता, धनवान् |
| शनिः | असत्यवादी, चञ्चलता, भ्रमणप्रियः, दरिद्रः। |
| राहुः | सर्वत्र विरोधी । |
| केतुः | समाजे अपराधी भवति । |

## ८.१३.२ तृतीयभावस्थित ग्रहफलम्

| भावः | ग्रहः | फलम् |
|---|---|---|
| तृतीयभावः | सूर्यः | दानी, धनी, पराक्रमी, दुर्जनसेवितः |
| | चन्द्रमा | अल्पधनी, वन्धुप्रियः, सात्विकः |
| | मङ्गलः | पराक्रमी, शठबुद्धियुक्तः |
| | बुधः | मायावी, भ्रमणप्रियः, चञ्चलमति, दीनः |
| | गुरुः | धनरहितः, पापकर्माश्रयी |
| | शुक्रः | क्रोधयुक्तवचनाभाषी, पापी, स्त्री पराजिता। |
| | शनिः | अल्पभोजी, उत्तम वंशयुक्तः, गुणवान् |
| | राहुः | बलवान् तथा धनवान् |
| | केतुः | बलवान् तथा धनवान् |

**विशेष वचनम्** - *शुक्रःतृतीये षष्ठे च भागवते भय-रोग-शोकप्रदःभवति । परन्तु तादृशः शुक्रः यदि सूर्यात् अग्रे स्यात्तदा शुभफल प्रदाता भवति।*

## ८.१३.३ चतुर्थभावस्थितः ग्रहफलम्

| भावः | ग्रहः | फलम् |
|---|---|---|
| चतुर्थभावः | सूर्यः | हृद्रोगी, धन-धान्य बुद्धिरहितः क्रूरः |
| | चन्द्रमा | विद्या-शील-सुखयुक्तः परस्त्रीगामी |
| | मङ्गलः | परिवारहीनः, स्त्री निर्जितः, पराक्रमी |
| | बुधः | श्रेष्ठज्ञानी, धनी, पण्डितः, परिवाररहितः |

| | | |
|---|---|---|
| | गुरुः | वाचालः, सुखी , रुपवान्, बलयुक्त, शठः |
| | शुक्रः | स्त्री निर्जितः, धनविद्यायुक्तः, वाचालः |
| | शनिः | आचारहीनः, कपटी, मातृक्लशयुक्तः |
| | राहुः | स्त्रीजन विरोधी। |
| | केतु | परदोष अन्वेषणकारी |

## ८.१३.४ पञ्चमभावस्थ ग्रहफलम्

| **भावः** | **ग्रहः** | **फलम्** |
|---|---|---|
| पञ्चमभावः | सूर्यः | राजप्रियःचञ्चल वुद्धियुक्तः, परदेशनिवासी |
| | चन्द्रमा | मन्त्रासक्त, दयावान्, धनी, मनस्वी |
| | मङ्गलः | क्रूर, भ्रमणप्रिय, साहसी, विधर्मी, भोगी, धनी |
| | बुधः | मन्त्र तथा भिचारकुशलःपुत्र, स्त्री, यश, विद्या बलयुक्तः |
| | गुरुः | मन्त्री, गुणी, वैभवयुक्तः, अल्पसन्तानयुक्तः |
| | शुक्रः | सुपुत्रवान्, धनी, सुन्दर रूपवान् |
| | शनि | चिरायुः, सुखरहितः, चपलः, धर्मात्मा |
| | राहुः | भयालु, दयालु, दरिद्र |
| | केतु | शठ, रोगी |

## ८.१३.५षष्ठभावस्थ ग्रहफलम्

| **भावः** | **ग्रहः** | **फलम्** |
|---|---|---|
| षष्ठ भावः | सूर्यः | कामी, शुरः, राजपूज्य, अभिमानी, ख्यातः श्रीमान् |

| | | |
|---|---|---|
| | | क्षीण चन्द्रमा अल्पायुः |
| | | पूर्ण चन्द्रमा भोगी, दीर्घायुः |
| | मङ्गलः | नेता, शतृनाशकः, यशवलयुक्तः जठराग्नियुक्तः |
| | बुधः | विद्या विनोदी, कलह प्रियः, शीलरहितः, वन्धुरहितः । |
| | गुरुः | कामी, विजित शत्रुबल, निर्बलः भवति । |
| | शुक्रः | शोकः अपवादयुक्तः |
| | शनिः | भोजन प्रियः, विषमदृष्टिः, भयालु, कामी, धनवान् । |
| | राहुः | शत्रुसंहारकः, दीर्घायुःविशेषसुखी, कुलीनः |
| | केतुः | बन्धुप्रियः, उदारः, गुणप्रसिद्धःविद्वान्, यशस्वी |

## ८.१३.६ सप्तमभावस्थ ग्रहफलम्

| **भावः** | **ग्रहः** | **फलम्** |
|---|---|---|
| शप्तमभावः | सूर्यः | स्त्री द्वेषी, कोपी तथा खलप्रकृतिकः |
| | चन्द्रमा | दयालु, भ्रमणशील, स्त्रीवश्यकः, भोगवान् |
| | मङ्गल | स्त्रीमूलप्रविलापकः, युद्धप्रीतिः |
| | बुधः | शरीरे वक्रता, शिल्पकलाज्ञाता, विनोदी, चतुरः |
| | गुरुः | धीरः, रमणीयः, स्त्रीयुक्तः, पितृ गुरु द्वेषी |
| | शुक्रः | वेश्यापतिः, सुन्दरःतथा व्यङ्ग ः भवति। |

| | | |
|---|---|---|
| | *शनिः* | *मार्गे भारोत्तलनकारी,धीरः,धनिक।* |
| | *राहुः* | *अहंकारी,गवी , रोगवान्* |
| | *केतुः* | *न्निकृष्ट स्त्री युक्तः,स्त्रीभोग रहितः, शीलरहितः,निद्रालु,निकृष्ट वचनाभाषी, अतिभ्रमण प्रियः,मूर्खेषु अग्रगण्यः भवति।* |

## ८.१३.७ अष्टमभावस्थ ग्रहफलम्

| **भावः** | **ग्रहः** | **फलम्** |
|---|---|---|
| *अष्टम भावः* | *सूर्यः* | *सुन्दरः,कलहप्रियः,चतुरः,* |
| | *चन्द्रमा* | *रणोत्सुकः,दानप्रमोदः,दयाशीलःविद्यावान्* |
| | *मङ्गलः* | *विनीत वेशः,धनवान्,गृहमुख्यः* |
| | *बुधः* | *विनीतः,विशेषगुणेषुप्रसिद्धः,धनी* |
| | *गुरुः* | *बुद्धिमान्,नीचकर्मा,दीर्घायुः* |
| | *शुक्रः* | *दीर्घायुःसर्वसौख्य युक्तः,अतुल बलयुक्तः, धनीकः* |
| | *शनिः* | *वीरः,क्रोधी,बलहीनः,धनहीनः, आयुषः–कारकः* |
| | *राहुः* | *क्लेशी,अपवादी,दीर्घसूत्री,रोगी* |
| | *केतुः* | *परद्रव्य,परस्त्री रतः,रोगी,दुराचारी,लोभी* |

**वि.द्र.**–*केतुः यदि शुभयुक्तःवा दृष्टःस्यात्तदा जातकःधनी तथा दीर्घायुःभवति।*

## ८.१३.८ नवमभावस्थ ग्रहफलम्

| **भावः** | **ग्रहः** | **फलम्** |
|---|---|---|
| *नवमभावः* | *सूर्यः* | *(पितृ-गुरु द्वेषी,विधर्माश्रितः* |

| | | |
|---|---|---|
| | चन्द्रमा | पितृ,देव कार्य निरतः,दानी |
| | मङ्गल | पितुः अनिष्ट कारकः,विख्यातः |
| | बुधः | धर्मधनिकः,शास्त्री,आचारवान् |
| | गुरुः | ज्ञानी,धर्म तत्परः,राज्ञःमन्त्री |
| | शुक्रः | विद्या,धन,स्त्री,पुत्रादिभिःयुक्तः |
| | शनिः | युद्धे विख्यातः,धनी,स्त्रीहीनः |
| | राहुः | धर्मिकजनवैरी,यशस्वी |
| | केतुः | क्रोधी,वाचालः,अधर्मी,परनिन्दकः,<br>पितुःवैरी,अभिमानी |

## ८.१३.९ दशमभावस्थ ग्रहफलम्

| भावः | ग्रहः | फलम् |
|---|---|---|
| दशमभावः | सूर्यः | पितुःधनं,शीलं च प्रप्नोति,विद्यायश युक्तः ,<br>राज्ञःसदृशः |
| | चन्द्रमा | धन–धान्य,वस्त्र–भूषण युक्तःविलासी |
| | मङ्गलः | प्रवलप्रतापयुक्तः,धने प्रसिद्धिःकलानिपुणः |
| | बुधः | समस्त विद्यानां ज्ञाता,यशस्वी,धनी,विनोदी |
| | गुरुः | सिद्धः,साधुचरितः,स्वधर्मी,विद्वान् ,धनी |
| | शुक्रः | कृषिकर्मतत्परः,स्त्रीधनप्राप्तः |
| | शनिः | दण्डकर्त्ता,मानी,धनी,स्वकुले वीरः |
| | राहुः | चौरकर्मप्रियः,बुद्धिमान्,उद्धतः |
| | केतुः | विद्वान्,बली,शिल्पवित्,आत्मज्ञानी, |

जनानुरागी, वीरेषुश्रेष्ठः,सततभ्रमणशीलः

## ८.१३.१० एकादश भावफलम् –

| | | |
|---|---|---|
| एकादशभावः | सूर्यः | विपुलधन,स्त्री,पुत्र युक्तः |
| | चन्द्रमा | सन्तुष्टः,विषादी,धनी |
| | मङ्गलः | चतुरवचनाभाषी,कामी,धनी,पराक्रमी |
| | बुधः | निपुणवुद्धिः,विद्या यश युक्तः,धनी |
| | गुरुः | प्रवलबुद्धिः,विख्यातः,धनी |
| | शुक्रः | सुखी,परस्त्रीरतः,भ्रमणप्रियः,धनी |
| | शनिः | भोगी,राज्ञः,धने धनीकः |
| | राहुः | कर्णरहितः,रणोत्सुकःधनी,पण्डितः |
| | केतुः | प्रतापी,परप्रियः,अन्यजनवन्दनीयः,समर्थः अल्पभौगी,समर्थचित्र,आचारवान् |

## ८.१३.११ द्वादशभावफलम् –

| | | |
|---|---|---|
| द्वादशभावः | सूर्यः | पुत्रवान्,सुन्दरः,धीरः,पतितः,भ्रमणशीलः |
| | चन्द्रमा | विदेशवासी |
| | मङ्गलः | विरोधी,धन,स्त्री ,हीनः |
| | बुधः | बन्धुवैरी,धनी ,तथा च बुद्धिरहितः, |
| | गुरुः | चार्वाकी,चञ्चल,भ्रमणप्रियः,खलबुद्धिः |
| | शुक्रः | बन्धुनाशकः,व्यभिचारबुद्धियुक्तः,दरिद्र |
| | शनिः | विकलबुद्धिः,मूर्खः,धनवान्,वञ्चकः |
| | राहुः | शीलरहितः,सम्पत्तिमान्,विकलःधननाशकः |

केतुः चञ्चलः, शीलरहितः

## ८.१४ बोधप्रश्नाः-

१)लग्नगतःसूर्यःजातकाय किं यच्छति ?

२)सप्तमभावे स्थितःचन्द्रःकीदृशं फलं प्रयच्छति ?

३)कस्मिन् भावगते गुरुःउत्तम स्त्री सुखं यच्छति ?

४)भौमःकस्मिन् भावगते अरिष्टप्रदःभवति ?

५)मार्गे भारोत्तलनकारी कः ग्रहः करोति ?

## ८.१५उच्च नीच मूलत्रिकोण तथा स्वक्षेत्रागादिषु, ग्रहस्थिति फलम्

यः कोऽपि ग्रहःउच्चराशौ तिष्ठति चेत् जातकाय प्रभूतं धनं, सम्मानं राजतुल्य प्रतिभा युक्तं भवति । नीचस्थितिःसामान्य तथा जातकाय कष्टप्रदः अशुभप्रदःच भवति । नीचस्थितिःसामान्य तथा जातकाय कष्टप्रदःअशुभप्रदः च भवति। मूलत्रिकोणे अपि ग्रहाःअतिशुभ फलप्रदाः भवन्ति । परन्तु भौमःमूलत्रिकोणे स्थितःसन् जातकाय, क्रोधी तथा निर्दयी कारयति। शत्रुगृहे ग्रहःस्यात् चेत् जातकः नीचकर्मकर्त्ता तथा निन्दनीयःभवति ।

## ८.१६संक्षिप्तउत्तरमूलकप्रश्नाः

१)किं नाम द्विग्रहयोगाः ?

२)संगीतप्रेमी ग्रहयोगःकः ?

३)गुरुशनैश्चरः युतिःकीदृशयोगं उत्पादयति ?

४)कीदृशे त्रिग्रहयोगे जातकःजनप्रियःमन्त्री च भवति ?

५)सूर्य, शुक्र शनयःत्रिग्रहयोगोत्पादके जातकाय कीदृशं फलम् ?

६)गुरु, चन्द्र, बुधः, कीदृशःयोगकारकाः ?

७)गुरु, शुक्र, शनि जातकस्य कृते कीदृशं फलं यच्छति ?

८)चन्द्रमा पापयुक्तः सन् जातकाय किं करोति ?

९)कस्मिन् चतुर्ग्रहयोगे जातकःधनहीनःतथा रोगी भवति ?

१०)व्रती योगस्य किं लक्षणम् ?

११)लग्नगतःशुभःचन्द्रःकिं फलं इच्छति ?

१२)चतुर्थभावगतःकेतुः जातकाय किं फलं यच्छति ?

१३)शुक्रः पञ्चमभावगतःकीदृशं फलं यच्छति ?

१४)द्वादशभावस्थ केतुः जातकाय किं फलं इच्छति ?

१५)नवमभावगतःगुरुःकीदृशं फलं यच्छति जातकाय ?

## ८.१७ नातिदीर्घत्तरमूलकः प्रश्नाः

१)द्विग्रहयोगस्य अर्थं विलिख्य चन्द्रेणसाकं द्विग्रहयोगाःव्याख्या कार्याः ?

२)केवल सूर्येण कृत त्रिग्रहयोगःनिरूप्यताम् ?

३)द्वितीय भावफलं निरूपयत ?

४)उच्चनीचमूलत्रिकोणे कीदृशं फलं जातकाय भवतिदशवाक्यैःस्पष्टं कुरु?

## ८.१८ दीर्घोतोरमूलकप्रश्नाः

१)लग्न,पञ्चम,नवमभावेषु ग्रहस्थितिफलं व्याख्या कार्याः।

२)पञ्चग्रहयोगाः सोदाहरणं निरूप्यताम्।

## ८.१९ संक्षिप्तउत्तरमूलकप्रश्नानां उत्तराणि

१) द्वयोःग्रहयोः कुण्डल्यां स्थितिः २) बुध,शुक्र युतिः ३)शिल्पकार योगः

४)सूर्य,मङ्गल,गुरोः एकत्रास्थितिः ५) दुष्ट चरित्र युक्तः६)धनी तथा राजप्रियः ७)स्वच्छ वुद्धियुक्तः, विख्यातः८)अल्पसुखी ९)मङ्गल,बुध,गुरु, शनैश्चराणां योगे १०)चन्द्र,मङ्गल,बुध,गुरु,शुक्र,शनयः यदि योगकारकाः स्युः ११)दीर्घायुःतथा विद्वान् योगः१२)परदोषःअन्वेषणकारी १३) रुपवान्, पुत्रवान् ,धनी १४)चञ्चलः,शीलरहितः१५)अतिशुभ फलम्

❖❖❖

# नवमपाठसूची

---

**क्रं.सं.** **पृ.सं**

---


| | |
|---|---|
| ९.१ | प्रस्तावना |
| ९.२ | उद्येश्यानि |
| ९.३ | गुलिक साधन प्रकारः |
| ९.३.१ | गुलिक भावफलम् |
| ९.४ | बोधप्रश्नाः |
| ९.५ | विभिन्न सम्वत्सरेषुउत्पति फलम् |
| ९.५.१ | अयनफलम् |
| ९.५.२ | ऋतुफलम् |
| ९.५.३ | मासफलम् |
| ९.५.४ | पक्षफलं तथा कालफलं |
| ९.६ | बोधप्रश्नाः |
| ९.७ | अभुक्त फलं तथा गण्डान्त विचारः |
| ९.७.१ | ज्येष्ठा नक्षत्रे जन्मः तत्फलं च |
| ९.७.२ | मूलनक्षत्रे जातस्य फलानि |
| ९.७.३ | श्लेषानक्षत्रे जातस्य फलानि तथा गण्डान्त विचारः। |
| ९.७.३.१ | गण्डभोगकालः |
| ९.७.३.२ | तिथिदोषाः |
| ९.७.३.३ | योगदोषाः |
| ९.८ | बोधप्रश्नाः |
| ९.९ | नक्षत्रफलम् |

९.९.१ राशि फलम्

९.९.२ योग फलम्

९.९.३ करण फलम्

९.१० बोधप्रश्नाः

९.११ षडवर्गफलम्

९.११.१ होरा फलम्

९.११.२ द्रेष्काण फलम्

९.११.३ नवांश फलम्

९.११.४ द्वादशांश फलम्

९.११.०५ त्रिशांश फलम्

९.१२ बोधप्रश्नाः

९.१३ संक्षिप्त उत्तर मूलक प्रश्नाः

९.१४ नाति दीर्घोत्तर मूलक प्रश्नाः

९.१५ दीर्घोत्तर मूलक प्रश्नाः

९.१६ संक्षिप्त प्रश्नानां उत्तराणि ~~~

❖❖❖

# नवम् पाठः

## ९.१ प्रस्तावना

अये च्छात्राः! ज्योतिषशात्रं आध्यात्मशास्त्रमिति शास्त्रान्तरेषु वर्णितः अस्ति। भारतीय ज्योतिष वाङ्मये कतिपय अशुभ तत्वानि सन्ति यानि मानवकल्याण प्रतिबन्धकानि सन्ति । तेषु बहुविधःअशुभतत्व विचारक्रमेषु मान्दि विचारः अन्यतमः। मान्दि शद्वस्य अभिप्रायः यत् तस्य नाभसीय तत्वस्य मन्दः चलन त्वात् । मान्दि शद्वस्य नामान्तरं गुलिकशद्वेन व्यवहरन्ति जनाः। गुलिकः न कोऽपि ग्रहः। एतस्य परिकल्पना छायाग्रहत्वेन आचार्यैः कृताःसन्ति। गुलिकस्य गणितागत साधन प्रकारःअस्ति। तदधुना अस्य पाठस्य चर्चावसरे एव आलोचयामः।

## ९.२ उद्येश्यानि–

१) भावःएवं ग्रहःस्थित मान्दि फलं ज्ञास्यन्ति ।

२) गुलिक साधन प्रकारज्ञानं भविष्यति ।

३) सम्वत्सर अयन ,मास,पक्षादि विविध अंशेषु मान्दि स्थिति फलं ज्ञास्यान्ति

४) गण्डान्त तारा तथा गण्डान्त कालः अववोधःभवष्यति

५) यस्मिन् चान्द्रनक्षत्रे जन्मःतस्य फलं च ज्ञास्याति

६)षड्वर्गानुसारं फलज्ञानं भविष्यति ।

## ९.३ गुलिक साधन प्रकार

इदानीं गुलिक साधनप्रकारः बृ.पा. होराशास्त्रानुशारेण आलोचयामः।
रविवारादिशन्यन्तं गुलिकादि निरुप्यते ।
दिवसान् अष्टधा कृत्वा वारेशाद् गणयेत् क्रमात्।।
अष्टमांशो निरीशःस्याच्छन्यंशो गुलिकःस्मृतः।
रात्रिमप्यष्टधा भक्त्वाा वारेशात् पञ्चमादितः।।
शन्यंशो गुलिकः प्रोक्तो गुर्वंशो यमधण्टकः।
भौमांशो मृत्युरादिष्टो रव्यंशःकालसंज्ञकः।।
सौम्यांशोऽर्धप्रहरकःस्पष्टःस्यात् स्व स्व देशतः।।(बृ.पा.हो.रा.४/१०–१३)

गुलिकः साधनविधिः सूत्रानुशारेण लिख्यते। तत्र पञ्चाङ्गे प्रतिदिनं दिनमानं

लिखितं भवति। दिनमानं अष्टभिःविभज्य प्रत्येकभागे एकैकः अधिपतिःकल्पितं भवति । यस्मिन् स्थाने शन्यंशं आगच्छति तत्स्थानं गुलिकमिति संज्ञा। यथा रवि वासरे गुलिक साधनं कर्त्तुं इच्छामःचेत् प्रथम खण्डश्याधिपतिःसूर्यः,द्वितीय खण्डस्याधिपतिःचन्द्रः। एवमेव सप्तमखण्डस्याधिपतिःशनिः । इत्यत्र इदं ध्येयं यत् अष्टमखण्डस्याधिपतेःअभावः । एवमेव बुधवासरे दिवसे शन्यंशं चतुर्थखण्डे आगच्छति। स एव शनिःचतुर्थखण्डास्याधिपतिःत्वात् तस्य खण्डस्य स्वामी गुलिकः। अनेन प्रकारेण रात्रिकाले जन्मे गुलिकज्ञानप्रकारः यथा – रात्रकाले जन्मे रात्रिमानं अष्टभिर्भाज्यते। तस्य विचार क्रमः भवति – वाराधिपतितःपञ्चमःग्रहः एव प्रथमखण्डस्याधिपतिः। एवमेव द्वितीय ,तृतीयादि खण्डस्य ज्ञानं कर्त्तव्यम्। रात्रकाले अपि अष्टमखण्डः निरीशः । पाठकाः ! भवतां अववोधनार्थं सारणीं प्रस्तूयते ।

| | दिवस खण्डस्याधिपतिः | | | | | | | रात्रिखण्डस्याधिपतिः | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| वाराः | १ | २ | ३ | ४ | ५ | ६ | ७ | १ | २ | ३ | ४ | ५ | ६ | ७ |
| सू. | सू. | चं. | मं. | बु. | बृ. | शु. | श.() | बृ. | शु. | श.() | सू. | चं. | मं. | बु. |
| चं. | चं. | मं. | बु. | बृ. | शु. | श.() | सू. | शु. | श.() | सू. | चं. | मं. | बु. | बृ. |
| मं. | मं. | बु. | बृ. | शु. | श.() | सू. | चं. | श.() | सू. | चं. | मं. | बु. | बृ. | शु. |
| बु. | बु. | बृ. | शु. | श.() | सू. | चं. | मं. | सू. | चं. | मं. | बु. | बृ. | शु. | श.() |
| बृ. | बृ. | शु. | श.() | सू. | चं. | मं. | बु. | चं. | मं. | बु. | बृ. | शु. | श.() | सू. |
| शु. | शु. | श.() | सू. | चं. | मं. | बु. | बृ. | मं. | बु. | बृ. | शु. | श.() | सू. | चं. |
| श. | श.() | सू. | चं. | मं. | बु. | बृ. | शु. | बु. | बृ. | शु. | श.() | सू. | चं. | मं. |

रात्रे गुलिकविचारे अष्टमांशस्य निरंशत्वमिति। यस्य खण्डस्याधिपतिः शनिः तदंशमेव गुलिकखण्डमिति । छात्राः ! भवतां अधिगत तत्वस्य दृढ्यर्थं गुलिक ध्रुवाङ्क चक्रं निरुप्यते । तदग्रीम पृष्ठायां द्रष्टव्यम् –

गुलिकिःधृवाङ्क चक्रं

| ग्रहाः | सू. | चं. | मं. | बु. | बृ. | शु. | श. |
|---|---|---|---|---|---|---|---|
| दिवा | ७ | ६ | ५ | ४ | ३ | २ | १ |
| रात्रि | ३ | २ | १ | ७ | ६ | ५ | ४ |

तत्र शनैश्चरस्य खण्डं – मान्दि(गुलिकः)

बृहस्पतेः – यमकण्टकः

मङ्गलः – धूमः(मृत्युयोग संज्ञकः)

सूर्यः – कालयोगः

बुधः – अर्घप्रहरः

शुक्र – कोदण्डः,इन्द्रचापः,वा कार्मुकः

शन्यंशं मान्दिः इति स्पष्ट निरूपणाय दिवारात्रि खण्डकोष्ठके शनैश्चरस्य पार्श्वे ( ) चिह्न प्रदत्तमस्ति।

## ९.३.१गुलिक भावफलम्

प्रिय अध्येतारः ! यथा ग्रहाणां स्थितिः भावानुसारं फलं जातकाय यच्छति तथैव गुलिकोऽपि तन्वादि द्वादश स्थानस्थितित्वात् फलानि यच्छति । गुलिकः लग्नेस्थितः चेत् जातकः मन्दबुद्धियुक्तःभवति । तस्मिन् स्थाने यदि पापयुक्त : गुलिकः स्यात्तदा जातकः वञ्चनपरः,कामी,दुराचारीभवति ।

द्वितीय भावगतः गुलिकःजातकं विषयातुरः, भ्रमणप्रियः,क्रोधी, दुरालापवान्। पापयुक्ते दरिद्रः, मूर्खः,च भवति।

मान्दि तृतीयभावस्थिते विरहः,अहंकारादि दुर्गुणयुक्तः,क्रोधी,धनसंग्रहे व्यग्रचित्तः,शोकः,भयरहितः,तथा भ्रातृरहितः भवति ।

चतुर्थभावगतःमान्दि जातकं विद्यारहितः धन,गृह,परिवार सुखरहितः,परदेशे निवासं कारयति ।

पञ्चमभावे गुलिकस्य स्थितिःस्यात्तदा जातकःशीलरहितःचञ्चल–

*मतिः,पापबुद्धिः,अल्पपुत्रः तथा अल्पायुषः भवति ।*

*गुलिकः शत्रुस्थानगतः स्यात्तदा शत्रुहन्ता,तन्त्र विद्याविनोदी तथा पराक्रमी भवति।*

*सप्तमस्थानगतः गुलिकःजातकं कलहप्रेमी,दुष्टास्त्री युक्ता, सर्वजनविरोधि मन्दबुद्धियुक्तः तथा कृतघ्नं कारयति । अष्टमस्थाने यदि मान्दिः स्यात्तदा जातकः विकलनेत्रं तथा मुख युक्तःच भवति ।*

*नवमभावस्थितमान्दिःस्यात्तदा जातकःनीचकर्मकर्त्ता,गुरुजनं तथा पितृहन्ता च भवति ।*

*दशमभावे मान्दि स्थिते असंख्यअशुभकर्म युक्तः,स्व कुलस्य अहिताकांक्षी तथा निर्लजः भवति।*

*यदि गुलिकः एकादशभावगतः स्यात्तदा जातकःसुखी, धनी,तेजस्वी, सुन्दरः तथा , स्व जेष्ठभ्रात्रोः हन्ता भवति ।*

*यदि द्वादशस्थानगतः गुलिकःस्यात्तदा जातकः बिषयरहितवेशः,दीन–वाक्यप्रवीणः,निखिल धनहर्त्ता भवति ।*

## ९.३.२ग्रह युक्त मान्दि फलं–

*प्रिय अध्येतारः! यथा मान्दिः विभिन्नः भावगतःसन् विविध फलानां प्रदाता भवति ,तथैव सूर्यादि ग्रहाणां साकं मान्दि युक्ते किं किं फलं प्रयच्छति अधुना आलोचयामः।*

*सूर्येण युक्तः मान्दि : पितृद्वेषकः ।*
*चन्द्रेण युक्तः मान्दिः मातृ क्लेशकरः।*
*भौमेन युक्तः मान्दिः अनुजरहितः ।*
*बुधेन युक्तः मान्दिः उन्मादि ।*
*गुरुणा युक्तः मान्दिः पाखण्डी,दूषकः*
*मन्देन युक्तः मान्दिः सौख्ययुक्तः*

*राहुणा युक्तः मान्दिः विषप्रदः*

*केतुना युक्तः मान्दिः बह्निप्रदः, गृहदाहकोभवति ।*

*वि.द्र– विशेष रुपेण शनैश्चरं त्यक्त्वा अन्येषां ग्रहाणां साकं गुलिकस्य स्थितिः अशुभप्रदः भवति ।*

## ९.४ बोधप्रश्नाः

*१)गुलिकः शद्बस्य कोऽर्थ ?*

*२)वारविचारे गुलिकस्य का स्थिति ?*

*३)रात्रकाले गुलिक विचारस्य कः नियमः ?*

*४)कस्यग्रहस्य अंशं गुलिकं इति ?*

*५)द्वितीयभावगतः गुलिकः जातकाय किं यच्छति ?*

## ९.५ विभिन्न सम्वत्सरेषुउत्पति फलम्

*छात्रा ! अस्माकं विचारणीयं विषयं अस्ति यत् प्रभवादि सम्बत्सरेषु जायमानानां फलानि । तत्र सम्बत्सरानयनविधिः निरूपयामः ।*

**"बृहस्पतेर्मध्यम राशिभोगात्संबत्सरं सांहितिकाः वदन्ति ।**

*इति भास्कराचार्य वचनम् ।* "

*परन्तु सूर्यसिद्धान्तस्य विचारः यथा –*

**द्वादशघ्नाः गुरोर्याता भगणाः वर्तमानकैः ।**
**राशिभिः सहिताःशुद्धाः षष्ठ्यास्युःविजयादयः ।।***(सूर्य सिद्धान्तः)*

*अर्थात् गुरोर्यात भगणसंख्यां द्वादशसंख्याभिःसंगुण्य , वर्त्तमानराशि संख्यया संयोज्य षष्ठि संख्याभिः भाज्यते तदा शेषाङ्कतुल्या विजयादि सम्बत्सरसंख्या आगच्छति। परन्तु संहिताशास्त्रेषु प्रभवादि सम्बत्सर क्रमःवर्णितोऽस्ति। तत्साधन नियम :–*

*साम्प्रतं शकाद्बमानं षष्ठि भक्तं शेषमिता प्रभवादि गणनया सम्बत्सराः उच्यन्ते।तर्हि क्रमेण षष्ठिसम्बत्सराणां नामानि एवं तस्मिन् जायमानस्य जातकस्य*

फलानि आलोचयामः ।

| क्रम | संबत्सरस्यनाम | जायमानस्य जातकस्य फलानि । |
| --- | --- | --- |
| १. | प्रभवः | साहसी, सत्यभाषी, सर्वगुणयुक्त, कालज्ञः, धर्मशाली |
| २. | विभवः | कामी, निर्भयः, नित्यसन्तुष्टः, प्रबलधनयुक्तः बन्धुविद्या यशस्वी |
| ३. | शुक्लः | परस्त्रीगामी, बलरहितः, त्यागी, मनस्वी |
| ४. | प्रमोदः | मन्त्री, कार्यपरः, भाषणपटुः। |
| ५. | प्रजापतिः | दानी, पुत्रवान्, धनवान्, शान्तः |
| ६. | अंगिराः | नीतिज्ञः, निपुणः, कृपालु, तथा धनी |
| ७. | श्रीमुखः | परबधुलोलः, पवित्रः, धनवान् |
| ८. | भावः | योगी, महाधनी, महाबली, विख्यातःराजकरः |
| ९. | युवा | लोभी, चञ्चलबुद्धियुक्तः, कृशः, रोगयुक्तशरीर, क्रोधी |
| १०. | धाता | परस्त्रीरतः, कार्यार्थिवादी, शठः |
| ११. | ईश्वरः | श्रीमान्, बलवान्, बुद्धिमान्, गुणग्राही |
| १२. | बहुधान्यः | सत्कर्मी, भोगी, वाणिज्यकर्त्ता |
| १३. | प्रभावी | क्रूरः, पापी, क्रोधी, बन्धुहीनः, सुखी |
| १४. | विक्रमः | धनी, सेनापतिः, पराक्रमी |
| १५. | वृषः | दरिद्रः, निर्लजः, कर्महीनः |
| १६. | चत्रभानुः | सूर्यः, तुल्यः, तेजवान्, तथा रूपवान् । |
| १७. | सुभानुः | स्वकुलविद्या तथा आचारयुक्तः भवति । |
| १८. | तारणः | अत्यन्तधनीः, बली तथा विवेकी । |
| १९. | पार्थिवः | राजा, श्रीमान् , अतुल्यसुखी |
| २०. | व्ययः | कामी, भयालु, शील –गुण–रहितः, पापी । |
| २१. | सर्वजित् | वाचालः, अतिबलशाली, शास्त्रज्ञः, गुणी, तत्ववेत्ता |

| | | |
|---|---|---|
| २२. | सर्वधारी | सम्पन्नः,शिल्पी,राजप्रियः |
| २३. | विरोधी | शोकी ,दुष्टः,विशेष पापकर्म कर्त्ता,क्रूरः |
| २४. | विकृतिः | मायावी,कामातुरः,मन्त्र-क्रिय-तन्त्र बुद्धियुक्तः |
| २५ | खरः | निर्मोही,निर्गुणः,दीनवचनाभाषी,पापी, खलप्रकृतिकः। |
| २६. | नन्दनः | सर्वानन्दयुक्तः,राजप्रियः,मन्त्रार्थज्ञाता |
| २७. | विजयः | धार्मिकः,सत्यवक्ता,सम्पत्तियुक्तः |
| २८. | जयः | राज्ञःसदृशःअथवा राजा |
| २९. | मन्मथः | कामक्रियार्थ चञ्चलः एवं शत्रुजित् |
| ३०. | दुर्मुखः | गुण,तथा शील रहितः |
| ३१. | हेमलम्बी | दुष्टात्मा,कृषि कर्मोत्सुकः |
| ३२. | विलम्बी | श्रीमान्,विप्रजनाश्रितः,फलस्य त्यागी। |
| ३३. | विकारी | रोगी,भयालु,गरीवः,चलबुद्धियुक्तः । |
| ३४. | शर्वरी | भोगी, धनशाली,सुन्दरचित्तं,सत्यव्रतः,आचारवान्। |
| ३५. | प्लवः | उदारः,कृपालु,पराक्रमी,धर्मात्मा । |
| ३६. | शुभकृत् | स्त्रीजनवञ्चितः,प्राज्ञः,शुभाङ्गः, |
| ३७. | शोभकृत | ज्ञानी,राजा,गुणवान्,विद्याविनोदी |
| ३८. | क्रोधी | दुर्भागी,परस्त्रीगामी,शठबुद्धिः,क्रोधी |
| ३९. | विश्वावसुः | मानी,हास्यरसप्रियः,गुण -धन-श्लाधी। |
| ४०. | पराभवः | दृष्टाचरणयुक्तः,कुलनाशकः। |
| ४१. | प्लवङ्गः | कामी,बन्धुरतः,बालकप्रियः,मन्दबुद्धियुक्तः |
| ४२. | कीलकः | देवपूजातत्परः,अतिसुन्दरः,पराक्रमी । |
| ४३. | सौम्यः | शान्तः,सर्वजनप्रियः,धनवान्,धैर्यशाली । |
| ४४. | साधारणः | नानाशास्त्रज्ञाता,विकलबुद्धिः । |

| | | |
|---|---|---|
| ४५. | विरोधकृत् | आशायी,क्रोधी,दरिद्रः,भ्रमणशीलः |
| ४६. | परिधावी | दुःशीलः,कटुवचनाभाषी,धनवान् |
| ४७. | प्रमादी | बन्धुविरागकृत्,परस्त्रीगामी, |
| ४८. | आनन्दः | प्रसन्नचित्तः,शास्त्रज्ञाता,तत्वान्वेषी |
| ४९. | राक्षसः | पापी,वृथावचनाभाषी,अपकारचिन्तकः |
| ५०. | अनलः | दानी,गुणी,शान्तः,तथा सदाचारी । |
| ५१. | पिङ्गलः | योगी,जितमनाः,तपस्वी |
| ५२. | कालयुक्तः | कालज्ञः,श्रीभोगः,सत्कर्मवान् |
| ५३. | सिद्धार्थः | सिद्धार्थी,गुरु –देव भक्तिः,विद्वान् । |
| ५४. | रौद्रः | परस्त्रीगामी,कुटिलः,मानी,दुराचारी |
| ५५. | दुर्मतिः | कामी,जडबुद्धिः,शोकसन्तकः,खलः |
| ५६. | दुन्दुभीः | स्थूलः जंघ –उदर– बाहु–शरीर युक्तः ,भोगवान् |
| ५७. | रूधिरोद्गारी | बुद्धिमान् ,सत्यवक्ता,सुखी,धनवान् |
| ५८. | रक्ताक्षी | शान्तः,बन्धुजनप्रियः,अतिसुन्दर,शीलवान् |
| ५९. | क्रोधनः | परस्त्रीगामी,कुमार्गी,बन्धुवैरी,चौरनिरतः |
| ६०. | क्षयः | शिष्टाचारयुक्तः,सुन्दरः,प्रसन्नः,रूपवान्,मानी, शत्रु तथा रोग रहितः भवति । |

## ९.५.१अयन फलम्

अस्माकम् एकं वर्षं षष्ट्युत्तरत्रिंशत् (३६०)सौर दिनानि । वर्षस्य दिनसंख्याधिका त्वात् फलस्य सूक्ष्मता निमिन्तं एकं वर्षं भागद्वये वण्टितम् । तद्भागस्य अयन संज्ञा–

वर्षम्

१)उत्तरायणम्   २)दक्षिणायनम्

उत्तरायणस्य अन्यनामः सौम्यायनम्। दक्षिणायनस्य नामान्तरं याम्यायनम् भवति। तर्हि उत्तरायणे येषां जन्मः ते मनुष्याः ज्ञाने,योगे च निरताःनैष्ठिकाः भवन्ति । दक्षिणायने जन्मिताः भाषणे चतुरः,भेद बुद्धि युक्ताः, अभिमानीनःभवन्ति।

उक्तं च

उत्तराणसमुद्भवः,पुमान् ज्ञानयोगनिरतश्च नैष्ठिकः।
दक्षिणायनभवःप्रगल्भवान् भेदबुद्धिरभिमान तत्परः।।


(जा.पा. ९/२६)

## १.५.२ ऋतुफलम्

एकस्मिन् वर्षे द्वेअयने तथा षड् ऋतवः भवन्ति। उक्तं च शास्त्रान्तरे –

**मकरादि राशिःद्वयोभानुभोगात् षडर्त्तवःस्युःशिशिरो वसन्तः।**
**ग्रीष्मश्च वर्षाच्च शरच्च तद्वत् हेमन्तनाम्ना कथितोऽत्र षष्ठः।।**

अर्थत् मासद्वयोयोः एकःऋतु। तेषां ज्ञानं वयं चक्रं दृष्ट्वा ज्ञातुं प्रभवामः।




अधुना विचारयामःकस्मिन् ऋतौ जायमानस्य जनस्य कः तावत् स्वभावः।

| | **ऋतुनामानि** | **फलानि** |
|---|---|---|
| १. | वसन्तः | दीर्घायुः,धनिकः,सुगन्धप्रियः |
| २. | ग्रीष्मः | अधिक जलसेवी,चतुरःभोगी,कृशतनुः,पण्डितः |

| | | |
|---|---|---|
| ३. | बर्षा | क्षार –क्षीर–कटुप्रियः, मधुरभाषी, स्वच्छबुद्धियुक्तः। |
| ४. | शरद् | पुण्यात्मा, सुमुखः, सुखी, कामी |
| ५. | हेमन्तः | योगी, कृशतनुः, कृषकः, भौगी, समर्थः |
| ६. | शिशिरः | स्नान क्रियादानरतः, स्वधर्मी, मानी, यशस्वी |

## ९.५.३ मासफलम्

यथा एकस्मिन् वर्षे द्वे अयने भवतः, षड् ऋतवः भवन्ति, तथैव, द्वादशमासाः अपि भवन्ति। ते मासाः चान्द्रमानानुसारं विचार्यन्ते। विविध मासे जातस्य बालकस्य स्वभावस्य विषये आलोचयामः।

| | मासाः | फलानि |
|---|---|---|
| १. | चैत्रः | कला, आगम तथा वेदस्य ज्ञाता, उत्सवप्रियः, श्रीरतः |
| २. | वैशाखः | सर्व शास्त्र कुशलः, स्वतन्त्र भूपतिः |
| ३. | ज्येष्ठः | उच्चायुयुक्तः, धनवान्, पुत्रवान्, मन्त्रक्रिया ज्ञाता |
| ४. | आषाढः | अतिधनी, कृपालु, अर्हनिशंभोगी, परद्रेशकः |
| ५. | श्रावणः | ब्राह्मणः तथा देवपूजकः |
| ६. | भाद्रवः | नानादेशरतः, तन्त्री, मनोराज्यवान् |
| ७. | आश्विनः | स्वजन वैरी, दरिद्रता, चञ्चलः |
| ८. | कार्त्तिकः | पुष्टाङ्गः, कृषकः, विशालनेत्रयुक्तः, अतिधनी |
| ९. | मार्गशिरः | देवता–गुरु –पितृ भक्ताः, धर्मात्मा |
| १०. | पौषः | धन–गुण–बलेषु प्रवलता, उच्चनाशिकायुक्तः |
| ११. | माघः | खलबुद्धिः, विशेषधर्मकर्त्ता, |
| १२. | फाल्गुनः | प्रत्यहं उपकारकर्त्ता, गानप्रियः |

## ९.५.४ पक्षफलं तथा कालफलं

जिज्ञासवः! सर्वप्रथमं बर्षफलं ततः अयन फलं ततः ऋतुफलं ततः मास फलं विचारात्परं अधुना वयं आलोचयामःपक्षः तथा कालफलस्य विषये। पक्षः द्विविधः।

१.शुक्लपक्षः।

२.कृष्णपक्षः।

शुक्लपक्षे जातकस्य जन्मःस्यात्तदा सःअधिकतया पुत्र–पौत्र–धनेषु युक्तः,धर्मरतः तथा कृपालुः भवति।कृष्णपक्षे जातकस्य जन्मेसति सः कार्यवादी, निजमातृभक्तः,स्वबन्धुवैरी भवति।

ततः काल सम्वन्धि वचिारः– यदि शिशोः जन्मः प्रातः काले भवति सः धर्मयुक्तः,सत्कर्मजीवि भवति।मध्याह्ने काले जन्मे सति राजतुल्यः,गुणवान् भवति। अपराह्ने काले जन्मे सति जातकः धनी भवति।सायं काले उत्पत्ति ःस्यात्तदा सुगन्धः तथा स्त्रीजन प्रीतिः,खल प्रकृत्तियुक्तः,भ्रमणप्रियं च भवति। रात्रिकाले जन्मे सायंकाल सदृशः फलं तथा सूर्यौदयकालिके जन्मे जातकः सौख्य बहुलः भवति।

## ९.६ बोधप्रश्नाः

१)कस्य ग्रहस्य मध्यम राशिभोगात् संवत्सरं भवति ?

२)कति सम्वत्सराः सन्तिः ?

३)अयनः कतिविधः ?

४)कति ऋतवः भवन्तिः ?

५)चैत्रमासोत्पन्नः शिशुः कथं भवति ?

६)पक्षः द्विविधः। के च ते ?

## ९.७ अभुक्त फलं तथा गण्डान्त विचारः

जिज्ञासवः! ज्योतिषशास्त्रे सप्तविंशति नक्षत्राणि,सन्ति।तेषु नक्षत्रेषु कानिचन नक्षत्राणि अशुभफलं प्रदायकानि सन्ति।तत्र केषुचिन्नक्षत्रेषु केचिद्भागाः गण्डान्त शद्बेन उच्यते।गण्डान्ते केषां ताराणां स्थितिः तद्विचारयामः।उक्तं च

मूलावासावयोर्मघाभुजगयोः पौष्णाश्वयोः सन्धिजं ।
गण्डान्तं प्रहर प्रमाण मधिकानिष्टप्रदं प्रणिनाम् ।।
ज्येष्ठादानवतार सन्धिघटिका चाभुक्त संज्ञा भवेत् ।

*तन्नाडी प्रभवाङ्गनासुतपशु प्रेष्याः कुलध्वंसकाः ।।(जा.पा– ९/४५)*

*अर्थात् मूला –ज्येष्ठा, मघा–श्लेषा, रेवती –अश्विनी, नक्षत्राणां प्रहर प्रमाणं सार्धसप्तघटीमितं(७/३०)गण्डान्ताख्यःकालःस्यात् । तद्गण्डान्तःप्राणीनां अधिकं अनिष्टमशुभं च भवति । प्रसङ्गेऽस्मिन् रामाचार्यस्य वचनंम् –*

*ज्येष्ठाःपौष्णभसार्पभान्त्यघटिका युग्मं च मूलाश्विनी पित्र्यादौ*
*घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम् ।*

*इदानीं अभुक्त मूलस्य लक्षणं यथा –*

**"अभुक्तमूलं घटिका चतुष्टयं ज्येष्ठान्त्य मूलादि भवं हि नारदः**

*अर्थात् ज्येष्ठा नक्षत्रस्य तथा मूल नक्षत्रस्य सन्धेः एक घटी परिमितःकालः । अभुक्तः नाड्युत्पन्नः कन्या पुत्रो वा प्रायसः परिवारस्य बहुजनान् नाशयति ।*

## ९.७.१ज्येष्ठा नक्षत्रे जन्मः तत् फलं च ।

*ज्येष्ठानक्षेत्रे चरण वशेन जातस्यफलं भवति। ज्येष्ठा नक्षत्रमानं (भभोगः) चतुर्भिः भक्तं कृते सति तस्य चत्वारः पादाः भवन्ति । तेषु आद्यपादे नाम प्रथम चरणे जातस्य अग्रजं शीघ्रमेव नाशयति । द्वितीयपादे जन्मे सति स्व कनिष्ठं नाशयति । तृतीयपादे जाते स्व पितरं नाशयति। चतुर्थे तु जातः स्वयमेव मृतिं भवति ।*

*तत्र विशेषरूपेण ज्येष्ठानक्षत्रस्याखिलनाडिकाः(भभोगकालमिति) दशभिर्भक्ताः कार्याः। एवं भभोग मानस्य तुल्य दशखण्डानि जायन्ते । तदनुसारं फलानि भवन्ति ।*

*तत्र प्रथमखण्डे जातः शिशुः स्व मातामहीं नाशयति ।*

*द्वितीयखण्डे जातः शिशुः स्व मातामहं नाशयति ।*

*तृतीयखण्डे जातः शिशुः स्व मातुलं नाशयति ।*

*चतुर्थखण्डे जातः शिशुः स्व मातरं नाशयति ।*

*पञ्चमखण्डे जातः शिशुः स्वयमेव म्रियते ।*

षष्ठखण्डे जातः शिशुः स्व कुलं नाशयति ।

सप्तमखण्डे जातः शिशुः स्व मातृ पितृ कुलं च नाशयति ।

अष्टमखण्डे जातः शिशुः स्व वंशं नाशयति ।

नवमखण्डे जातः शिशुः स्व श्वसुरं नाशयति ।

दशमखण्डे जातः शिशुः सर्वान् नाशयति।

## १.७.२मूलनक्षत्रे जातस्य फलानि ।

मूलनक्षत्रे जातस्य चरणानुसारं फलानि अवगन्तव्यानि सन्ति । मूल नक्षत्रमानं नाम तस्य भभोगमानं चतुर्भिः भाज्यम् ।

तत्र प्रथमपादे जातस्य शिशोः पिता मृत्युं प्राप्नोति ।

द्वितीयपादे जातस्य शिशोः मातुः त्वरितं मरणं भवति ।

तृतीयपादे जातस्य शिशोःधनानां विनाशं भवति ।

चतुर्थपादे जातस्य शिशोःसौख्यतां उपैति ।

अर्थात् चतुर्थपादः न दोषावहः। अपिच मूलनक्षत्रमानं (भभोग) पञ्चदशभिः भाज्यम् ।

| | | |
|---|---|---|
| प्रथमखण्डे | जन्मे | पितुः नाशः । |
| द्वितीयखण्डे | जन्मे | पितृव्यःनाशमुपैति । |
| तृतीयखण्डे | जन्मे | स्व भगिनी पतिं नाशयति । |
| चतुर्थखण्डे | जन्मे | मातामहं विनाशयति। |
| पञ्चमखण्डे | जन्मे | मातुःनाशं भवति । |
| षष्ठखण्डे | जन्मे | मातुः भगिन्याः नाशः। |
| सप्तमखण्डे | जन्मे | मातुलस्य हन्ता भवति । |
| अष्टमखण्डे | जन्मे | पितृव्यस्त्रियाः। |
| नवमखण्डे | जन्मे | सर्वं नाशयति । |

| | | |
|---|---|---|
| दशमखण्डे | जन्मे | पशुसंघातः । |
| एकादशखण्डे | जन्मे | भृत्यनाशः । |
| द्वादशखण्डे | जन्मे | स्वयं नाशमुपैति । |
| त्रयोदशखण्डे | जन्मे | ज्येष्ठभ्रातां नाशयति । |
| चतुर्दशखण्डे | जन्मे | भगिन्याः नाशः । |
| पञ्चदशखण्डे | जन्मे | मातामहः नाशं याति । |

## १.७.३श्लेषा नक्षत्रे जातस्य फलानि तथा गण्डान्त विचारः-

श्लेषा नक्षत्रस्य प्रथमं खण्डं शुभफलप्रदःभवति ।

श्लेषा नक्षत्रस्य द्वितीयं खण्डं धनगण्डं इति ।

श्लेषा नक्षत्रस्य तृतीयं खण्डं मातृगण्डं भवति ।

श्लेषा नक्षत्रस्य चतुर्थं खण्डं पितृगण्डं भवति ।

मूला,मघा,अश्विनी,नक्षत्रेषु प्रथम चरणे जन्मे पितुः कष्टं भवति । जेष्ठा,श्लेषा, रेवती,नक्षत्रेषु चतुर्थ चरणे जन्मे सति पितुः कृते अरिष्टप्रदः। रात्रौ रेवती चतुर्थ चरणे , दिवसे ज्येष्ठा चतुर्थ चरणे , संध्या काले श्लेषा चतुर्थ चरणे जन्मे सति क्रमशःमातरं,पितरं, तथा स्वीयं विनाशयति । गण्डदोषे दिवा जन्मः बालकः पितरं , रात्रौ जातःबालकः मातरं तथा सन्ध्या जन्मः बालःस्वीयं नाशयति। इत्यत्र नास्ति वैमत्यम् । पूर्वाषाढा नक्षत्रे धनुलग्नजाते उत्पन्नः शिशुः पितरं विनाशयति । पुष्या नक्षत्रे कर्कट लग्नजाते उत्पन्नःशिशुः पितरं विनाशयति । पूर्वाषाढा तथा पुष्य नक्षत्रे उत्पन्नः शिशुः प्रथमांशादि क्रमेण पितरं,मातरं स्वीयं,मातुलं,च विनाशयति । तत्र उत्तराफाल्गुनी नक्षत्रस्य प्रथमचरणे,पुष्या नक्षत्रस्य द्वितीय , तृतीय चरणयोर्मध्ये , चित्रा नक्षत्रस्य तृतीय चरणे ,भरणी पूर्वार्द्धे,हस्तस्य तृतीयपादे तथा रेवती अन्तिमचरणे पुत्रजन्मे पितुः कृते अरिष्टप्रदः।

कन्याजन्मे मातुः कृते अरिष्टप्रदः च भवति ।

### १.७.३.१ गण्ड भोगकाल:

गण्डसमये जन्मितःशिशुःअशुभ समयस्य निर्दिष्टः शास्त्रकारैः कृताः सन्ति। गण्डसमयः नाम सर्वदा अशुभं इति न । तत्र निर्दिष्टः कालः विद्यते। तदेव क्रमशः विचारयामः। भवन्तः ध्यानेन अनुशीलनं कुर्वन्तु। तद्यथा –

१)अश्विन्याःआदि चरणे जायमानः शिशोः गण्ड दोषः १६ वर्षे भवति ।

२) मघा आदि चरणे जायमानः शिशोः गण्ड दोषः ८ वर्षे भवति ।

३) जेष्ठा आदि चरणे जायमानः शिशोः गण्ड दोषः १ वर्षे भवति ।

४) चित्रा तथा मूला आदि चरणे जायमानः शिशोः गण्डदोषः ४ वर्षे भवति।

५) श्लेषा आदि चरणे जायमानः शिशोः गण्डदोषः २ वर्षे भवति।

६) रेवती आदि चरणे जायमानः शिशोः गण्डदोषः १ वर्षे भवति।

७) उतराफाल्गुनी प्रथमचरणे जायमानः शिशोः गण्ड दोषः २मासे भवति।

८) पुष्या द्वितीयचरणे जायमानः शिशोः गण्ड दोषः३ मासे भवति।

९) पूर्वाषाढा प्रथमांशे जायमानःशिशोःगण्डदोषः९मासे पितुःकष्टप्रदः भवति।

१०) हस्ता नक्षत्रगण्डे जायमानः बालकः द्वादश वर्षे स्व पितरं संहरति ।

११)अभुक्त मूलोत्पन्नः बालकः तक्षणं स्व पितुः विनाशं कारयति ।

वि.द्र.– यदि अभुक्तमूलोत्पन्नः जातकःजीवति सः स्व वंशस्य कर्त्ता, श्रीमान्, सेनाधिपः च भवति । गण्डदोषः परिहारार्थं उपयुक्तः शन्तिविधानं शास्त्रोऽक्तरीत्या कर्त्तव्यम् ।

### १.७.३.२ तिथिदोषा:

अये पाठकाः! गण्डकालः अवबोधनात्परं तिथेः अपि अशुभ फलाःनिर्दिष्टाः सन्ति । ते यथा – कृष्णपक्षस्य चतुर्दस्याः प्रथमषडंशः(तथिमानस्य षष्ठतमभागः) शुभः । द्वितीयषडंशभागःगण्डदोषयुक्तः पितुः कृते । तृतीयषडंशः मातुः कृते । चतुर्थ षडंशः मातुलस्य कृते । पञ्चमषडंशःभ्रातृकृते । षष्ठषडंशः बालकस्य नाशः

भवति । अमावाश्यायां जायमानानां गजानां ,हस्तीनां, गवां,महीषादीनां तथा मनुष्याणां निश्चिततत्यागः एव कर्त्तव्यः ।

### १.७.३.३.योगदोषाः

जिज्ञासवः! इदानीं योगदोषान् आलोचयामः । भवन्तः श्रद्धया अवलोकयन्तु। यस्मिन् नक्षत्रे पितुर्जन्मः वरीवर्ति तन्नक्षत्रे तथा कर्मनक्षत्रे (दशमनक्षत्रे )जायमानः बालकः पितृ विनाशकःभवति । तथा पितुःजन्मराशेःनवांशे तल्लग्ने च जातः सद्यः एव मृत्युप्रदःभवति । मुसल तथा मुद्गर योगोत्पन्नः जातकः शुभनाशकः भवति। भद्रायां जन्मितः बालकः दरिद्रः भवति । गुलिकोत्पन्नः अङ्गहीनः। रिक्ता तिथौ उत्पन्नः बालकः नपुंसकःभवति । यमघण्टे उत्पन्नःशिशुः पङ्गु भवति । ग्रहपीडित नक्षत्रे जायमानःबालकः रोगपीडा युक्तः भवति । व्यतीपात योगोत्पन्नः अङ्गहीनः । परिघ योगे मृत्युः। वैधृति योगोत्पन्नः शिशुः पितुर्विनाशकःभवति । विष्कम्भे जायमानःशिशुःधननाशं कारयति । शूलोत्पन्नः शिशुः शूलरोगी भवति। गण्डयोगोत्पन्नः गण्डरोगे पीडितः भवति ।

## १.८ बोध प्रश्नाः

१)अभुक्त मूलस्य कोऽर्थः ?

२)मूल नक्षत्रस्य चतुर्थ चरणं कीदृशम् ?

३)गण्डदोषे दिवाजन्मःजातकः कं विनाशयति ?

४)अश्वनी नक्षत्रस्य गण्डदोषः कस्मिन् वयसि भवति ?

५)रिक्ता तिथौ जन्मः स्यात्तदा कथं भवति मनुष्य ?

## १.९ नक्षत्रफलम्

अये पाठकाः! इतः पूर्वं वयं सम्वत्सरंफलं ,गण्डान्तफलं,इत्यदि विविधानि फलानि आचितानि । इदानीं प्रतिपादितानां नक्षत्राणां नामानुकुलं तथा सप्तविंशति नक्षत्रेषु जायमानानां फलानि आलोचयामः।

| क्रनं | नक्षत्र नामः | फलानि |
|---|---|---|
| १. | अश्विनी | अतिबुद्धि,धन–विनय–ज्ञान –यशयुक्तः ,सुखी |
| २. | भरणी | विकलः,परस्त्रीगामी,क्रूरः, कृतघ्नः,धनी। |
| ३. | कृतिका | तेजबान् ,प्रभुसदृशः ,ज्ञानी,विद्याधनी । |
| ४. | रोहिणी | परच्छिद्रान्वेषी,कृशाङ्गः,ज्ञनी,परस्त्रीगामी। |
| ५. | मृगशिरा | सौम्यमनः,यात्री,कुटिलदृष्टिः,कामातुरः,रोगी। |
| ६. | आर्द्रा | दरिद्रः,भ्रमणकारी,बलवान्, क्षुद्रकर्मी,शीलवान् |
| ७ | पुनर्वसु | मुढः,धन –बल –ख्यातः,कवि,कामी |
| ८ | पुष्या | ब्राह्मण –देवता प्रियः,धन,बुद्धियुक्तःराजप्रियः, बन्धुयुक्तः |
| ९. | श्लेषा | मूढ मतिः,कृतघ्नवचनं,कोपी ,आचारवान् |
| १०. | मघा | अहंकारी,पुण्यव्रती,स्त्रीवशगः,मानी,धनि |
| ११. | पूर्वाफाल्गुनी | चपलः,कुकर्मचरितः,त्यागी,दृढकामी । |
| १२ | उत्तराफाल्गुनी | भोगी,त्यागी, मानी ,कृतज्ञः,पण्डितः |
| १३. | हस्ता | कामधर्मरतः,प्राज्ञः,उपकारी तथा धनी। |
| १४. | चित्रा | गुप्तशील रतः,स्त्रीरतः,मानी |
| १५. | स्वाती | देव–ब्राह्मणप्रियः,भोगी,धनी,मन्दबुद्धियुक्तः। |
| १६. | विशाखा | अहंकारी,स्त्री वशीभूतः,शत्रुजित्,क्रोधी |
| १७. | अनुराधा | सुन्दरः,प्रियवचनाभाषी,धनी ,सुखरतःपूज्यः यशस्वी |
| १८. | ज्येष्ठा | कोपी,परस्त्रीगामी,विभु,धर्मात्मा |
| १९. | मूल | कुशली,धूर्त्तः,चतुरवचनाभाषी,कृतघ्न,धनी । |
| २०. | पू.षा. | बालकविकारी, मानी,सुखा,शान्तबुद्धियुक्तः |
| २१. | उ.षा. | मान्यः,शान्तगुणः,सुखी,धनवान्,पण्डितः |

| | | |
|---|---|---|
| २२. | श्रवणा | द्विज–देव भक्तिनिरतः,राजा,धनी,धर्मवान् |
| २३. | धनिष्ठा | आशावान्,धनवान्,पृथुलःउरु–कण्ठ युक्तः, सुखी। |
| २४. | शतभिषा | कालज्ञः,शान्तः,अल्पभोजी,साहसी |
| २५. | पू.भा. | क्षिप्र वचनाभाषी,धूर्तः,भयार्त्तः,कोमलः |
| २६. | उ.भा. | कोमल गुणी,त्यागी,धनी,पण्डितः |
| २७. | रेवती | उरुलाञ्छनोपगतः,कामी,मन्त्री,पुत्र स्त्री मित्र युक्तः। |

## ९.९.१ राशि फलं

अये पाठकाः ! विभिन्न नक्षत्रे जन्मःतत्फल विषये अस्माकं आलोचना जाता। इदानीं मेषादि द्वादश राशीनां जन्मफलानि,विचारयामः तद्यथा–

| | **राशयः** | **फलानि** |
|---|---|---|
| १. | मेषः | अल्पभोजी,कामी,भ्रातृश्रेष्ठः, |
| २. | बृषः | दाता ,सुन्दरः,यशस्वी,कन्यायुक्तः,दृढ उरु –चरण युक्तः। |
| ३. | मिथुन : | दीर्घायुः,कामी,हास्यप्रियः |
| ४. | कर्कटः | कामाशक्तः,भ्रमणप्रियः,सुन्दरवचनाभाषी। |
| ५. | सिंहः | सुन्दरमुखः,गम्भीरदृष्टिः,सुखी। |
| ६. | कन्या | विषयातुरः,ललितवचनाभाषी ,विद्यावान्। |
| ७. | तुला | देव –ब्राह्मण भक्तः,बन्धुप्रियः,धनवान् । |
| ८. | वृश्चिकः | प्रमत्तहृदयः,रोगी,लाभी,भ्रमणप्रियः |
| ९. | धनुः | शुभाङ्गी,रुचिरदृष्टिः,कुलश्रेष्ठः ,शिल्प ज्ञाता |
| १० | मकरः | गानप्रियः,बृहत् मस्तकयुक्तः,शास्त्रज्ञः, परस्त्रीगामी। |
| ११. | कुम्भः | शीलहीनः,बुधजनद्वेषी,विद्यावान्। |
| १२ . | मीनः | सुन्दरशरीरः,विद्वान्,बहुःस्त्रीपतिः । |

जातकपत्रे चन्द्रमा यस्मिन् राशौ तिष्ठति ,स एव राशिः जातकस्य प्रकृत राशिः भवति। तं राशिं मनसि निधाय जातकः(मनुष्यः)प्रतिदिनं शुभाशुभ फलं ज्ञातुं प्रभवति ।

## ९.९.२योग फलं

जिज्ञासवः! सप्तविंशति नक्षत्राणि इव सप्तविंशति योगाः भवन्ति । तर्हि योग शद्वस्य अयं निर्वचनं भवन्ति यत् सूर्यचन्द्रयोःगतियोगः इति। सूक्ष्मरीत्या विचारयामःयत् सूर्यचन्द्रमसोःयोगकलिकाःअष्टशतभक्ताःलब्धमिताः योगाःभवन्ति। तेषां योगानां नामानि –

विष्कुम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा।
अतिगण्ड सुकर्माच धृतिःशूलस्तथैवच ।।
गण्डोबृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रः सिद्धि र्व्यतीपातो वरीयान् परिघः शिवः।।
सिद्धःसाध्यः शुभःशुक्लःब्रह्म ऐन्द्रश्च वैधृतिः।।

तर्हि विष्कुम्भादि योगे जातस्य फलानि क्रमशः आलोचयामः।

| | योगाः | फलानि |
|---|---|---|
| १. | विष्कुम्भः | शत्रुजित्,धनवान्,पशुमान् |
| २. | प्रीति | स्त्रीवशगः |
| ३. | आयुष्मान् | दीर्घायुः,रोगरहितः |
| ४. | सौभाग्यः | सुखी |
| ५. | शोभनः | भोगी,बधरुचिः |
| ६. | अतिगण्डः | धनी |
| ७. | सुकर्मा | धर्म तथा आचार निरतः । |
| ८. | धृतिः | परस्त्री धने धनीः । |
| ९. | शूलः | कोपावशानुगः ,कलहप्रियः । |
| १०. | गण्डः | दुराचारी । |

| | | |
|---|---|---|
| ११. | वृद्धिः | पण्डित सदृशः वचनाभाषी । |
| १२. | ध्रुवः | धनी |
| १३. | व्याघातः | घातकः। |
| १४. | हर्षणः | ज्ञानी तथा यश सम्पन्नः । |
| १५. | वज्रः | धनी तथा कामी । |
| १६. | सिद्धिः | सर्वजनाश्रयः ,प्रभुसदृशः। |
| १७. | व्यतीपातः | मायावी । |
| १८. | वरीयान् | दुष्कामी । |
| १९. | परिघः | विद्वेषी,धनी । |
| २०. | शिवः | शास्त्रज्ञः,धनी,शान्तः,राजप्रियः। |
| २१. | सिद्धः | गृहे यज्ञं कर्त्तुं तत्परः। |
| २२. | साध्यः | शुभाचरणयुक्तः। |
| २३. | शुभः | चंचलाङ्गयुक्तः,धनवान्,कामातुरः, कफप्रकृतियुक्तः च । |
| २४ | शुक्लः | धर्मतत्परः,चतुर वचनाभाषी,क्रोधी, चञ्चलः,पण्डितः। |
| २५. | ब्रह्मः | माानी,गुप्तधन युक्तः,त्यागी, विवेकवान् । |
| २६. | ऐन्द्रः | सर्वजन उपकारी,बुद्धिमान्,धनी । |
| २७ | वैधृतिः | मायावी,परनिन्दकः,बलवान्,त्यागी – तथा धनी भवति। |

## ९.९.३ करणम्

पाठकाः! करणं भवति तिथ्यर्धम् । अर्थात् एकस्यां तिथौ करण द्वयं भवति। तच्च सूर्यचन्द्रमसो अन्तरांशमानं षड् भक्तं फलं करणानि भवन्ति । करणं

द्विविधम्। चलं स्थिरं च । चलकरणानां नामानि यथा–बव,बालव , कौलव,तैतिल्,गर,वजिज,विष्टि । इति सप्त चलकरणानि । स्थिर करणानां नामानि यथा – शकुनि, चतुष्पद,नाग, किंस्तुघ्न । एतानि स्थिर करणानि । अधुना कारणानां स्थिति विषये आलोचनां कृत्वा तेषां फलानि विचारयामः। तत्र कृष्ण पक्षस्य चतुर्द्दशी तिथेः उत्तरार्घे शकुनि। अमावास्या पूर्वार्द्धे चतुष्पद्,उतरार्द्धे नागः। शुक्लपक्ष प्रतिपद पूर्वार्घे किंस्तुघ्न करणम्। प्रतिपदा उत्तरार्द्धे बबादि करणानि भवन्ति ।

इदानीं विभिन्न करणेषु उत्पन्नः जातक फलानि विचारयामः। सर्वादौ चलकरणानां फलानि –

| **करणानि** | **फलानि** |
|---|---|
| बवः | बालकः इव कार्य कर्त्ता,प्रतापी |
| बालवः | विनय चरित्र युक्तः,राजपूज्यः |
| कौलवः | गजहस्तीयुक्तः,सुन्दर चरित्रः |
| तैतिल् | कोमलः,चतुर वचनाभाषी,पुण्यात्मा |
| गर् | शत्रुरहितः,प्रतापी |
| वणिजः | वक्ता,विनयी,चञ्चलः |
| विष्टि | सर्वजन विरोधी,पापकर्मा,अपवादी,परिजन परिपूज्यः |

**ततः स्थिर करणानां फलानि-**

| | |
|---|---|
| शकुनिः | कालज्ञः,स्थिरसुख दाता,अनिष्टकरः। |
| चतुष्पद् | सर्वज्ञः,सुबुद्धियुक्तः,धन–यशयुक्तः। |
| नागः | तेजवान्,धनवान्, विशेष बलयुक्तः,वचन कुशलः |
| किंस्तुघ्नः | परकार्यकर्मा,चपलबुद्धिः,हास्यप्रियः । |

## ९.१०बोध प्रश्नाः

१)अश्विनी नक्षत्रोत्पन्न : जातकः कीदृशः ?

२)वृश्चिक राश्युत्पन्नः जातकः केन गुणेनयुक्तः ?

३)अयं राशिःजातकस्य इति कथं ज्ञायते ?

४)कस्य योगस्य परे विष्कम्भःआगच्छति ?

५)स्थिर करणानां संख्या कति संख्यकाः ?

## १.११षड्वर्गफलम्

जातकपत्रे फलविचारं कर्तुं विविधाःउपायाःअवलम्बनं कृतवन्तः सन्ति अस्माकं आचार्याः। तेषु फलविचार क्रमेषु षड्वर्गजन्यं फलं अन्यतमम् । तर्हि के तावत् षड्वर्गाः इति प्रथमपाठे आलोचना जाता । तस्य फलानि एकैकं क्रमशः आलोचयामः। सर्वादौ लग्न फलम् –

तर्हि किं नाम लग्नमिति जिज्ञासायां उच्यते। राशीनां उदयो लग्नम् । तेतु मेष –बृषादयः । जन्मकाले यल्लग्नं भवति तदुक्तं फलं तस्य जनिमतःउहनीयमिति।

| **लग्न नामानि** | **फलम्** |
| --- | --- |
| मेषः | बन्धुद्वषी,भ्रमणप्रियः,दुर्बलशरीरः, क्रोधी,अस्थिरः |
| बृषः | विवादप्रियः,मानी,दुर्बलजानुः,धनयुक्तःपराक्रमी, पशुयुक्तः,देव–द्विज –गुरुः पूजनतत्परः,सुन्दरः, कामी , विद्यावादरतः, |
| मिथुनः | भोगी,बन्धुनिरतः,दयावान्,श्रीमान्,गुणी, तत्वज्ञः |
| कर्कटः | मिष्टान्नभोजी,वस्त्रभूषणयुक्तः,सुन्दर वचनाभाषी, कपटबुद्दिः,धर्मवान्,स्थूलशरीरयुक्तः। |
| efmeb: | DeuHelmev I eefe³ eğjeÀ , mev I eğj : , eh bmekeÀ , Jeej : , keÀec eer; j ep eJeMeekeÀj : , Me$egje³ eer; Hej o SMeJeemeer |
| keÀv³ ee | keÀe³ e&b # e: , Þeec eev ed,HeeC[ I e: , yegf× c eev ed,meeebJekeÀ m$eeereUeueeme³ eğjeÀ , yev Oegfòe³ e: |
| I egee | ueeful eJeo v e- ve$e ³ eğjeÀ , j ep eHeb ³ e: , eUeÜ ev ed,c eo vej ef e eUeueeeue: , Meev I eyegf× : , eUe<eeo er; m$eeOev e# e$eMeeueer; |

| | |
|---|---|
| | विरलदशन मुख्यः |
| वृश्चिकः | मूर्खः,क्रूरनेत्रयुक्तः,चञ्चलता,मानी,दीर्घायुः,धनी , सज्जनप्रियः,विवादी |
| धनुः | बुद्धिमान्,यशस्वी,धनवान् |
| मकरः | रमणीलोलः,शठः, दीनवचनभाषी |
| कुम्भः | अन्तः शठः,पर बधुकेलिलोलः,कृपणशीलः,धनी |
| मीनः | अल्परतिप्रियः,इष्टजनः अनुकूलः,विशेषरूपेण धन–धान्य युक्तः,विद्वान् । |

## ९.११.१होरा फलम्

*जिज्ञासवः! होरा शब्दस्यार्थःभवति राश्यर्धमिति। विषयोऽयं पूर्वं आलोचितमस्ति। परन्तु इदानीं आलोचयामः कस्यां होरायाम् जाते कीदृशं फलं इति ।*

*क) तत्र विषमराशौ (१,३,५,७,९ ,११)सूर्यस्य होरायां जन्मे सति जातकःक्रूरः,कामी ,धनवान्,तथा राजपूज्यःभवति । विषमराशौ चन्द्रहोरायां जन्मे सति जातकः वाग्मी,दाता ,चारुशरीरः,दयालुः,लम्पटः,स्त्रीप्रकृति युक्तःच भवति ।*

*ख) सम राशौ सूर्य होरायां जन्मे सति जातकः मन्त्री,कृतज्ञः,चपलः तथा भयालु भवति। समराशौ चन्द्र होरायां जन्मे सति जातकः वचनदक्षः,आलस्य परायणः तथा पुण्यबधूरतः भवति ।*

## ९.११.२ द्रेष्काणफलम्

*पाठकाः पूर्वं आलोचितमस्ति अयमंशः। अत्र केवलं द्रष्काण वशेन फलविचारान् आलोचयामः। तद्यथा –*

*क)सिंह–मेष–कुम्भ–वृश्चिक–मकर राशीनां प्रथमद्रेष्काणःतथा मीन–वृश्चिक–सिंह–तुला राशीनां अन्तिम् दृष्क्राणः,एवं च कर्क–वृश्चिक राशयोः मध्य*

द्रेष्काणः,क्रूरसंज्ञकाः सन्ति ।

ख)कर्क,मीन राशयोः प्रथमद्रेष्काणः, मीन–कन्यकयोः मध्यद्रष्काणः,बृष मिथुनयोः अन्त्यद्रेष्काणः जलचर संज्ञकाः सन्ति ।

ग)मेष–धनु–वृष–कुम्भ–मकर राशीनां द्वितीयः,तुला–कन्या–मिथुन राशीनां प्रथमद्रेष्काणः, धनु–कन्या–कुम्भानां अन्तिमद्रेष्काणःसौम्यसंज्ञकः।

घ) मकर–मेष–कर्क राशीनां अन्तिमद्रेष्काणः,बृष–धनु राशयोःप्रथम द्रेष्कणः,मिथुन –तुला–सिंह राशीनां मध्यद्रेष्काणः मिश्रसंज्ञकः।

तत्र येषां जन्मः क्रूरद्रेष्काणे भवन्ति ते खलबुद्धिसम्पन्नः,भ्रमण–प्रियः,पापकर्मा अपवादी भवति । येषां जन्मः जलचर द्रेष्काणे स्युः ते दाता ,भोगी, दयालुः, कृषि, जलवस्तु सकाशात् वृत्तिं निर्वहति,शीलरहितं च भवति ।

येषां जन्मः सौम्य द्रेष्काणे भवन्ति ते खलु सुख –धन–पुत्र युताः भवन्ति,रमणीय शरीरयुक्तः तथा दयालु भवति ।

येषां जन्मः मिश्रसंज्ञकः द्रेष्काणे भवन्ति ते कुशीलाः,क्रूरदृष्टिः,परस्त्रीलोलः तथा चञ्चलात्मा भवति ।

## ९.११.३नवांशफलम्

पाठकाः! पूर्व नियमं अनुशृत्य नवांश फलविचारान् आलोचयामः। सूर्यादयः ग्रहाःनवांशाधिपतयःभवन्ति। तर्हि क्रमेण सूर्यादि ग्रहाणां नवांश फलानि यथा –

| नवांशेशः | फलानि |
|---|---|
| सूर्यः | दुष्टात्मा, बलवान्,पुत्रवान्,धनवान्,पिङ्गलाक्ष,कामप्रियः । |
| चन्द्रः | भोगी,परस्त्रीलोलः,पण्डितः,गोधनाढ्यः, भवति । |
| मङ्गलः | क्रूरकर्मा,चञ्चलबुद्धिः भ्रमणप्रियः,पित्तरोगी,लोभी भवति। |
| बुधः | त्यागी,रोगी,ललितशरीरः,नामी,विद्वान्,यशस्वी भवति । |
| गुरुः | हेमकेशतनुगः,श्रेष्ठः,सुधीः,रुपवान्,मन्त्री,पण्डितः,इव वचनाभाषी । |

| | |
|---|---|
| शुक्रः | परस्त्रीगामी,त्यागी,सुखी,पण्डितः |
| शनिः | पापबुद्धिः,दरिद्रः,स्थूलदन्तः,रोगवान् |

### ९.११.४ द्वादशफलम्

*अये छात्राः ! पूर्वकर्म अनुश्रुत्य द्वादशांश फलान् विचारयामः । तर्हि द्वादशांशे द्वादशभागाः भवन्ति । तत्तु मेषादि राशिः क्रमेण । तस्य फलानि तद्यथा –*

| द्वादशांशाः | फलानि |
|---|---|
| मेषः | खलात्मा,चौरः,पापाचरणयुक्तः |
| बृषः | स्त्रीवित्ताढ्यः ,रोगवान् |
| मिथुनः | द्युतक्रीडाप्रियः |
| कर्कः | दुष्टाचरणयुक्तः,तपस्वी |
| सिंहः | राजकार्यपरायणः,सुशीलः |
| तुला | व्यापारी,धनी |
| वृश्चिकः | हत्याकर्तुं इच्छुकः,धूर्तः तथा चौराणां स्वामी |
| धनुः | पिता, देवता ,ब्राह्मणभक्तः |
| मकरः | सस्यादियुक्तः,दूतः |
| कुम्भः | खलः,दुष्टबुद्धिः |
| मीनः | धनी तथा पण्डितः |

### ९.११.०५ त्रिशांश फलं

*षडवर्गस्य अन्तिमवर्गत्वेन त्रिंशांशस्य विचारःभवति । त्रिंशांशस्य विचार – क्रमःअन्येषां वर्गाणां इव न भवति । इति भवद्भिः ज्ञातपूर्वम् । इदानीं केवलं कस्य ग्रहस्य त्रिशांशे जन्मे किं फलं भवति तद् आलोयामः ।*

| **त्रिंशांशेशः** | **फलानि** |
|---|---|
| मङ्गलः | चपलः,कठिनवचनाभाषी,क्रूरबुद्धिः । |
| शनिः | भ्रमणप्रियः,मलिनबुद्धिः |

| | |
|---|---|
| गुरुः | धनी |
| बुधः | गुरु,देव –भक्ति रहितः,साधुप्रियः,बन्धुवान् |
| शुक्रः | कामी,सुन्दरशरीरः,कामी |

विद्र–सूर्यचन्द्रयोःस्थानं त्रिंशांशे नास्ति। एतस्य विचारः प्रथम पाठे जातमिति। अत्र पिष्टपेषणं नैव कुर्मः ।

## १.१२ बोध प्रश्नाः

१)राशीनां उदयो किम् ?

२)कर्क लग्नोत्पत्ते किं फलम् ?

३)समराशौ चन्द्रहोरायां जन्मे किं फलम् ?

४)जलचर संज्ञकाः द्रेष्काणाः के ?

५)भौम त्रिंशांशे जातस्य किं फलम् ?

## १.१३ संक्षिप्त उत्तर मूलक प्रश्नाः

१)गुलिकशद्बेन कस्य बोधः भवति ?

२)कस्य ग्रहस्य अंशमानं कालसंज्ञकः ?

३)गुलिकविचारे अष्टमखण्डः कीदृशः ?

४)गुलिकस्य नामान्तरं किम् ?

५)लग्ने स्थितःगुलिकः जातकाय किं करोति ?

६)मन्देन मान्दि युक्ते किं फलम् ?

७)सम्बत्सर संख्या कति ?

८)प्रथम संम्बत्सरस्य किं नाम ?

९)उत्तरायणस्य नामान्तरं किम् ?

१०)ऋतुसंख्या कति ? वर्षाऋतुः कस्मिन् मासे आगच्छति ?

११)वसन्तऋतौ जायमानः कीदृशस्वभावयुक्तः भवति ?

१२)एकस्मिन् वर्षे मास संख्या कति ?

१३)भाद्रव मासात्परं कस्य मासस्य स्थानम् ?

१४)प्रातः काले शिशोः जन्मे कीदृशं फलं प्राप्नोति ?

१५)अभुक्त नाड्युत्पन्नःशिशुः परिवारस्य किं करोति ?

१६)अश्विन्याः आदिचरणे जन्मे शिशोःगण्डदोषः कस्मिन् वयसि भवति ?

## ९.१४ नाति दीर्घ उत्तर मूलक प्रश्नाः

१)नक्षत्रयोग फलानि व्याख्या कार्या ?

२)करणानां सविधि व्याख्या क्रियताम् ?

३)द्रेष्काण फलं निरूप्यताम् ?

४)पक्षफलं कालफलं च स्व भाषया लिख्यताम् ।

५)मूलनक्षत्रे जातस्य फलानि लेख्यानि ।

## ९.१५दीर्घोत्तर मूलक प्रश्नाः

१)षड्वर्ग फलानि स्व भाषया निरूपयत ?

२)नवांशविधिः साधनपूर्वकं नवांश वशेन जन्मफलं स्पष्टयत ?

३)गण्डान्तविचारः सोदाहरणं लिख ।

४)मास तथा ऋतु फलं विविच्चताम् ।

## ९.१६ संक्षिप्त प्रश्नानां उत्तराणि।

१)शन्यंशस्य २)सूर्यस्याशं ३)निरीशः ४)मान्दिः ५)मन्द बुद्धि युक्तं कारयति ६)सौख्यम् ७)षष्ठि ८)प्रभवः ९) सौम्यायनम् १०) षट् , कर्क–सिंह ११)दीर्घायुः,सुगन्धप्रियः,धनिकः १२)द्वादशः १३)आश्विनस्य १४)धर्म युक्तः,सत्कर्म जीवि १५)अशुभं कारयति १६)षोडशः

# दशम् पाठ्यसूची

---

| क्रं.सं. | पृ.सं |
|---|---|

---


1 0 .1 Òemleeuev ee

1 0 .2 Heeþ m³ eGÐeeM³ eeefv e

1 0 .3 Deeä keÀJei e&ke³ e v eec ekeÀj. Ce ÒekeÀej :

1 0 .4 yeeæDe ÒeMv ee:

1 0 .5 mef³ eeefo û en eCeeþDeeä keÀJei e&Ue®eej :

1 0 .6 yeeæDeÒeMv ee:

1 0 .7 e$ekeÀe&Ce MeeæDev eeUeeDe:

1 0 .8 yeeæDeÒeMv ee:

1 0 .9 SkeÀeeDeHeel ³ e MeeæDev ec ed

1 0 .1 0 yeeæDeÒeMv ee:

1 0 .1 1 eÝeVeeä keÀJei e& SJebmec eg e³ eeä keÀJei e&Ue®eej :

1 0 .1 1 .1 mec eg e³ eeä keÀJei e&

1 0 .1 2 yeeæDeÒeMv ee:

1 0 .1 3 mebef# eHle GÊej c etu ekeÀÒeMv ee:

1 0 .1 4 v eeef eo et eeÊej c etu ekeÀÒeMv ee:

1 0 .1 5 o et eeÊej c etu ekeÀÒeMv ee:

1 0 .1 6 mebef# eHle GÊej c etu ekeÀÒeMv eev eeþGÊej eeDe

# दशमपाठः

## १०.१ प्रस्तावना

*प्रिय जिज्ञासवः! सर्वप्रथमं विचारणीयमस्ति यत् अष्टकवर्गःइत्यनेन किम्? कथमस्य स्वरूपम् ? केन प्रकारेण एतस्य विचारःक्रियते? अष्टकवर्गविचारे जातकस्य कःलाभःभवति इत्यादि विविध विषयान् आलोचयामः ।*

*भारते तथा भारतात् बहिः विदेशेषु ज्योतिषशास्त्रीय फलविचारे त्रिविधत्वं परिलक्षते। प्रथमःविचारःजन्मलग्नात् ,द्वितीयःविचारः चन्द्रलग्नात् ,तृतीयःविचारः नवांशलग्नात् च । लग्नात् शरीरसम्बन्धि विचारः क्रियते । तथा च चन्द्रात् मनसःविचारःभवति । सर्वाणि कार्याणि मनस्तत्व स्योपरि निर्भरति। मानसिकतानुसारं सुखदुःखस्य अनुभवःजायते। मनस्तत्वस्य सबलत्वे निर्बलत्वे च पारलौकिक तथा सांसारिक यात्रायां सफलता अथवा असफलता प्राप्यते। एतेषां उपरिलिखितानां कारणानां निरूपणादेव अस्माकं प्राक्तन महर्षयः चन्द्र – लग्नात् एव जातकस्य बहुविधःफलविचारविधिःप्रदर्शितः।*

## १०.२ पाठस्य उद्देश्यानि

*क)अष्टकवर्गस्य परिभाषां ज्ञास्यन्ति ।*

*ख)अष्टकवर्ग वशात् फलविचारविधयः ज्ञास्यन्ति ।*

*ग)अष्टकवर्गेण साकं आयुविचारस्य परिचयः भविष्यति ।*

*घ)अष्टकवर्गानुसारं ग्रहणां त्रिकोणाधिपत्यःतथा एकाधिपत्यः शोधन प्रकाराः ज्ञास्यन्ति ।*

*उपरोक्त उद्देश्यान् विहाय अन्येऽपि उद्देश्याः पाठस्यास्य पठनात्परमेव स्वयमेव छात्राःज्ञातुं प्रभवन्ति ।*

## १०.३ अष्टकवर्गस्य नामकरण प्रकारः

*जन्मकाले चन्द्रमा यस्मिन् राशौ तिष्ठति स राशिः मनुष्य जीवनस्य*

शुभाशुभ फलानां मूलाधारः । अतः चन्द्राधिष्ठित राशितःजातकस्य अधिकाधिक फलविचारः कर्तुं शक्यते । अस्मात् कारणात् भारते विद्यमानानां दैवज्ञानां मतानि भवन्ति यत –

" जन्मकाले चन्द्राधिष्ठितराशितः यस्मिन् यस्मिन् राशौ ग्रहाणां भ्रमणं भवति ,तेषा ग्रहाणां भ्रमणानुसारमेव जातकस्य जीवने विविध फलानां सङ्घटनं भवति ।" अयं विधिःगोचरफलविचारविधिःइति कथ्यते । गोचरानुसारं फलविचार–करणं एकः गौणविधिः । गोचरफलं गौणफलमिति कथनस्य कारणमिदं भवति यत् समये संसारे ये खलु संसारीणः सन्ति तेषां जन्म राशिःमेषादितःमीनाभ्यन्तरे एव तिष्ठति। अतएव साधारण गोचर फलानुसारं केवलं द्वादशप्रकारकाणि फलानि अधिकाधिकं भवन्ति ।

परन्तु प्रत्यक्षे तथा न भवति न भविष्यति च । अस्मात् महर्षिणां मतैक्यं भवति यत् जन्मकालीन ग्रहस्थितिवशात् अर्थात् जन्मसमये यस्मिन् यस्मिन् राशौ सप्त– ग्रहाः तिष्ठन्तु नाम ,लग्नं यस्मिन् राशौ स्यात्, अस्मात् अष्टौ स्थानात् (सलग्नं सप्तग्रहाः)गोचरफलस्य विचारःप्रत्येकस्य मनुष्यस्य कृते विचारयामः तदा फलस्य श्रेष्ठता आयाति ,विश्वसनीयं च भवति । अस्या विधेः"अष्टकवर्ग "मिति संज्ञा ।

तत्र अष्टकवर्गेण ये शुद्धाः ते शुद्धाः सर्वकर्मसु । अष्टकवर्ग निरूपणप्रसङ्गे बिन्दोः एवं रेखायाः प्रमुखतां अस्ति । केचन आचार्याः शुभसूचकं संकेतं रेखया, अशुभ संकेतं विन्दुभिःकुर्वन्तःसन्ति । अपरे अशुभ संकेतं रेखया शुभ संकेतं बिन्दुभिःकुर्वन्तः सन्ति । परन्तु जातकपारिजातस्य ग्रन्थकारः अष्टकवर्गेषु सर्वेभ्यो ग्रहेभ्यो एकैकस्य शुभस्थानानि पठितानि । यानि अपठितानि तानि अशुभानि सन्ति । शुभस्थानानि बिन्दुभिः,अशुभस्थानानि रेखाभिःसंसूच्यन्ते।

## १०.४बोध प्रश्नाः

१)अष्टकवर्गस्य कोऽर्थः ?

२)अष्टकवर्गविचारः कुतः भवति ?

३)गोचरानुसारं फलविचारस्य विधेः किं नाम ?

४)अष्टकवर्गे शुभफलनिमित्तं कस्य प्रयोगः भवति ?

## १०.५सूर्यादि ग्रहाणां अष्टकवर्गविचारः

इत्यत्र सूर्याष्टकवर्गे आचार्याःचक्रकुण्डल्यां सूर्यग्रहः स्व स्थानात् १,११,४,८,२,१०,९ तथा ७ स्थानगतः शुभःफलदः ।अर्थत्

सूर्याष्टक वर्गे सूर्य ग्रहात् १,११,४,८,२,१०,९ ,७,स्थानेषु।

सूर्याष्टक वर्गे भौमात् १,११ ,४,८ ,२,१० ,९,७

सूर्याष्टक वर्गे श नेश्चरात् १,११ ,४,८ ,२,१० ,९,७

सूर्याष्टक वर्गे शुक्रात् ७ ,१२ ,०६

सूर्याष्टक वर्गे गुरुतः ९ ,५,११,६

सूर्याष्टक वर्गे चन्द्रात् १०,३,११,६

सूर्याष्टक वर्गे बुधात् १०,३ ,११ ,६ ,१२ ,९ ,५

सूर्याष्टक वर्गे लग्नात् १०,३,११ ,६ ,४ ,१२

स्थानेषु सुभाः सन्ति ।विहय मिदं सर्वेषां सुसम्यक् अववोधनार्थं पंङ्क्त्यां लिख्यते

सुर्याष्टक वर्गः

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| १ | ३ | १ | ३ | ५ | ६ | ३ | १ |
| २ | ६ | २ | ५ | ३ | ७ | २ | ४ |
| ४ | १० | ४ | ६ | ९ | १२ | ४ | ६ |
| ७ | ११ | ७ | ९ | ११ | | ७ | १० |
| ८ | | ८ | १० | | | ८ | ११ |
| ९ | | ९ | ११ | | | ९ | १२ |
| १० | | १० | १२ | | | १० | |
| ११ | | ११ | | | | ११ | |

चन्द्राष्टकवर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| ३ | १ | २ | १ | १ | ३ | ३ | ३ |
| ६ | ३ | ३ | ३ | ४ | ४ | ५ | ६ |
| ७ | ६ | ५ | ४ | ७ | ५ | ६ | १० |
| ८ | ७ | ६ | ५ | ८ | ७ | ११ | ११ |
| १० | १० | ९ | ७ | १० | ९ | | |
| ११ | ११ | १० | ८ | ११ | १० | | |
| | | ११ | १० | १२ | ११ | | |
| | | | ११ | | | | |

### भोमाष्टक वर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| ३ | ३ | १ | ३ | ६ | ६ | १ | १ |
| ५ | ६ | २ | ५ | १० | ८ | ४ | ३ |
| ६ | १ | ४ | ६ | ११ | ११ | ७ | ६ |
| १० | | ७ | ११ | १२ | १२ | ८ | १० |
| ११ | | ८ | | | | ९ | ११ |
| | | १० | | | | १० | |
| | | ११ | | | | ११ | |

### बुधाष्टक वर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| ५ | २ | १ | १ | ६ | १ | १ | १ |
| ६ | ४ | २ | ३ | ८ | २ | २ | २ |
| ९ | ६ | ४ | ५ | ११ | ३ | ४ | ४ |
| ११ | ८ | ७ | ६ | १२ | ४ | ७ | ६ |
| १२ | १० | ८ | ९ | | ५ | ८ | ८ |
| | ११ | ९ | १० | | ८ | ९ | १० |
| | | १० | ११ | | ९ | १० | ११ |
| | | ११ | १२ | | ११ | ११ | |

### गुरोराष्टक वर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| १ | २ | १ | १ | १ | २ | ३ | १ |
| २ | ५ | २ | २ | २ | ५ | ५ | २ |
| ३ | ७ | ४ | ४ | ३ | ६ | ६ | ४ |
| ४ | ९ | ७ | ५ | ४ | ९ | १२ | ५ |
| ७ | ११ | ८ | ६ | ७ | १० | | ६ |
| ८ | | १० | ९ | ८ | ११ | | ७ |
| ९ | | ११ | १० | | | | ९ |
| १० | | | ११ | ११ | | | १० |
| ११ | | | | | | | ११ |

### शुक्रष्टाक बर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| ८ | १ | ३ | ३ | ५ | १ | ३ | १ |
| ११ | २ | ५ | ५ | ८ | २ | ४ | २ |
| १२ | ३ | ६ | ६ | ९ | ३ | ५ | ३ |
| | ४ | ९ | ९ | १० | ४ | ८ | ४ |
| | ५ | ११ | ११ | ११ | ५ | ९ | ५ |
| | ८ | १२ | | | ८ | १० | ८ |
| | ९ | | | | ९ | ११ | ९ |
| | ११ | | | | १० | | ११ |
| | १२ | | | | ११ | | |

### शन्याष्टक वर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| १ | ३ | ३ | ६ | ५ | ६ | ३ | १ |
| २ | ६ | ५ | ८ | ६ | ११ | ५ | ३ |
| ४ | ११ | ६ | ९ | ११ | १२ | ६ | ४ |
| ७ | | १० | १० | १२ | | ११ | ६ |
| ८ | | ११ | ११ | | | | १० |
| १० | | १२ | १२ | | | | ११ |
| ११ | | | | | | | |

### लग्नाष्क वर्ग

| सू | चं | मं | बु | गु | शु | श | ल |
|---|---|---|---|---|---|---|---|
| ३ | ३ | १ | १ | १ | १ | १ | ३ |
| ४ | ६ | ३ | २ | २ | २ | ३ | ६ |
| ६ | १० | ६ | ४ | ४ | ३ | ४ | १० |
| १० | ११ | १० | ६ | ५ | ४ | ६ | ११ |
| ११ | १२ | ११ | ८ | ६ | ५ | १० | |
| १२ | | १० | ७ | ८ | ११ | | |
| | | | ११ | ९ | ९ | | |

Iजिज्ञासवः! अष्टकवर्गस्य विचारक्रमं वयं आलोचयामः। तत्र सलग्नं सूर्यादि अष्टकवर्गाःभवन्ति । प्रत्येकस्य ग्रहस्य विचारावसरे ग्रहाधिष्ठितराशितः पूर्व –निर्धारितस्थानेषु कतिपयस्थाने शुभसूचकाःबिन्दवःभवन्ति। अन्यत्र कुत्रचित् अशुभ सूचकाःबिन्दवःइति मन्यन्ते । अन्यत्र अशुभसूचकाःबिन्दवःभवन्ति । अन्यत्र अशुभसूचकाःरेखाःइति मन्यन्ते

यस्य ग्रहस्य लग्नस्य च विचारं अपेक्षितं ,तस्मात स्थानात् (ग्रहाधिष्ठित – राशितः)सूत्रे निर्णितं स्थानं प्रति बिन्दुं स्थापनीयम् । अपर स्थानं प्रति रेखा।मेषादि राशिषु यस्मिन् गृहे अष्टौ(८) बिन्दवःभवन्ति , अभीष्ट भावः वलबृधिं च कारयति । यः भावः पञ्चबिन्दुभिः,षड्बिन्दुभिः,सप्त बिन्दुभिः युक्तःस्थात्तदा शुभ फलाप्तिः जातकस्य भवति । यः भावः त्रि,द्वि,बिन्दु युक्तःभवति तस्य भावस्य अशुभफलं लभ्यते । यः भावः चतुर्षु बिन्दुषु युक्तस्यात्तद् भावस्य मिश्र फलयुक्तः भवति । यस्मिन् भावे बिन्दोरभावःस्यात्तदा विविधरोगाः,अपवादभयः, दुःखमय–भ्रमणादि अशुभफलानि भवन्ति। एकबिन्दुः विविधरोग–दुःख–भय–भ्रमणादि कष्टप्रदफलं कारयति । बिन्दु द्वयं मनसि सन्तापःराज्ञःसकाशात् तथा चौराणां सकाशात् दुखं,अपवादःएवं भोजने कष्टं च कारयति । बिन्दुत्रयं उत्तम कार्येषु विभिन्नाःत्रुटयः उत्पादनकारकाः,कृशःशरीरः मनसि व्याकुलता च कारयति । चत्वारः बिन्दवःसुखदुःखस्य धनादि आयव्ययप्रदाःच भवन्ति। पञ्चबिन्दवःउत्तम–वस्त्रेण, पुत्रलालने , साधुसङ्गेन,विद्याधनेन आभूषितं करोति जनः। षड् बिन्दुकस्तु नवमोहनरूपशीलः,युद्धेबिजयः,धन–यश–बल–वाहनेन युक्तः भवति । सप्त बिन्दवःतुरग यानयुक्तः,सेना ,धनवैभवः,शोभान् च जातकाय यच्छति । अष्टौबिन्दवः सप्तबिन्दुषु श्रेष्ठाः । तस्मिन् राजप्रमाणं प्रकटितं भवति ।

## १०.६बोधप्रश्नाः

१)यस्मिन् भावे पञ्चबिन्दवःतस्यभावस्य शुभत्वं अशुभत्वं वा ?

२)भाववृद्धिः कथं भवति ?

३)चत्वारःबिन्दवःकीदृशं फलं यच्छन्ति ?

४)बिन्दोरभावे कीदृशं फलम् ?

## १०.७त्रिकोण शोधनविधिः

अष्टकवर्ग साधनात्परमेव त्रिकोणशोधनस्य आवस्यकता भवति । अस्यार्थं एवं ज्ञातुं शक्यते यत् त्रिकोण शोधनात् परं फलस्य स्फुटता आगछति। अष्टकवर्गस्य ये खलु बिन्दवःसन्ति तेषां शोधनं प्रकारद्वयेण भवति । तद् त्रिकोणशोधनं इति प्रथम– बिधिः। एकाधिपत्य शोधनं अपरा विधिः।

छात्राः! सर्वादौ जानीमःके तावत् त्रिकोणानि ? सम्पूर्ण राशिमण्डलं चत्वारः त्रिकोणेषु विभाजितम् । तर्हि मेषः,सिंहः,धनुः, प्रथमत्रिकोणम् । वृषः,कन्या,मकरः द्वितीयत्रिकोणम् । मिथुन,तुला,कुम्भःतृतीयत्रिकोणम् कर्कः,बृश्चिकः ,मीनः,चतुर्थत्रिकोणम्। तेषां परस्पर कोणानां शोधनं त्रिकोणशोधनं इति ।त्रिकोणशोधनस्य स्पष्टाववोधनार्थं चक्रं लिख्यते। चक्रस्य निर्माणार्थं कश्चन नियमः अस्ति ।

तद्यथा–पूर्वापरा रेखाः पञ्च एवं याम्योत्तरा रेखाः पञ्च लिख्यते। मध्यभागे चतुष्खण्डाः त्यजेत् तदानीं निर्मितं चक्रं द्वादश खण्डात्मकं भवति।

| | | | |
|---|---|---|---|
| ० ० ०<br>२<br>बुधः | ० ० ०<br>१<br>मेषः | ० ० ०<br>१२<br>मीन | ० ० ०<br>११<br>कुम्भ |
| ० ० ०<br>३<br>मिथुन | | | ० ० ० ० ०<br>१०<br>मकर |
| ० ० ० ०<br>४<br>कर्कट | : | | ० ०<br>९<br>धनु |
| ० ० ० ० ०<br>५<br>संहः | ० ०<br>६<br>कन्याः | ० ० ० ० ०<br>७<br>तुला | ०<br>८<br>कुम्भः |

**त्रिकोणशोधनस्थ विधयः निरूप्यन्ते।**

१.त्रिकोणस्य त्रिषु राशिषु यदि(१९९)कस्यचित् राशेः बिन्दुमानं अत्यल्प तं अधिक

बिन्दुस्थितराशितः शोध्यम् । अर्थात् कल्पितोदाहरणे भौमाष्टकवर्गे मेषे बिन्दु त्रयम् । सिंहे बिन्दु पञ्चकम् । घनुषि बिन्दुसंख्या द्वयम् वर्तते ।

अत्र स्थान त्रयेषु धनुषि बिन्दोःसंख्या द्वयं अत्यल्पं च । स्थानत्रय शोधिते मेषे एकं, सिंहे त्रयं, धनुषि च शून्यं अवशिष्टम् । एवमेव अन्येषां विचारः भवेत् । ततः द्वादशराशीनां त्रिकोणशोधनात् परं द्वादशराशौ बिन्दुफलं आगच्छति ।

**तच्चक्रम्**

| राशयः | मे | बृ | मि | क | सिं | क | तु | वृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| विन्दवः | ३ | ३ | ३ | ३ | ४ | २ | ५ | १ | २ | ५ | ३ | ३ |
| त्रिकोण शुद्धबिन्दवः | १ | १ | ० | ३ | ३ | ० | २ | ० | ० | ३ | ० | २ |

२ . त्रिकोणशोधनकाले यदि कस्मिश्चित् राशौ बिन्दोरभाव :स्यात्तदानीं कार्यं न किमपि भवति ।

३ .यदि त्रिकोणस्य त्रिषु स्थानेषु नाम राशिषु बिन्दोःसमता तदानीमपि फलं शून्यं स्यात् । इत्यत्र पाराशरीय वचनम्ः–

"त्रिकोणेषु च यन्न्यूनं तत्तुल्यं त्रिषु शोधयेत् ।
एकस्मिन् भवने शून्ये तत् त्रिकोणं न शोधयेत् ।।
समत्वं सर्व गेहेषु सर्वं संशोधयेत्तदा । "

## १०.८ बोधप्रश्नाः

१ )त्रिकोण इत्यस्य कोऽर्थः ?

२ )त्रिकोणशोधने यदि बिन्दोः समता तदानीं किं फलम् ?

३ )प्रथम त्रिकोण भावाः के ?

४ )त्रिकोण शोधनं कदा न भवति ?

## १०.९ एकाधिपत्य शोधनम्

सूक्ष्मातिसूक्ष्मफलं अवबोधनार्थं पुनरेका व्यवस्था आचार्यैःपरिकल्पिताः। तद्भवति एकाधिपत्यशोधनम् । तर्हि सर्वादौ एकाधिपत्यशोधनं कथं भवति ?

कुजादि पञ्चताराग्रहाणां एव एकाधिपत्यशोधनं भवति । तत्र सूर्यचन्द्रमसौ न । तत्कथमियुक्ते सूर्यचन्द्रमसौ एकैक राशेःअधिपतित्वात् । अस्मात् कारणात् कर्क, सिंह, राशयोःफले शोधनं न भवति । परन्तु अन्ये दशराशीनां ( मेष–वृश्चिक, वृष–तुला, मिथुन–कन्या, धनु–मीन, मकर–कुम्भ ) एकाधिपत्यशोधनं पृथक् पृथक् भवति । तर्हि अस्य शोधनप्रकारः विचारयामः ।

१)त्रिकोणशोधनात् परं यदि राशि द्वयोर्मध्ये न कोऽपि ग्रहः स्यात् , यदि कश्यचिदपि राशौ अन्यराश्यपेक्षया क्षूद्राङ्कः (छोटाअङ्क) स्यात् ,एतादृशी परिस्थितौ क्षूद्रसंख्यां फलस्वरुपं चिन्तनीयम् ।

**उदाहरणम्** – चिन्तयामः– त्रिकोणशोधनात्परमेव यदि मेषराशौ अङ्कत्रयं (३) समागच्छेत् , तथा वृश्चिके अङ्कद्वयं (२), एतादृशी परिस्थतौ क्षूद्राङ्कः द्वि (२)त्वात् स्थानद्वये फलस्वरूपं स्वीकर्तव्यम् । तत्र वृश्चिके द्वि संख्या (२) । मेषस्य त्रि संख्यातःद्वि शोधने एकं अवशिष्टम् । फलं मेषस्य स्वीकर्तव्यम् । वृश्चिकस्य स्थितसंख्या पूर्ववदेव स्थास्यति ।

२)“ खेटोपयाते लघुविन्दुराशौ तत्तुल्यमायान्ति तदन्यसंख्या ”

यस्मिन् राशौ ग्रहःस्यात्तस्मिन् राशौ त्रिकोणशोधनात्परं यदि अल्पअङ्काःस्युः, एवं यः राशिः ग्रहरहितःसन् अधिकअङ्काःस्युस्तदा स्थानद्वयेषु अत्यल्प संख्या ग्राह्याः ।**उदाहरणम्** – यदि मेषराशौ ग्रहःएवं त्रिकोणशोधनात्परं तस्याः संख्या “त्रि ” (३) । तथा ग्रहरहितः वृश्चिकराशिः त्रिकोणशोधनात्परं चतुः(४)संख्या (तीन् से अधिक हो ) स्यात्तदा स्थानद्वयेषु लघुसंख्या ग्राह्या । यथा मेषे “त्रि ”संख्या । वृश्चिकेऽपि “त्रि ” संख्या ।

३)“फलाधिके खेटयुते परं त्यजेत् ” ।

अर्थात् उदाहरणरूपेण मेषराशिः ग्रहयुक्तः सन् त्रि (३)अङ्क युक्तः । तथा वृश्चिकः ग्रहरहितराशौ त्रि संख्यातो न्यूनं यथा द्वि अस्ति । अतः मेषे त्रि संख्या तथा वृश्चिके शून्याङ्कः स्यादिति ।

४) "राशि द्वयं सद्युचरं न शोधयेत्" ।

अर्थात् राशिद्वयं यदि ग्रहयुक्तःस्यात्तदानीं त्रिकोणशोधनात् परं यत् फलं लभ्यते तस्य फलस्य किमपि परिवर्त्तनं न भवति । यथा – मेषे, वृश्चिके, च ग्रहस्थितिः वर्तते। अतः मेषे त्रि संख्या आयति। वृश्चिके त्रि संख्यातो न्यूनं अथवा त्रि एव संख्या समागच्छत्तदा स्थान द्वयस्य न किमपि परिवर्त्तनं जायते।

५)"तुल्या न भोगद्वितयं परित्यजेत्"

अर्थात् राशिद्वयो यदि ग्रहाणां अभावःस्यात्तदा त्रिकोण शोधनात्परं यदि राशिद्वय स्थित फलयोःसमानता आगच्छेत्तदा स्थानद्वये फलशून्यं भवति ।

**उदाहरणम्** :–यदि मेषे वृश्चिके च ग्रहाणां अभावःस्यात् । त्रिकोण शोधनात् परं स्थान

द्वये समानअंकः स्यात्तदानीं एकाधिपत्यशोधने तस्य फल शून्यं स्यादिति ।

६)"सखेचराखेचर बिन्दु साम्ये विशोधयेदग्रह बिन्दु संख्याम् ।"

अर्थात् कश्चिदेक राशिः ग्रहरहितः,अन्यच्च ग्रहयुक्तःस्यात्तदा त्रिकोणशोधनात् परं फले समता स्यात्तदा एतादृशी परिस्थितौ ग्रहवर्जितराशौ फलस्य शून्यत्वम्।

**उदाहरणम्** : – मेषराशिः ग्रहयुक्तः, वृश्चिकराशिःग्रहहीनः। एवं त्रिकोणशोधनात् परं फले समता आगता । अर्थात् मेषे द्वि संख्या। वृश्चिके च द्वि संख्या । अस्यां स्थितौ एकाधिपत्यशोधने ग्रहरहितराशौ फलं शून्यं, ग्रहयुक्तराशौ स्वाभीष्ट संख्या (२)एव तिष्ठति ।


७)"एकं द्वयोःशून्यभमप्य शोधयेत् " ।


अर्थात् राशिद्वये ग्रहः तिष्ठतु न वा परन्तु त्रिकोणशोधनात्परं यदि कश्चित् राशौ शून्यं समागछेत्तदा एकाधिपत्यशोधनकाले फलं यथा पूर्वं तिष्ठति ।

**उदाहरणम् –** *त्रिकोणशोधनात् परं फलं मेषे त्रि संख्या एवं वृश्चिके शून्यसंख्या आगता चेत् तदानीं एकाधिपत्यशोधनं नैव कर्त्तव्यम् । अर्थात् मेषे (३) एवं वृश्चिके (०) स्थास्यति । जिज्ञासवः! पूर्वसाधित उदाहरणस्य त्रिकोणशोधनात्परं एकाधिपत्यशोधनं कथं भवति तद्विचारयामः।*

*भौमाष्टकवर्गाङ्का*

| मं | बु | बृ | शु | श | सू | चं | ल |
|---|---|---|---|---|---|---|---|
| १ | ३ | ६ | ६ | १ | ३ | ३ | १ |
| २ | ५ | १० | ८ | ४ | ५ | ६ | ३ |
| ४ | ६ | ११ | ११ | ७ | ६ | ११ | ६ |
| ७ | ११ | १२ | १२ | ८ | १० | ० | १० |
| ८ | ० | ० | ० | ९ | ११ | ० | ११ |
| १० | ० | ० | ० | १० | ० | ० | ० |
| ११ | ० | ० | ० | ११ | ० | ० | ० |




| राशयः | मे | बृ | मि | क | सिं | क | तु | बृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्रहाः | सु | वु,च. | • | बृ | • | • | श | • | • | म | • | ल.शु |
| विन्दवः | ३ | ३ | ३ | ४ | ५ | २ | ५ | १ | २ | ५ | ३ | ३ |
| त्रि.शो.वि | १ | १ | ० | ३ | ३ | ० | २ | ० | ० | ३ | ० | २ |
| ए.अ.शो.वि | १ | १ | ० | ३ | ३ | ० | २ | ० | ० | ३ | ० | २ |

त्रिकोण–एकाधिपत्य शोधनात्परमेव राशिगुणकः तथा ग्रहगुणकः साधनं भवति । राशिः एवं ग्रहगुणकःसाधनस्य एवं प्रयोजनं भवति यत् जातकस्य आयुषः निरूपणम् । तर्हि सर्वादौ **राशिगुणकाः** एव लिखामः ।

मेषः–७,बृषः–१०,मिथुनः–८,कर्कटः–४,सिंहः–१०,कन्या–५,तुला–७ वृश्चिकः–८,धनुः–९,मकरः–५,कुम्भः–११,मीनः–१२ ।

त्रिकोणशोधनात्परं यत्फलं आगच्छति तस्य फलस्य एकाधिपत्यशोधनं अपि भवति । एकाधिपत्य शोधनात् परं पुनः यत्फलं आगच्छति तस्मिन् प्रक्रिया द्वयं पुनः क्रियते । तद्भवति राशिगुणकसंस्कारः एवं ग्रहगुणकसंस्कारः च । राशिगुणकाः तथा ग्रहगुणकाः अस्माकं भारतीय ऋषयः संकलिताः सन्ति,येन आयुषः विचारः सम्यक् भवेत् इति । एतस्य प्रयोगविषये अधुना वयं चर्चां कुर्मः ।

मेषस्य एकाधिपत्यशोधनावसरे या संख्या समायाति तां संख्यां मेषस्य राशि गुणकेन (७) गुण्यते । फलं मेषस्य राशिगुणाकारकोष्ठके लेख्यम् । एवं प्रकारेण वृषराशौ एकाधिपत्यशोधनात्परं प्राप्त संख्यां दशमिः(१०) गुण्यते । मिथुनस्य फलं अष्टाभिः (८) । एवमेव अन्येषां भवन्ति । राशिगुणक विचारात्परमेव ग्रहगुणकविचारः अपेक्षितः अस्ति । तर्हि ग्रहगुणकाः यथा :–

ततः **ग्रह गुणकाः**- सूर्यः–५ ,चन्द्रः–५,मङ्गलः–८ ,बुधः–५, बृहस्पतिः–१०शुक्रः–७ ,शनिः–५

एतस्याभिप्रायःभवति यत् यस्मिन् राशौ ग्रहःतिष्ठति , तस्य भावस्य एकाधिपत्य–शोधनफलं ग्रहगुणकेन संगुण्यते । गुणनफलं गुणाकारकोष्ठकस्य सम्मुखे अभीष्ट राशेःअधः लिख्यते । यदि कश्मिन् राशौ एकाधिकाःग्रहाःस्युः तदा तस्य (ग्रहाधिष्ठितराशेः) राशेः एकाधिपत्यशोधनात्परमेव प्रत्येक ग्रहस्य गुणकेन संगुण्य,फलं प्रत्येकं योज्यम् । योगफलं अभीष्ट ग्रहगुणाकार कोष्ठकस्य सम्मुखे अभीष्ट राशेरधःलिख्यते ।

उदाहरण रूपेण चन्द्राष्टकवर्गे तुलाराशौ एकाधिपत्यशोधनात्परं फलं आगच्छति।

एवं तुलाराशौ ग्रहत्रयाणां(सूर्यः,बुधः,शुक्रः) योगः। तत्र ग्रहत्रयाणां गुणकान् एका संख्याभिःगुण्यते । अर्थात् सूर्यस्य गुणकः पञ्चः एकेन , बुधस्य गुणकःपञ्चःएकेन, ततो शुक्रस्य गुणकःसप्तःएकेन गुण्यते फलं क्रमशःयोज्यते । ५ ५ ७ १७

१७ ग्रहपिण्डं चन्द्राष्टकवर्गे ग्रहगुणाकार कोष्ठस्य सम्मुखे तुलाराशेःनिम्नभागे स्थाप्यम् । अनेन प्रकारेण प्रत्येकस्मिन् अष्टकवर्गे अनया रीत्या राशिः तथा ग्रहगुणक फलानां सङ्कलनं भवति । ग्रहगुणककोष्ठके फलानां संकलनं ग्रहपिण्डं आगच्छति । तथैव राशि पिण्डमपि । राशिगुण ग्रहगुण पिण्डयोः साधनात् परं अभीष्ट ग्रहस्य आयुषः भवति । अधुना तस्य गणितागत विधः विचार्यते। राशि गुणकात् प्राप्तसंख्यां एवं ग्रहगुणकात् प्राप्तसंख्यां च उभयं संयोगं कृत्वा योगपिण्डःनिर्मातिव्यः। फलं त्रिंशद्भिःभाज्यम् । लब्धं वर्ष,मास,दिनादि क्रमेण आगच्छति । तत्र विशेष– रूपेण वर्षसंख्या यदि द्वादश

संख्याधिका स्यात्तदा द्वादशभिः भाज्यम् । भागशेषं वर्षरूपेण ग्रहणीयः। इदानीं प्राप्तसंख्या अभीष्ट ग्रहस्य आयुषः भवति । एवमेव सर्वेषां ग्रहाणां साधनं कर्त्तुं शक्नुमः। अयं तु सर्वसामान्य विधिः। परन्तु इत्यत्र ग्रहस्य अवस्था (उच्चादि ...) विषयेऽपि चिन्तनीयः। तत्तु जातकपारिजातानुसारं यथा–

" उच्चं गतस्य द्विगुणं तदीयं नीचं गतस्यास्तगतस्य चार्धम्।
अतोऽन्तराले त्वनुपात्यमायुरारस्य वक्रे द्वगुणी कृतं स्यात् ।।
मूलत्रिकोण निजमित्र गृहोपगानां तुङ्गादिवर्ग शुभयोग निरीक्षितानाम्
उक्तप्रकारगणितागममायुरेव पापारिवर्ग सहितस्य विपादमायुः।।"""
(जा.पा. १०/४६,४७)

अर्थात ग्रहःयदि उच्चं गतः तदानीं तस्य गणितागतः आयुः द्विगुणितं भवति।

नीचं गतस्य,अस्तं गतस्य प्राप्तायुषःअर्धं भवति । तत्र मङ्गलः यदि वक्रगतिकःस्यात्तदा प्राप्तायुषः द्विगुणं भवति।

ये ग्रहाः स्वमूलत्रिकोणे ,स्वमित्र गृहे ,स्वोच्चादि वर्गे स्थिताः भवेयुः तथा शुभग्रहेण युक्ताः निरीक्षिताश्च भवेयुः तदा तेषामायुःगणितागत विधेः अनुसारं भवति । अर्थात् तस्मिन् आयुषि कामपि वृद्धिः ह्रासो वा न भवति ।

यः ग्रहः पापग्रहस्य ,शत्रुग्रहस्य वा वर्गगतः भवति तस्य विपदमायुः। अर्थात् चतुर्थांशोनं गणितागतायुःग्राह्यम् ।

निष्कर्ष रूपेण कथयामः यत्– सूर्यादि ग्रहाणां आयुसंख्यां क्रमशः योज्यते तदा विचारित मनुष्यस्य परमायुःभवति । तत्र केषाञ्चन आचार्याणां मतमस्ति यत् सूर्यादि ग्रहाणां आयुषमाने लग्नायुषसंख्यां योज्यते तदा सूक्ष्मरूपेण अभीष्ट जनस्य परमायुःजायते ।

## १०.१०बोधप्रश्नाः

१)एकाधिपत्येन किं अवगम्यते ?

२)राशिद्वयं सह्युचरं किं न कुर्यात् ?

३)वृषमिथुनराशयोः गुणाङ्काः लेख्याः ।

४)ग्रहगुणकाः केषां ग्रहाणां भवति ?

५)विपदमायुः इत्यस्य कोऽर्थः ?

## १०.११भिन्नाष्टकवर्गः एवं समुदायाष्टकवर्गविचारः

प्रियात्मनः! अद्यावधिःअस्माकं आलोचितःविषयःआसीत् अष्टकवर्ग साधनम् । तदनुसारं आयुषः विचारः। परन्तु आयुषःविचारस्य पुनःसूक्ष्मचिन्तनं कृतवन्तःअस्माकं शास्त्रनिर्मातारः। तदेव प्रकारद्वयेण आचार्यैःसूचीतम्।तत्र

प्रथमप्रकारः भवति भिन्नाष्टकवर्गः। द्वितीयप्रकारः भवति समुदायाष्टकवर्गः।

अधुना सर्वप्रथमं भिन्नाष्टकवर्ग विषये चर्च्चां कुर्मः । भिन्नाष्टकवर्गः नाम

सूर्यादि शन्यन्तः भिन्न भिन्न अष्टकवर्ग माध्यमेन भिन्न भिन्न ग्रहाणां एवं लग्न द्वारा आयुः साधनं कृत्वा तेषां सर्वेषां मेलनं (योगः)भवति । संयोगात् यत्फलं लब्धं भवति तदेव जातकस्य परमायुः।

भिन्नाष्टकवर्गः आयुः विचारार्थं निम्न सर्ताःआवश्यकाःभवन्ति ।

१)यदि कोऽपि ग्रहः शत्रु नवांशे स्यात् ।

२)यदि बुधः बलवान् सन् लग्ने स्यात् ।

३)यदि कोऽपि शत्रुगृहीग्रहः लग्ने स्यात् ।

४)यदि कोऽपि ग्रहः षष्ठस्थानगतःस्यात् ।

५)यदि कुण्डल्यां मङ्गल बलीस्यात् ।

६)यदि कुण्डल्यां वापी,पाश,शर, पद्म अथवा समुद्रयोगाःस्युः अपिच गुरुः बलवान् स्यात्।

७)यदि कस्यां कुण्डल्यां केदारयोगः स्यात् तत्रच गुरुः बलवान् स्यात् ।

८)यदि बली चन्द्रमा केन्द्रे न स्यात् ।

९)यदि चन्द्रमा यस्य कस्यापि ग्रहस्य साकं केन्द्रात् बहिः स्यात् ।

१०)दशमभावे यदि पापग्रहाः तथा शुभग्रहाः मिलितः सन् स्युः ।

इत्यत्र पूर्व उदाहरणं एव स्मरामः। तत्र भौमाष्टकवर्गे भ्रातृविचारे कर्त्तव्ये भ्रातृकारकःग्रहःभौमः मकरराशिगतः उच्चः।अतः तस्य शोध्यावशिष्टं फलं १५ प्रमितम् ।भौमात् तृतीये मीने फलं –२ ।अतः तयोः गुणनफले १५....२३० अस्मिन् सप्तविंशति भक्ते शेषं ३ अर्थात् तस्मिन् नक्षत्रगते शनैश्चरे भ्रातुः नाशं भवतीति निश्चयार्थः । तस्मिन् समये विपुल श्री नाशोऽपि भवति ।

## १०.११.१ समुदायाष्टकवर्गः

अस्यार्थं एवं निरूपयितुं शक्यते यत् सम्पूर्ण अष्टकवर्गस्य फलं समुदायाष्टकवर्गत्वेन गण्यते । समुदायाष्टकवर्गे एक बिन्दुतः पञ्चविंशति बिन्दु

पर्यन्तं फलं असत्यं अफलञ्च ।पञ्चविंशतितः त्रिंशत् बिन्दुपर्यन्तं मध्यमफलदायकं भवति ।अन्तिमे त्रिंशत् बिन्दोः अधिके फलं यशस्करं , सुखदं च भवति ।

स्पष्टरूपेणवदामःचेत् लग्न,सूर्य,चन्द्र,नङ्गल,बुध,गुरु,शुक्र,शनयःअष्टकवर्गे मेषराशौ ये बिन्दवः भवन्ति तेषां संयोगःक्रियते । एवमेव वृष,मिथुनादि राशौ अपि ग्रहाणां बिन्दुयोगःकर्त्तव्यः । तेन भिन्न भिन्न रूपेण बिन्दोः संख्याः भवन्ति । एतेषां बिन्दूनां अपि पूर्व प्रक्रियानुसारं त्रिकोण एकाधिपत्य शोधनं भवति ।एतेषां राशिगतः बिन्दूनां योगकरणे यदि द्वादशः वा द्वादश संख्यातःन्यूनः स्यात्तदा आगतासंख्या पूर्ववत् तिष्ठति । यदि संयोगःबिन्दुसंख्या द्वादश संख्याधिकाःस्युः तदा द्वादशभिः भाज्यम् । भागशेषफलं अभीष्ट राशेःगृहीता संख्या । अनेन प्रकारेण सर्वेषां बिन्दूनां शोधनात्परं राशिगुणकः,ग्रहगुणकःप्रक्रिया करणात्परं यः योगपिण्डः आगच्छति तं सप्तभिः संगुण्य सप्तविशति संख्याभिः भाज्यम् । एवं भागफलं शतवर्षाधिकं स्त्तादा फलात् शतं विशोध्यते । शेषफलं वर्षसंख्या ग्रहीतव्याः ।

## १०.१२ बोधप्रश्नाः

१ ) भिन्नाष्टकवर्गस्य का परिभाषा ?

२ )भिन्नाष्टकवर्गे जातस्य परमायुः कथं ज्ञायते ?

३ ) कस्यां परिस्थितौ जातस्य विपदमायुः भवति ?

४ )उच्चंगतस्य ग्रहस्य गणितागतायुःकियन्मितं भवति ?

५ )राशिग्रहगुणपिण्डयोःसाधनात् किम् जायते ?

## १०.१३ संक्षिप्त उत्तरमूलकप्रश्नाः

१ )अष्टकवर्गे शुभस्थानानि काभिः संसूच्यते ?

२ )अष्टकवर्गविचारःकुतः भवति ?

३ )गोचरानुसारं फलविचारःकीदृशी विधिः ?

४ ) के अष्टकवर्गाः ?

५)के खलु त्रिकोणराशयः? ?

६)त्रिकोणशोधने कस्यचित् राशेःबिन्दोःअल्पत्वे किं करणीयम् ?

७)त्रिकोणशोधने त्रिषुस्थानेषु बिन्दोःसमता स्यात्तदा कीदृशं फलम् ?

८)बिन्दोः अभावे त्रिकोणशोधने किं भवति ?

९)एकाधिपत्यशोधनं केषां ग्रहाणां भवति ?

१०)मेषस्य वृश्चिकस्य च राशेःध्रुवाङ्कं किम् ?

११)सूर्यशुक्रयोः ग्रहगुणकमानं निरूपयत ।

## १०.१४नातिदीर्घोत्तरमूलकप्रश्नाः

१) एकाधिपत्यशोधनं कथं भवति ?

२) त्रिकोणशोधनं कथं भवति ?

३)राशिगुणकानां ग्रहगुणकानां व्यवहारः कथं भवति तन्निरूप्यताम् ।

४) "फलाधिके खेटयुते परं त्यजेत् "" स्पष्टीक्रियताम् ।

५) सूर्याष्टकवर्गस्य व्याख्या कार्या ।

## १०.१५दीर्घोत्तरमूलकप्रश्नाः

१) लग्नाष्टकवर्गस्य साधनं सोदाहरणं व्यख्या कार्या ।

२) उदाहरणपूर्वकं त्रिकोणशोधनं निरूप्यताम् ।

## १०.१६संक्षिप्त उत्तरमूलकप्रश्नानां उत्तराणि

१)बिन्दुभिः २)चन्द्राधिष्ठित राशितः ३)गौण विधिः ४) सलग्नसप्तग्रहाः ५) १– ५–९ ,२–६–१०, ३–७–११, ४–८–१२ ६) अधिक बिन्दुस्थित राशितः शोध्यम् ७)शून्यम् ८)किमपि न ९)कुजादि पञ्चताराग्रहाणां १०)७,८ ११)५,७

❖❖❖